# बृहत्संहिता

## प्रस्तावना

लोके अतिप्राचीनमपौरुषेयं वाङ्मयं वेदः। अस्य वेदस्य शिक्षा-कल्पः-व्याकरणं-छन्दः-ज्योतिषमिति षडङ्गानि वर्तन्ते। ज्योतिषं हि ऋग्वेदादिषु दृश्यमानानां प्रक्रियाणां कुञ्चिकायते। ज्योतिषं कालविधायकं शास्त्रम्। सुमुहूर्ते कृतानां यज्ञयागादीनां फलं सफलं भवति। सुमुहूर्तज्ञानं ज्योतिश्शास्त्रेणैव सम्भवति। अतएवास्य चक्षुषत्वेन वेदाङ्गत्वम्।

**वेदचक्षुः किलेदं स्मृतंज्योतिषं मुख्यताचाङ्गमध्येस्य तेनोच्यते।**

**संयुतोऽपीतरैः कर्णनासादिभिः चक्षुषाङ्गेन हीनो न किञ्चित्करः।।**

यथा दिवासमये रविः तपति तथा रात्रिसमये चन्द्रः शीतलतां सुधां विकिरति. समुदिते सूर्ये कमलानि विकसन्ति, अस्तंगते च कुमुदानि विकसन्ति। तथैव ज्योतिषस्य प्रत्यक्षता सर्वैः अवलोक्यते समाद्रियते च । संस्कृतवाङ्मये विद्यमानेषु बहुप्रकारेषु शास्त्रेषु केषांचन शास्त्राणां प्रत्यक्षता सत्यता च कोऽपि नानुभवति। परं ज्योतिषस्य सत्यतायां सन्देहस्य लेशोऽपि नास्ति। लगधमुनिना शास्त्रस्यास्य वैशिष्ट्यम् एवमुक्तम् -

**अप्रत्यक्षाणि शास्त्राणि विवादस्तत्र केवलम्।**

**प्रत्यक्षंज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ।।**

अनेन श्लोकेन सर्वेषु शास्त्रेषु विवादस्तत्र प्रदत्तप्रमाणेषु प्रत्यक्षताया अभावः दृश्यते। एवं ज्योतिषे प्रत्यक्षप्रमाणत्वादस्य सर्वापेक्षया निर्विवादत्वं सिध्यति। यतोऽहि यत्र चन्द्रसूर्यौ साक्षिणौ स्तः तत्र अप्रत्यक्षतायाः स्थानं कुत्र?

ज्योतिषं सिद्धान्तभागः, होरा, संहिता इति त्रिधा विभक्तम्। इदमेव स्कन्धत्रयमिति उच्यते।

**१) सिद्धान्तस्कन्धः** - अयं स्कन्धः गणितशब्देन, तन्त्रशब्देनाप्यभिधीयते। तन्त्रं हि

ग्रहगतिसम्बद्धम्। मध्यगतिः तिथिनक्षत्रच्छेदः, स्फुटगति, त्रिप्रश्नः, चन्द्रार्कग्रहणे उदयास्तमयौ शृङ्गोन्नतिः, समागमः, तारग्रहसंयोगश्च अस्य स्कन्धस्य विषयाः।

**२) होरास्कन्धः** - होरायाः जातकशास्त्रमिति अपरनाम। होरा इति पदं अहोरात्रशब्दान्निष्पन्नमिति उक्तम् -

**होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्।**

**कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति।।**

अस्मिन् स्कन्धे राशिप्रभेदः, ग्रहयोनिः, आधानं, जन्ममूलादिनक्षत्रविवेकः, संवत्सरादिफलं, मासफलं, ग्रहस्थितिफलं, ग्रहदृष्टिफलं, अरिष्टविचारः, आयुर्दायः, राजादियोगाश्च विवेच्यते।

**३) संहितास्कन्धः** - संहिता शब्दस्य प्रयोगः शास्त्रीयो वर्तते। संहितम् इति प्रातिपदिकात् स्त्रीत्वविवक्षायां स्त्रीलिङ्गवाची टाप् प्रत्यये संहिताशब्दो निष्पद्यते। संहिता नाम सम्यक् हितं प्रतिपाद्यं यस्याः सा इति । यत्र ग्रन्थेषु मामाजिकलोकहितकारकविषयाः प्रतिपाद्यन्ते। येन ग्रहाणां प्रभावः ज्ञायते सः संहितास्कन्धः, सार्वत्रिकविषयः। सिद्धान्तहोरयोरेकत्रवर्णनमेव संहिता। अस्मिन् स्कन्धे - भूशोधनं, दिग्शोधनं, शल्योद्दारः, गृहारम्भः, गृहप्रवेशः, गृहोपकरणं, मेलापकं, जलाशयनिर्माणं मङ्गलमुहूर्तः, ग्रहोदयास्तफलं, ग्रहचारफलं, उल्कापातः, वृष्टिः, जनाभिवृद्धिः, क्षयः, गजाश्वदि सकल जन्तूनां अन्यवस्तूनां च लक्षणानि केतूल्कादीनां च लक्षणं इत्यादयः पूर्वाचार्यैराविरकारि। संहितास्कनो विद्यमानेषु ग्रन्थेषु बृहत्संहिता अतीवप्रसिद्धा वर्तते।

वराहमिहिरस्य ग्रन्थेष्वपि बृहत्संहिता एव उत्तमा यतः अत्रोक्तवास्तुप्रकरणम् दकार्गलं च अतीवमहत्वमाप्नुतः। तथैव आदित्यादि नवानां ग्रहाणां चारविचारः, आगस्त्यचारविचारः, सप्तर्षिचारविचारः, नक्षत्राणां प्रविभाववविचारः, ग्रहयुद्धविचारः, वर्षफलविचारः, वातचक्रविचारः, सद्योवर्षलक्षणविचारः, स्वाती-आषाढी-रोहिणी-योगानां विचारः , वृक्षायुर्वेदः, देवताप्रतिमायाः निर्माणप्रतिष्ठादिविचारः, प्रसादलक्षणानि, वज्रलेपनिर्माणविधिः, गो - अश्व - कुक्कुट - हस्तिलक्षणानि, पुरुष-स्त्रीलक्षणानि, शकुनोत्तरविचारः, तिथिनक्षत्रकरणविचारः, विवाहपटलविचारः, ग्रहगोचारविचार इत्यादयः सम्यक् प्रतिपादिता अतएव बृहत्संहिता ग्रन्थः विश्वविज्ञाननिधिः इति सर्वैरङ्गीकरणीयमेव।

बृहत्संहिताया अध्ययने छात्राणां सौकर्यार्थं अस्माभिः कश्चन विशिष्ट अध्यायक्रम आदृतः। अत्र प्रतिपादितेषु अध्यायेषु विद्यमानानामंशानां उपयोगिताश्चादौ पृथक् पृथक् निरूप्य तदनन्तरं तेषामंशानां निरूपणं विचारश्च विस्तरेण कृतः। यस्य अध्यायस्य सम्बद्धाः प्रश्नाः तस्याध्यायास्यान्ते एव प्रदत्ताः।

# संरचना


१. प्रथमोऽध्यायः

१.१ अवतरणिका

१.२ उद्देश्यानि

१.३ मङ्गलाचरणश्लोकः

१.४ वराहमिहिरमते संक्षिप्तग्रन्थस्य प्रयोजनम्

१.५ वराहमिहिरमते मुनिकृतानां मनुष्यकृतानां च भेदविचारः

१.६ जगत उत पत्ति हेतवः

१.६.१ कपिलस्य मतम्

१.६.२ कणादस्य मतम्

१.६.३ काल एव कारणमिति मतम्

१.६.४ स्वभावः कारणमिति मतम्

१.६.५ कर्मकारणमिति मतम्

१.७ ज्योतिश्शास्त्रस्य स्वरूपः

| | |
|---|---|
| १.८ | स्कन्धत्रयविचारः |
| १.९ | सांवत्सरस्य स्वरूप - गुण - लक्षणविचारः |
| १.९.१ | स्वरूपविचारः |
| १.९.२ | गुणविचारः |
| १.९.३ | लक्षणविचारः |
| १.९.४ | तन्त्रज्ञस्य विशेषलक्षणम् |
| १.९.५ | अपण्डितस्य लक्षणविचारः |
| १.१० | ज्योतिषशास्त्रस्य दैवज्ञस्य च प्रशंसाः |
| १.११ | होराशास्त्रे वक्ष्यमाणाः विषयाः |
| १.११.१ | यात्राविचारः |
| १.११.२ | संहिताविचारः |
| १.१२ | ज्योतिषशास्त्रस्य दैवज्ञस्य च आवश्यकतायां विचारः |
| १.१३ | तिथिनक्षत्रश्रवणफलविचारः |
| १.१४ | प्रश्नावली |

# बृहत्संहिता

## १.प्रथमोऽध्यायः

### १.१) अवतरणिका

ज्योतिषं हि ग्रहनक्षत्राणां गतिं स्थितिश्चाधारीकृत्य कृतं शास्त्रम्। अर्थात् सूर्यादिग्रहकालमानादीनां बोधकशास्त्रमेव ज्योतिषशास्त्रम्। प्रधानतयात्र ग्रह-नक्षत्र-धूमकेत्वादि ज्योतिः पादर्थानां स्वरूपसञ्चारपरिभ्रमणकालस्थित्यादीनां विचाराः प्रवर्तन्ते। एतैः विचारैः समस्तजगतः शुभाशुभफल कथनमपि क्रियते। तत्फलकथनार्थमेव अस्मत्पूर्वज्योतिश्शास्त्राचार्यैः महान् विचारः कृतः। तथैव वराहमिहिरेणापि अस्यां बृहत्संहितायां अनेकेषु विषयेषु इवचारः कृतः।लोकस्य शुभाशुभ फलं ज्योतिषमाधारीकृत्य यः वदति सः दैवज्ञो भवति। सः दैवज्ञः लोकस्य मार्गदर्शको भवति। अतस्तस्य दैवज्ञस्य अनैकान्युत्तमलक्षणानि भवेयुः। तथैव नित्यदैवचिन्तनातत्पराः मुनयः, मनुष्याः, सामान्या अतएव मुनिकृतानां मनुष्यकृतानां मनुष्यकृतानां च भेदो वर्तते। अतएव वराहमिहिरः अस्य ग्रन्थस्य प्रथमाध्याये एव दैवज्ञस्य लक्षणानि तथैव मुनिकृतानां मनुष्यकृतानां च कर्मणां भेदान् विस्तरे विचारितवान्। तथैव संक्षिप्तग्रन्थस्य प्रयोजनम् जगत उत्पत्तेः हेतवः, ज्योतिषशास्त्रस्य स्वरूपः तिथिनक्षत्रविचारः इत्यादिविषयान् विस्तरेम विचारितवान्। तैनेवविषयान् सरलतया भाषया संक्षिप्तविधानेन अस्मिन्नध्याये छात्राणां सुलभावगमनार्थं प्रश्नावल्यासह दीयते।

# १.२) उद्देश्यानि

पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।

* मङ्गलाचरणश्लोकस्य अर्थं विवरणं च आविष्कर्तुं समर्थो भवति।

* वराहमिहिरमते संक्षिप्तग्रन्थस्य प्रयोजनम् किमिति प्रतिपादयितुं शक्नोति।

* वराहमिहिरमते मुनिकृतानां मनुष्यकृतानां च भेदविचारस्य मीमांसां कर्तुं शक्नोति।

* जगत उत्पत्तेः हेतवः पक्षान्तराणि च चर्चयितुं समर्थो भवति।

* ज्योतिश्शास्त्रस्य स्वरूपं विशदीकर्तुं समर्थो भवति।

* स्कन्धत्रयविचारः वराहमिहिरेण कथं कृत इति लेखितुं शक्नोति।

* सांवत्सरस्य, तन्त्रज्ञस्य, अपण्डितस्य च स्वरूप - गुण - लक्षणानि ज्ञातुं शक्नोति।

* ज्योतिश्शास्त्रस्य दैवज्ञस्य च प्रशंशाः ग्रन्थकर्त्रा कथं कृता इति ज्ञास्यति।

* होराशास्त्रे वक्ष्यमाणाः विषयाः के ? इति विचारयितुं समर्थो भवति।

* यात्राविचारः कथं करणीयः इति ज्ञातुं समर्थो भवति।

* संहिताविचारः वराहमिहिरेण कथं कृत इति वक्तुं शक्नोति।

* ज्योतिश्शास्त्रस्य दैवज्ञस्य च आवश्यकतायां विचारं कर्तुं समर्थो भवति।

* तिथिनक्षत्रश्रवणफलविचारं कर्तुं समर्थो भवति।

***

**१.३) मङ्गलाचरणश्लोकः -**

**जयति जगतः प्रसूतिर्विश्वात्मा सहजभूषणं नभसः।**

**द्रुतकनकसदृशदशशतमयूखमालार्चितः सविता।।**

समस्तचराचरजगतः प्रसूतिः अस्य स्थावररूपस्य जङ्गमस्य च विश्वस्य प्राणरूपेण हृदयान्तरस्थितात्मा, आकाशस्य अकृत्रिमं अलङ्करणं , गलितसुवर्ण सदृशकिरणैः कृतमालया अर्चितः सविता (सूर्यः) जयति सर्वोत्कर्षेण वर्तते। इति मङ्गलाचरणश्लोकस्य अर्थः।

**१.४) वराहमिहिरमते संक्षिप्तग्रन्थस्य प्रयोजनम् -**

**प्रथममुनिकथितमवितथमवोलोक्य ग्रन्थविस्तरस्यार्थम्।**

**नातिलघुविपुलरचनाभिरुद्यतः स्पष्टमभिधातुम्।।**

प्रथममुनिना ब्रह्मणा सत्यरूपं विस्तीर्णशास्त्रं यदुक्तं तस्य अर्थं सम्यग्विचार्य अहं न स्वल्पाभिः न विस्तीर्णाभिः अर्थात् मध्यरचनाभिः स्फुटतरमभिधातुं प्रवृत्तः यतः संक्षिप्तस्य ग्रन्थस्य ग्रहणदारणे सुखं भवति।

**१.५) वराहमिहिरमते मुनिकृतानां मुनुष्यकृतानां च भेद विचारः -**

इदं शास्त्रं ब्रह्मादिभिः मुनिभिः रचितमिति मत्वा इदं चिरंतनं श्रेष्ठमिति वक्तव्यं यतो हि मुनिभिः प्रागेव रचितम्। मनुष्यरचितं साधु इति न वक्तव्यं यतः सांप्रतं रचितत्वात्। मुनिभिः ग्रथितानां मनुष्यग्रथितानां च को भेदः? इति प्रश्नस्य समाधानमिदमुच्यते। द्वयोः कृत्योः मध्ये सदृशार्थः भवति चेदपि अक्षराणां भेदो भवति। मनुष्यग्रथिताः कृतयः मन्त्रवर्जिताः भवन्ति।

यथा -

**मुनिविरचितमिदमिति यच्चिरंतनं साधु न मनुजग्रथितम्।**

**तुल्येऽर्थेऽक्षरभेदामन्त्रके का विशेषोक्तिः।।**

ब्रह्मणा कथिते शास्त्रे क्षितितनय दिवसवारे न शुभकृदिति उक्तिः वर्तते। अत्र

क्षितितनयो नाम भूमेः पुत्रः भौम इत्यर्थ अतः भौमवारः सर्वकर्मणां शुभं फलं न करोतीति अर्थ ज्ञातव्यः। अयमेव विषयः मनुष्यकृतौ (वराहमिहिरकृतौ) कुजदिनमनिष्टमिति उक्तम्। अत्र कुशब्देन भूरित्युच्यते, ततः जातः कुजः । तस्यदिनं वारश्च सर्वकर्मणां अशोभनमिति उक्तिः। तस्मात् मनुष्यरचितस्य शास्त्रस्य देवरचितस्य अर्थस्य किमन्तरमिति भवन्त एव विचारयन्तु। अनेन ऋषिकृतानां महत्वं स्वशास्त्रस्य संक्षिप्तत्वं प्रकाशितं भवति।

यथा -

**क्षितितनय दिवसवारो न शुभकृदिति पितामहप्रोक्ते।**

**कुजदिनमनिष्टमिति वा कोऽत्र विशेषो नृदिव्यकृतेः।।**

ब्रह्मादिभ्यः यत् निर्गतं विस्तीर्णं शास्त्रं दृष्ट्वा तस्मात् क्रमशः संक्षेपेणैतच्छास्त्रं मया क्रियते पारम्पर्येण मुनिभिः संक्षिप्तीकृतं अहमपि संक्षिप्ती करोमि इत्यस्मात् हेतोः ममोत्साहः। इति वराहमिहिरेण कथितम्।

यथा -

**आब्रह्मादिविनिः सृतमालोक्य ग्रन्थविस्तरं क्रमशः।**

**क्रियमाणकमेवैतत् समासतोऽतो ममोत्साहः।।**

**१.६) जगतः उत्पत्तेः हेतवः -**

अस्मिन् जगति पुरा तमो भूते भगवानव्यक्तः प्रजासिसृक्षुः आदौ आपः ससर्ज, तासु च वीर्यं उदसृजत्।ततस्तदण्डं सौवर्णं सहस्रांशुसन्निभमभवत्, तस्मिन्नभ्यन्तरे ब्रह्मा जज्ञे, ततः स भगवांस्तत्र परिवत्सरमुषित्वा स्वयमेव ध्यानात्तदण्डं द्विधाऽकरोत्। ताभ्यां शकलाभ्यां एकं स्वर्गः द्वितीयं भूरितिनिर्ममे। स ब्रह्मा सोमसूर्यनेत्रः सर्वलोकपितामहो विश्वकृदिति स्मृतिकारः वदन्ति।

**आसीत्तमः किलेदं तत्रापां तैजसेऽभवद्धैमे।**

**स्वर्भूशकले ब्रह्मा विश्वकृदण्डेऽर्कशशिन मनः।।**

**अस्मिन् विषये पक्षान्तराणि विचार्यन्ते -**

अस्मिन् विषये बहूनि मतान्तराणि दृश्यन्ते। तत्रादौ सांख्याचार्येण कपिलेन जगतः कारणं प्रधानमिति कथितम्। एवमेव कणादः, पौराणिकाः, लौकायतिकाः, मीमांसकाः भिन्नभिन्न मतानि प्रतिपादितवन्तः।

**१.६.१)कपिलस्य मतम्** - संख्याचार्येण कपिलेन जगतः कारणं प्रधानमिति कथितम्। सत्वरसजस्तमसां त्रयाणां गुणानां सुखदुःखमोहलक्षणानां प्रकाशप्रवृत्तिनियमार्थानां साम्यवस्था प्रधानमुच्यते। प्रधानमव्यक्तं प्रकृतिरिति पर्यायाः। प्रकृतेः महान् भवति। महान् बुद्धिरध्यवसाय इति पर्यायाः। तस्याः बुद्धेः सत्वाधिकायां ज्ञानं वैराग्यमैश्वर्यमिति धर्माः, तस्या एव बुद्धेः तमोऽधिकायां अज्ञानमवैराग्यमनैश्वर्यमिति अधर्माः भवन्ति। अतः बुद्धेः अध्यवसायः निश्चयः। यथा - पुरुष एव अयं गौरेवायं अश्व एवायं इति ज्ञानम्। ततो महत्तत्वादहंकारो भवति। यथा - अहं कुलजोऽहं सुरूपोऽहमीश्वर इत्यादि ज्ञानम्। अहंकारात् षोडशको गुणोभवति। सत्वाधिकात् अहंकारात् च एकादश इन्द्रियाणि अर्थात् पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनः च । अहंकारात् पञ्चतन्मात्राणि ( शब्दतन्मात्रं - स्पर्शतन्मात्रं - रूपतन्मात्रं - रसतन्मात्रं - गन्धतन्मात्रमिति) भवन्ति। एभ्यः पञ्चेभ्यः आकाशवाय्वग्निजलपृथिव्याख्यानि पञ्चमहाभूतानि भवन्ति। तेभ्यः शरीरिणां शरीराणि भवन्ति। यतः पञ्चमहाभूतमयानि शरीराणि। एवं प्रधानं चिद्रूपस्य पुरुषस्य भोगार्थं मोक्षार्थं च विस्वं सृजति। भुक्तभोगस्य वैराग्योत्पादनं मोक्षावप्तिरिति कपिलस्य अभिप्रायः।

**१.६.२) कणादस्य मतम् -**

कणादः विश्वस्य द्रव्यादीन् पदार्थान् कारणमाह। अत्र द्रव्यादिपदार्थाः नाम द्रव्यगुणकर्मसामन्यविशेषसमवायाख्याः षट् पदार्थाः । एतेषां षण्णां पदार्थानां साधर्म्यवैधर्म्यज्ञानं मोक्षस्य हेतुः। एवमेते द्व्यणुकादिक्रमेण कार्यं निवर्तयन्ति। क्षितिजलाग्निवायूनां चतुर्विधाः परमाणवः द्वाभ्यां परमाणुभ्यां द्व्यणुकमारभ्यते। त्रिभिः परमाणुभिः त्र्यणूकमारभ्यत इति क्रमेण स्थूलकार्यस्य द्रव्योत्पत्तिः भवति। एवं जगत्सम्भवो भवति इति कणादस्य मतम्।

**१.६.३) कला एव कारणमिति मतम् -**

केऽपि कालकारणिकाः पौराणिकाः काल एव जगतः कारणमिति उक्तवन्तः। कालः प्रजाः सृजति स एव संहरति अतः जगतः काल एव कारणमिति वदन्ति।

**कालस्य लक्षणं एवं उच्यते -**

**नित्यमेकं विभुं द्रव्यं परिमाणं क्रियावताम्**
**व्यापारव्यतिरेकेण कालमेके प्रचक्षते।**
**आदित्यग्रहतारादि परिस्पन्दमथापरे**
**भिन्नमावृत्तिभेदेन कालं कालविदो विदुः।।**

**१.६.४) स्वभावः कारणमिति मतम् -**

अपरे लौकायतिकाः जगतः स्वभवं कारणमिति वदन्ति। इदं विचित्रं जगत् स्वभावादेव उत्पद्यते। स्वभावतः विलयं याति।

**स्वभावस्य लक्षणं उच्यते -**

**कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां च।**
**माधुर्यमिक्षोः कटुतां च निम्बे स्वभावतः सर्वमिदंप्रवृत्तम्।।**

**१.६.५) कर्म कारणमिति मतम् -**

मीमांसकाः जगतः कर्म एव कारणमिति उक्तवन्तः, प्राणिनां शुभाशुभकर्म जगतः पुण्यापुण्यरूपं कारणं भवति। अतएव शुभेन कर्मणा सुभफलभोगी जायते। अशुभेन विपरीतमिति अर्थः

**कर्मलक्षणं उच्यते -**

**पूर्वजन्मार्जितं यच्च कर्म पुंसां शुभाशुभम् ।**
**तदेव सर्व जन्तूनां सृष्टिसंहारकारणम् ।।**

**१.७) ज्योतिश्शस्त्रस्वरूपः -**

बहुप्रकारैः विशेषैः विषयैः विद्यमानं सस्त्रम् ज्योतिः शास्त्रम्। इदं शास्त्रं गणितहोरासंहिताख्येन स्कन्धत्रयेणाधिष्ठितम्। यत्र निश्वशेषेणोपनयः कथनं वर्तते सः संहिता स्कन्धः इति गर्गादिभिः मुनिभिः कथ्यते। अर्थात् गणितहोरादिसर्वविषयाणां विचारः अस्मिन् स्कन्धे भवति। अस्मिन् विषये भगवतः गर्गस्य वचनं यथा -

**गणितं जातकं शाखां यो वेत्ति द्विजपुङ्गवः।**

**त्रिस्कन्धज्ञो विनिर्दिष्टः संहिता पारगश्च सः ॥**

**गणितम् - (तन्त्रम्)** ज्योतिःशास्त्रे आदित्यादीनां ग्रहाणां या गतिः वर्तते सा येन ज्ञायते तत् गणितं तस्यैव तन्त्रमिति संज्ञा।

**होरा - (अङ्गविनिश्चयः)** प्रतिष्ठायत्राविवाहादीनां लग्नग्रहवशेन च जगति शुभाशुभफलं यया निश्चीयते सा होरा तृतीयः स्कन्धः संहिता स्कन्धो भवति।

यथा -

**ज्योतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं**

**तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।**

**स्कन्धेस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ**

**होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोपरः॥**

**१.८) स्कन्धत्रयविचारः -**

भौमादीनां ग्रहाणां प्रतीपगमनं वक्रमित्युच्यते। यथा भौमादीग्रहो मेषस्थो मीनं याति सः प्रतीपगतित्वाद्वक्रित इत्युच्यते। तथा वक्रां गतिं त्याक्त्वा पुनः स्पष्टां गतिमाश्रित अनुवक्रिक इत्युच्यते। तेषामेव ग्रहाणां सूर्यवशेन अस्तमयो भवति। अर्थात् यः कश्चित् चन्द्रादिको ग्रहः सूर्यसमीपवर्ती भवति स च रविकरनिकयभिर्भूतो गगने लोकानामालोकं न याति, तदा अस्तमित इत्युच्यते। तथा च स एव ग्रह आदित्यमण्डलात् यदा विप्रकृष्टो भवति तदा नभसि दृश्यते स चोदित इत्युच्यते। एवंपरस्परं ग्रहाणां युद्धं चन्द्रेण नक्षत्रैश्च मध्यगतिः, तिथिनक्षत्रैश्चः, स्पुटगतिः,

त्रिप्रश्नश्चन्द्रार्कग्रहणे उदयास्तमयौ शृङ्गोन्नतिः, ताराग्रहसंयोगः वक्रानुवक्रास्तसह संमयोगः योदयद्याः इत्येते बहवः विषयाः पञ्चसिद्धान्तिकायां वराहमिहिरेण पूर्वमेव कथिताः। तथा विस्तरेण जातकं यात्राविवाहैः सह होराशास्त्र सम्बन्धं विषयं पूर्वमेव बृहज्जातके, बृहद्यात्रायां विवाहपटले च वराहमिहिरेण विरचितम्।

यथा -

**वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्ताः ।**

**होरागतं विस्तरशश्य जन्म यात्राविवाहैः सह पूर्वमुक्तम् ॥**

अतः इदानीं प्रश्नप्रतिपश्नकथा प्रसङ्गादीनिवाक्यानि निरूपपत्तिकानि गोलविरुद्धान्यसाराणि सन्त्यज्य यत् सारभूतं श्रेष्ठं लोकप्रत्यक्षजननं भूतार्थं सत्यार्थं दृष्टप्रत्ययं सकलैः समग्रैः परिपूर्णैरर्थैरनाकाङ्क्षैः वराहमिहिराचार्येण अस्यां संहितायां प्रवक्ष्यते।

यथा -

**प्रश्नप्रतिप्रश्न कथा प्रसङ्गान् स्वल्पोपयोगान् ग्रहसम्भवांश्च ।**

**सन्त्यज्यफल्गुनि च सारभूतं भूतार्थमर्थैः सकलैः प्रवक्ष्ये ॥**

### १.९) सांवत्सरस्य स्वरूप-गुण -लक्षणविचारः -

**१.९.१). स्वरूपविचारः** - तत्र सांवत्सरोभिजातः प्रियदर्शनो विनीतवेषः सत्यवागनसूयकः समः सुखंहितोपचितगात्रसन्धिः अविकलः चारुकरचरणनखनयन चिबुकदशनश्रवण ललाटभ्रूत्तमाङ्गो वपुष्मान् गम्भीरोदात्तघोषः। प्रायः शरीराकारानुवर्तिनो हि गुणा दोषाश्च भवन्ति।

**१.९.२) गुणविचारः** - तत्र गुणाः शुचिर्दक्षः प्रगल्भो वाग्मी प्रतिभानवान् देशकालवित् सात्विको न पर्षद्भीरुः सहाध्यायिभिरनभिभवनीयः कुशलोऽव्यसनी शान्तिकपौष्टिक आभिचार स्नान विद्याभिज्ञो विबुधार्चनव्रतोपवासनिरतः स्वतन्त्राश्चार्योत्पादितप्रभावः पृष्टाभिधाय्यन्यत्र दैवात्ययाद् ग्रहगणितसंहिताहोराग्रन्थार्थवेत्तेति।

**१.९.३) लक्षणविचारः** - तत्रग्रहगणिते पौलिशरोमकवासिष्ठसौरपैतामहेषु पञ्चस्वेतेषु सिद्धान्तेषु युगवर्षायनर्तुमासपक्षाहोरात्रयाममुहूर्तनाडीप्राणत्रुटित्रिटयाद्यवयवादिकस्य कालस्य क्षेत्रस्य च वेत्ता।

चतुर्णां च मानानां सौरसावननाक्षत्रचान्द्रणामधिमासकावमसम्भवस्य च कारणाभिज्ञः। षष्ट्यब्दयुगवर्षमासदिनहोराधिपतीनां प्रतिपत्तिच्छेदवित्। सौरादीनां च मानानां असदृशसदृशयोग्यायोग्यत्वप्रतिपादनपटुः।

सिद्धान्तभेदेऽप्ययननिवृत्तौ प्रत्यक्षसममण्डललेखासम्प्रयोगाभ्युदितांशकानां छयाजलयन्त्रदृग्गणितसाम्येन प्रतिपादनकुशलः।

सूर्यादीनां च ग्रहाणां शीग्रमन्दयाम्योत्तरनीचोच्चगतिकारणाभिज्ञः। सूर्यचन्द्रमसोश्च ग्रहणे ग्रहणादिमोक्षकालदिक् प्रमाणस्थिति विमर्दवर्णादेशानामनागतग्रहसमागमयुद्धानां आदेष्टा।

प्रत्येकग्रहभ्रमणयोजनकक्ष्याप्रमाणप्रतिविषययोजनपरिच्छेदकुशलः।

भूभगणभ्रमणसंस्थानाद्यक्षावलम्बकाहर्व्यासचरदलकालराश्युदयच्छायानाडीकरणप्रभृतिषु क्षेत्रकालकरणेष्वभिज्ञः।

**१.९.४) तन्त्रज्ञस्य विशेषलक्षणम्** - नानाचोद्यप्रश्नभेदोपलब्धि जनितवाक्सारो निकषसन्तापाभिनिवेशैः कनकस्येवाधिकतरममलीकृतस्य शास्त्रस्य वक्तातन्त्रज्ञो भवति।

**१.९.५) अपण्डितस्य लक्षणविचारः -**

योनरः शास्त्रोपनिबद्धमर्थं नप्रतिपादयति अर्थात् सूत्राक्षराणां योर्थस्तं विहाय असारार्थं प्रतिपादयति तथा केनचित् सन्देहव्युदासार्थपृष्टस्सन् एकमपि प्रश्नं न कथयति तथा च शिष्येभ्यो न पाठयति सः केन प्रकारेण सास्त्रार्थविद् भवति। एवं विधिः नरः मूर्ख इति ज्ञेयः न पण्डितः।

उक्तं च गर्गेण -

**न प्रतिबद्धं गमयति वक्ति न च प्रश्नमेकमपि पृष्टः।**
**निगदति न च शिष्येभ्यो स कथं शास्त्रार्थविज्ज्ञेयः॥**

योनरः ग्रन्थसंस्थितं अर्थं अन्यथा करोति गुणकारभागाहारादिकं गणितं कर्म अन्यथा करोति सोऽबुधः पितामह समीपं गत्वा वैश्यात्वेन नखदशनक्षतसीत्कारादिभिः गुणैः मातरं श्लाघयति।

**ग्रन्थोऽन्यथाऽन्याथार्थकरणं यश्चान्यथा करोत्यबुधः।**

**सपितामहमुपगम्य स्तौति नरो वैशिकेनार्यम् ॥**

**१.१०) ज्योतिषशास्त्रस्य दैवज्ञस्य च प्रशंसा -**

गणितस्कन्धे लग्नकालेषु छायायः संबन्धिन्या अम्बुयन्त्रे अर्थात् घटिकादिविषये तथा होरा स्कन्धे च यस्य सम्यक् ज्ञानं वर्तते तस्य वाक् मुनेरिव सत्या भवति।

यथा हि -

**तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयन्त्रसंविदिते।**

**होरार्थे च सुरूढे नादेष्टुर्भारती वन्ध्या ॥**

दुस्तरमपि समुद्रं मनुष्यः उल्लङ्घयन् वायुरयहेतुना तीरं प्राप्नुयात्। किन्तु कालपुरुषाख्य महार्णवस्य तीरं मनुष्यः स्वप्नेपि नासादयेत्। अनेन ज्योतिःशास्त्रस्य आन्त्यं प्रदर्शितम्।

उक्तं च विष्णुगुप्तेन -

**अप्यार्णवस्य पुरुषः प्रतरन् कदाचि**

**दासादयेदनिलनेगवशेन पारम्।**

**न त्वस्य कालपुरुषाख्यमहार्णवस्य**

**गच्छेत्कदाचिदनृषिर्मनसापि पारम्॥**

**१.११) होराशास्त्रे वक्ष्यमाणाः विषयाः -**

होराशास्त्रेपि च राशिहोराद्रेष्काणनवांशकद्वादशभागत्रिंशद्भागबलाबलपरिग्रहो ग्रहाणां दिक्स्थानकालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृतिधातुद्रव्यजातिचेष्टादि परिग्रहो निषेकजन्मकालविस्मापनप्रत्ययादेशसद्योमरणायुर्दाय दशान्तर्दशाष्टकवर्ग

राजयोगचन्द्रयोगाद्विग्रहादि योगानां नाभसादीनां च योगानां फलान्याश्रयभावावलोकन निर्याणगत्यनूकानि तत्कालप्रश्नशुभाशुभानि मित्राणि विवाहादीनां च कर्मणां करणम्।

**१.११.१) यात्राविचारः -**

यात्रायां तु तिथिदिवसकरणनक्षत्रमुहूर्तविलग्नयोगदेहस्पन्दनस्वप्नविजय स्नान ग्रहयज्ञगणयागाग्नि लिङ्गहस्त्यश्वेङ्गित सेनाप्रवादचेष्टादि ग्रहषाड्गुण्योपाय मङ्गलामङ्गलशकुनसैन्यनिवेशभूमयोऽग्निवर्णामन्त्रिचरदूताटविकानां यथाकालं प्रयोगाः परदुर्गोपलम्भोपायश्चेत्युक्तं च आचार्यैः।

**१.११.२) संहिताविचारः -**

संहितापारगश्च देवचिन्तको भवति। दैवस्य प्राक्तनकर्मविपाकस्य शुभाशुभस्य चिन्तको भवति।

**संहितायां वक्ष्यमाणाः पदार्थाः -**

दिनकरादीनां ग्रहाणां चारास्तेषुच तेषां प्रकृतिविकृति प्रमाणवर्णकिरणद्युति संस्थानास्तमयोदयमार्गमार्गान्तरवक्रानुवक्रर्क्ष ग्रहसमागमचारादिभिः फलानि नक्षत्रकूर्मविभागेन देशेष्वगस्त्यचारः। सप्तर्षिचारः । ग्रहभक्तयोर्नक्षत्रव्यूहग्रहशृङ्गाटकग्रहयुद्ध ग्रहसमागमग्रहवर्षफलगर्भलक्षणरोहिणीस्वात्याषाढीयोगाः सद्योवर्षकुसुम लतापरिधिपरिवेषपरिधपवनोल्कादिग्दाहक्षितिचलनसन्ध्यारागगन्धर्वनगररजो निर्घातार्घकाण्डसस्यजन्मेन्द्रध्वजेन्द्रचापवास्तुविद्याङ्गविद्यावायसविद्यान्तरचक्रमृगचक्राश्वचक्र वातचक्रप्रासादलक्षणप्रतिमालक्षणप्रतिष्ठापनवृक्षायुर्वेदो दगार्गलनीराजन खञ्जनकोत्पात शान्तिमयूरचित्रकधृतकम्बल खड्गपट्टकृकलाकुकूर्मगोऽजाश्वेभपुरुषस्त्रीलक्षणान्यन्तः पुरचिन्तापिटकलक्षणोपानच्छेद वस्त्रेच्छेद चामरदण्डशयनाऽऽसनलक्षणरत्नपरीक्षा दीपलक्षणं दन्तकाष्ठाद्याश्रितानि शुभाऽशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि । न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि। तस्मात् सुभृतेनैव दैवज्ञेनान्येपि तद्विदश्चत्वारः कर्तव्याः। तत्रैकेनैन्द्री चाग्नेयी च दिगवलोकयितव्या। याम्यानैर्ऋतीचान्येनैव वारुणी

वायव्याचोत्तराचैशानी चेति। यस्मादुल्कापातादीनि शीघ्रमपगच्छन्तीति। तस्याश्चाकारवर्णस्नेहप्रमाणादि ग्रहर्क्षोपघातादिभिः फलानि भवन्ति।

**१.१२) ज्योतिषशास्त्रस्य दैवज्ञस्य च आवश्यकतायां विचारः -**

निरवशेषेषु ज्योतिः शास्त्रस्य अङ्गेषु उपाङ्गेषु च कुशलं तथा जातके ग्रहगणिते च नैष्ठिकं दैवज्ञं यो राजा न पूजयते सः विनाशं प्राप्नोति।

**कृत्स्नाङ्गोपाङ्गकुशलं होरागणितनैष्ठिकम्।**

**यो न पूजयते राजा स नाशमुपगच्छति॥**

निरहङ्काराः निष्परिग्रहाः अरण्यं समाश्रिताः तपस्विनोऽपि ग्रहनक्षत्राणां गमने कोविदं शुभाशुभं ज्ञातुं पृच्छन्ति। अत्र एतेषां तापसत्वं अस्तिचेदपि ज्योतिश्शास्त्रस्य आवश्यकता वर्तते एव।

**वनं समास्लिता येपि निर्ममा निष्परिग्रहाः।**

**अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदम्॥**

यथा रात्रिःतमसावृतत्वात् प्रदीपरहिता भवति। यथा सूर्यरहितं आकाशं न शोभामाप्नोति। तथा दैवज्ञरहितो राजा न शोभते। नेत्रहीनोऽध्वनि इव स राजा सर्वत्र संशयत्वाद् भ्रमति।

**अप्रदीपा यथा रात्रिरनादित्यं यथा नभः।**

**तथाऽसांवत्सरो राजा भ्रमत्यन्धइवाध्वनि॥**

यदि दैवज्ञ न स्यात् तदा शिवादिकाः मुहूर्ताः प्रतिपदादि तिथयः, अश्विन्यादि नक्षत्राणि , शिशिरादि ऋतवः,उत्तरदक्षिणे अयने यातानिसर्वाणि अज्ञातानि अथवा नष्टागमानि भवेयुः।

**मुहूर्त तिथिनक्षत्रमृतवश्चायने तथा।**

**सर्वाण्येवाकुलानि स्युर्न स्यात् सांवत्सरो यदि॥**

तस्माद् पूर्वोक्ताद्धेतो जयं कीर्त्तिं भोगान् आरोग्यं च आप्राप्तुमिच्छता राज्ञा प्राधानः पण्डित दैवज्ञः अधिगन्तयः।

**तस्माद्राज्ञाधिगन्तव्यो विद्वान् सांवत्सरोऽग्रणीः।**

**जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता।।**

समृद्धिमिच्छता नरेण दैवज्ञवर्जिते देशे न निवसनीयम्। यतः यस्मिन् देशे चक्षुर्भूतः दैववित् स्यात् तस्मिन् देशे पापमेनो न भवति। तत्पुण्यराशीरावृतत्वात्।

**नासांवत्सरिको देशे वस्तव्यं भूतिमिच्छता।**

**चक्षुर्भूतो हि यत्रैषः पापं तत्र न विद्यते।।**

संवत्सरमधिकृत्य कृतं शास्त्रं सांवत्सरं भवति। तत्पठनशीलः सांवत्सरपाठी भवति। स एव दैववित् भवति। सः दैववित् नरकान् न प्राप्नोति। यतः दैवचिन्तक कालवित् भवति। सः ब्रह्मलोके स्थितिं लभते ।

**न सांवत्सरपाठी च नरकेषूपपद्यते।**

**ब्रह्मलोक प्रतिष्ठां च लभते दैवचिन्तकः।।**

एतत् ज्योतिः शास्त्रं निरवशेषं ग्रन्थतः अर्थतश्च यो ब्राह्मणः वेत्ति सः पितृतर्पणे प्रथमभोजी भवति। स च पूजितो भवति। सः यस्यां पङ्क्त्यामुपविशति तां पवित्रीं करोति।

**ग्रन्थतशचार्थतश्चैतत्कृत्स्नं जानाति यो द्विजः।**

**अग्रभुक् स भवेच्छाद्धे पूजितः पङ्क्तिपावनः।।**

यवनाः किल म्लेच्छजातयः। तेषु यवनेषु इदं ज्योतिःशास्त्रं स्फुटतरं स्थितम्। पूर्वाचार्येभ्यः तैः प्राप्तम्। तेऽपि मुनिवत् अभ्यर्च्यन्ते। किं पुनर्यो द्विजो दैवज्ञ इति।

**म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्**

**ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद् द्विजः।**

कुरकावेशपिहितैरर्थात् इन्द्रजालेन देवतादिदेहप्रवेशेन अदृश्यशरीरेण तथैव कर्णोपरश्रुति हेतुभिरर्थात् कुत्रचित् भीत्यादिके अभ्यन्तरस्थितया अव्यक्ता भाषणैः (तथैव कश्चित् मन्त्र विशेषं कर्णे जपतः यथेष्टं कथयति लोके कर्णपिशाचिकेति प्रसिद्धा वर्तते) एवमादिभिः यः कृतादेशो भवति सः सर्वत्र न प्रष्टव्यो यतः सः न दैवज्ञो भवति।

**कुहकावेशपिहितैः कर्णोपश्रुतिहेतुभिः।**

**कृतादेशो न सर्वत्र प्रष्टव्यो न स दैववित् ॥**

यः शास्त्रं अज्ञात्वैव ज्यौतिषिकत्वं अङ्गीकरोति सः पङ्क्तिं अपवित्रीकरोति। सः पापात्मा नक्षत्रपिशुनश्चेति ज्ञातव्यः।

**अविदित्वैव यच्छास्त्रं दैवज्ञत्वं प्रपद्यते।**

**स पङ्क्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः।।**

नगरद्वारे कया कामिन्या हे लोष्ट यदि मम पुत्रो भविष्यति तर्हि त्वां पूजयिष्यामीति प्रार्थना कृता। प्रार्थनानन्तरं दैववशात् पुत्रो जातः। परन्तु लोष्टदत्तो मत्पुत्रोयमिति तस्या ज्ञानमसत्। एवमज्ञानमपि वाक् कदाचित् सत्यरूपेवाऽभातीति भावः। नगरद्वारे यो लोष्टः तस्योपयाचितं यथा सत्यरूपं भवेत् तथा कदाचित् काकतालन्यायेन मूर्खाणां यत् कथनं तत् सत्यमिव प्रतिभाति।

**नगरद्वारलोष्टस्य यद्वत्स्यादुपयाचितम्।**

**आदेशस्तद्वदज्ञानां यः सत्यं स विभाव्यते।।**

यः अर्थदानेनयोजितआदेशः ज्योतिः शास्त्रवर्जितकथा प्रियः, शास्त्रे एकं प्रकरणं ज्ञात्वा तेनैव स दर्पो भवति सः राज्ञा त्याज्यः।

**सम्पत्या योजितादेशस्तद्विच्छिन्न कथाप्रियः।**

**मत्तः शास्त्रैकदेशेन त्याज्यस्तदङ्गहीक्षिता।।**

यः स्फुटतराः होरागणितसंहिताः अर्थात् त्रिस्कन्धं ज्योतिः शास्त्रं विजानाति सः विजयमाकाङ्क्षता राज्ञा सम्पूज्यः।

**यस्तु सम्यग्विजानाति होरागणित संहिताः।**

**अभ्यर्च्यः स नरेन्द्रेण स्वीकर्तव्यो जयैषिणा।।**

यथा देशकालज्ञो दैवचिन्तकः एक एव राज्ञे अधिकं उपकारभूतं कार्यं करोति। तादृशं कार्यं राज्ञे हस्तिनां सहस्त्रमपि न करोति चतुस्सहस्त्रैश्चाश्वैः न सिध्यति ।

**न तत्सहस्त्रं करिणां वाजिनां च चतुर्गुणम्।**

**करोति देशकालज्ञो यथैको दैवचिन्तकः।।**

सबलस्य राज्ञः आत्मीयकीर्तिवृद्ध्यर्थं यथा दैवज्ञः श्रेय आकाङ्क्षते तथा राज्ञः पिता माता बन्धुजनः सुहृद्वा हितं न इच्छति।

**न तथेच्छति भूपतेः पिता जननी वा स्वजनोऽथवा सुहृत्।**

**स्वयशोऽभिवृद्धये यथा हितमाप्तः सबलस्य दैववित्।।**

**१.१३) तिथिनक्षत्रश्रवणफलविचारः -**

दुष्टस्वप्नानि, दुष्टचिन्तनानि, अमङ्गलदृश्यान्, दुष्टानि कर्माणि एतानि सर्वाणि चन्द्रमसः नक्षत्रेण सह संवादं श्रुत्वा (तिथिनक्षत्रश्रवणेनैव) आश्वेव क्षयं व्रजन्ति।

**दुःस्वप्नदुर्विचिन्तितदुष्प्रेक्षित दुष्कृतानि कर्माणि।**

**क्षिप्रं प्रयान्ति नाशं शशिनः शृत्वा भसंवादम्।।**

# १.१४) प्रश्नावली

**१. संक्षेपेण लिखत** **५*६= ३०**

१. बृहत्संहितायाः मङ्गलाचरणश्लोकस्य अर्थः कः?
२. वराहमिहिरमते संक्षिप्तस्य ग्रन्थस्य प्रयोजनं किं ?
३. ज्योतिश्शास्त्रस्य स्वरूपं संक्षेपेण लिखत ?
४. तन्त्रज्ञस्य लक्षणं किम्?
५. यात्रायां चिन्तनीया अंशाः के?
६. तिथिनक्षत्रश्रवणफलानि कानि?

**२. विस्तारेण उत्तरं लिखत** **१०*५=५०**

१. ज्योतिश्शास्त्रस्य स्वरूपं विचरयत?
२. स्कन्धत्रय विचारं विस्तरेण कुरुत?
३. अपण्डितस्य लक्षणानि कानि इति चर्चयत?
४. ज्योतिषशास्त्रस्य दैवज्ञस्य च प्रशंशान् विवेचयत?
५. होराशास्त्रे वक्ष्यमाणाविषयान् आविष्कुरुत?

**३. व्याख्यात** **२०*५=१००**

१. वराहमिहिरमते मुनिकृतानिां मनुष्यकृतानां च भेदः कः? इति व्याख्यात?
२. जगतउत्पत्तिहेतवः के इति प्रदर्श्य अस्मिन् विषये पक्षन्तराणि चर्चयत?
३. संवत्सरस्य स्वरूपगुण लक्षणाणि विस्तरेण लिखत?
४. संहितायाः वैशिष्ट्यं वराहमिहिरमतानुसारं प्रतिपादयत?
५. ज्योतिषशास्त्रस्य दैवज्ञस्य च आवश्यकतां सोदाहरणं निरूपयत?

# संरचना

२.) द्वितीयोऽध्यायः

२.१) अवतरणिका

२.२) उद्धेश्यानि

२.३) अयनविचारः

२.३.१) वराहमिहिरस्यमते अयनविचारः

२.३.२) अधिकतायां शुभफलविचारः

२.४) अर्कमण्डलगतानां तामसकीलकानां फलविचारः

२.४.१) तेषां शुभाशुभलक्षणविचारः

२.४.२) तेषां उदयनिमित्तानि

२.४.३) तेषां उत्पातानां निष्फलविचारः

२.४.४) तामसकीलकानां दर्शनवशात् फलविचारः

२.४.५) तामसकीलकानां आकृतिवशात् फलविचारः

२.५) अर्करश्मिवशात् शुभाशुभफलविचारः

२.६) अर्कस्य ऋतुवर्णलक्षणफलविचारः

२.७) अर्कस्य सन्ध्याकाले शुभाशुभलक्षणफलविचारः

२.८) प्रतिसूर्य लक्षणफलविचारः

२.९) प्रश्नावली

# २. द्वितीयोऽध्यायः

## २.१) अवतरणिका

समस्तजगतः शुभाशुभफलविषयान् ज्ञातुं बहवः मार्गाः सन्ति तेष्वन्यतमः ग्रहचारो भवति। ग्रहाणां चारवशात् कदावृष्टिर्भवति, कदा उपद्रवो भवति, कदा भूकम्पादयो भवन्ति इत्येवं कस्मिन् देशे अरिष्टादयो वा शुभफलानि वा कदा कथं भवन्ति इत्यपि ज्ञातुं शक्यते। प्रत्येकं ग्रहस्य तथैव अगस्त्यस्य सप्तर्षीणां ज्योतिर्मयस्वरूपाणां चारवशात् एतत् सर्वं पृथक् पृथक् ज्ञातुं शक्यते। अस्मिन्नध्याये रविचारवशात् कथं कीदृशं फलं भवति इति प्रदर्श्यते।

# २.२ उद्धेश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* अयनविचारं कर्तुं समर्थो भवति

* वराहमिहिरस्य मते अयनविचारः कथं कृत इति प्रतिपादयितुं शक्नोति।

* अर्कमण्डलगतानां तामसकीलकानां फलविचारं कर्तुं समर्थो भवति

* अर्करश्मिवशात् शुभाशुभफलविचारं कर्तुं शक्नोति

* अर्कस्य ऋतुवर्णलक्षणफलविचारः ग्रन्थे कथमस्तीति चर्चयितुं शक्नोति।

* अर्कस्य सन्ध्याकाले शुभाशुभलक्षणफलानि आविष्कर्तुं समर्थो भवति

* प्रतिसूर्यलक्षणफलविचारः वराहमिहिरेण कथं कृत इति विवेचयितुं समर्थो भवति ।

## २.३) अयनविचारः -

आदित्यः आश्लेषानक्षत्रस्य अन्त्यपादद्वयात् यदा चरति तदा दक्षिणायनं आरभ्यते तथा धनिष्ठानक्षत्रस्य प्रारम्भात् उत्तरायनं इति पूर्वशास्त्रेषु उक्तम्। अयं विषयः नूनं कदाचित् उत्पातवाशादासीत् येन पूर्वशास्त्रेषु पराशरादिषु कथितम्।

यथा

**आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम्।**

**नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु।।**

### २.३.१) वराहमिहिरस्यमते अयनविचारः -

सूर्यचारवशात् संवत्सरे अयनद्वयं भवति। कुलीरौ प्रविष्टात् सूर्यगमनादारभ्य षण्मासाः यावत् अर्थात् धनूराशेरन्तिमभाग पर्यन्तं एकं अयनं भवति। तथैव मकर राशौ प्रविष्टात् सूर्यगमनात् आरभ्य षण्मासाः यावत् अर्थात् मिथुनराशेः अन्तिमभागपर्यन्तं यावत् कालो भवति तावत् पर्यन्तं द्वितीयमयनं भवति। यदि उक्तविषयस्य अभावः स्यात् विकृतिः भवति। तत्र प्रत्यक्ष परीक्षणैः स्पष्टता भवति।

यथा -

**साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत्।**

**उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः।।**

दूरस्थचिह्नवेधात् आदित्यस्य चलनम् उदयकाले अन्वेष्यम्। यतः मकरादौस्थितः आदित्यः प्रतिदिनं उत्तरदिशियाति। तथा कर्काटकराशौ स्थित आदित्य उदयात् प्रतिदिनं दक्षिणदिशिं याति। अतः मकरसङ्क्रमणात् उत्तरायनं भवति। कर्काटक सङ्क्रमणात् दक्षिणायनं भवति। तेन दूरस्थितं वृक्षादिकं उदयास्तमयसमये आदित्यस्य चिह्नं कृत्वा द्वितीयेऽपि दिने तत्रैव स्थित्वा पुनरपि विचारः कार्यः। किमयनचलननिवृत्तिः जाता वा न वा इति।

यथा -

**दुरस्थचिह्नवेधादुदयेऽ स्तमयेपि वा सहस्रांशोः।**

**छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति।।**

**विकृतफलविचारः -**

आदित्यः मकरराशिरप्राप्य यदि व्यावृत्तो भवति तदा पश्चिमया सह दक्षिणदिशिं हन्ति अर्थात् तस्यां दिशि स्थितान् जनान् नाशयति। तथा कुलीरमप्राप्य यदि निवृत्तो भवति चेत् उदीचीं दिशं सपूर्वां च हन्ति अर्थात् तस्मिन् दिशि जनान् नाशयति।

**अप्राप्य मकरमर्को विनिवृत्तो हन्ति सापरां याम्याम्।**

**कर्कटकमसंप्राप्तो विनिवृत्तश्चोत्तरां सैन्द्रीम्।।**

**२.३.२) अधिकतायां शुभफलविचारः -**

आदित्यः मकरं प्राप्य पश्चात् यदि निवर्तितो भवति तदा क्षेमः सस्यवृद्धिकरो भवति। अर्थात् लब्धपालनं करोति तथैव दक्षिणायनेपि एवं ज्ञेयम्। तथा सस्वभावस्थः एवं क्षेमसस्यवृद्धिकृत् भवति। स्फुटगणितेन यस्मिन् दिने अयननिवृत्तिः ज्ञाता तस्मिन्नेव दिने यदि छाया प्रवेशनिर्गमचिह्नैः महति मण्डले दृश्यते तदा प्रकृतिस्थः भवति।

यथा

**उत्तरमयनमतीत्यव्यावृत्तेः क्षेमसस्यवृदिकरः।**

**प्रकृतिस्थश्चाप्येवं विकृतगतिर्भयकृदुष्णांशुः।।**

**२.४) अर्कमण्डलगतानां तामसकीलकानां फलविचारः -**

राहुसुताः स्वर्भानुपुत्राः त्रयस्त्रिंशत् केतवः तामसकीलकससञ्ज्ञाः सन्ति। ते अर्कमण्डले श्वेतादिवर्णैः स्थानैः ध्वक्षादि आकृतिभिः उद्भवन्ति। तेषां वर्णस्थानाकारान् स्पष्टं दृष्ट्वा जनपदे शुभाशुभफलं वदेत्।

यथा

**तामसकीलकसञ्ज्ञाराहुसुताः केतवस्त्रयस्त्रिंशत्।**

**वर्णस्थानाकारैस्तान् दृष्ट्वार्के फलं ब्रूयात्।।**

### २.४.१) तेषां शुभाशुभलक्षणविचारः -

ते तामसकीलकाः सूर्यबिम्बे गताः दुष्टफलप्रदाः भवन्ति। चन्द्रमण्डले गताः शुभफलप्रदाः भवन्ति। तेषु काकछिन्नशिरखड्गादिआकृतयः चन्द्रमण्डलेऽपि पापफलप्रदाः भवन्ति। अशुभफलदान् वर्जयित्वा अन्येसर्वेरूपाः चन्द्रमण्डले शुभफलप्रदाः भवन्ति। चन्द्रमण्डले ये शुभाः ते अर्कमण्डले अतीव अशुभदाः भवन्ति।

यथा -

**ते चार्कमण्डलगताः पापफलाश्चन्द्रमण्डले सौम्याः।**

**ध्वांक्षकबन्धप्रहरणरूपाः पापाःशशाङ्केऽपि।।**

### २.४.२) तेषां उदयनिमित्तानि -

तेषां तामसकीलकानां उदये एतानि रूपाणि दृश्यन्ते। निमित्तं विना पानीयं कलुषं भवति। आकाशः रजसा व्याप्तो भवति। मारुतः परुषः वाति अर्थात् पर्वतानां वृक्षाणां शिखराणि आसमन्तात् मर्दयति। वृक्षाः ऋतुविपरीताः भवन्ति। अर्थात् सहजऋतौ फलानां कुसुमानां अभावः भवति। अनृतौ कुसुमानि फलानि उत्पाद्यन्ति। तथा अरण्यपशवः पक्षिणः च सूर्याभिमुखदीप्तस्थाः भवन्ति। दिग्दाहाश्च सकृद् दृश्यन्ते

यथा -

**तेषामुदये रूपाण्येभ्यः कलुषं रजोवृत्तं व्योम**

**नगतरुशिखरामर्दी सशर्करो मारुतश्चण्डः**

**ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहाः**

**निर्घातमहीकम्पादयो भवन्त्यत्र चोत्पाताः।।**

### २.४.३) तेषां उत्पातानां निष्फलविचारः -

पानीयकलुषादीनामुत्पातानां पृथक् पृथक् फलानि न भवन्ति। तदा केतोः राहोश्च तामसकीलकानां दर्शनानि भवन्ति। अर्कचन्द्रयोः अन्यतरस्य ग्रहणं भवति। सप्ताहान्तरदर्शने उत्पाताः निष्पालाः भवन्ति इति ज्ञेयाः। यतः एते उत्पाताः तामसकीलकानां उदय सूचकाः भवन्ति। पानीयकलुषादिभिः उत्पातैः केत्वादीनां

उदयः वक्तव्यः। कदाचित् केत्वादीनां दर्शनं न भवति तदानीं पानीयकलुषादीनामेव फलं वदेत्।

यथा -

**न पृथक् फलानि तेषां शिखिकीलकराहुदर्शनानियदि।**

**तदुयकारणमेषां केत्वादीनां फलं ब्रूयात्।**

### २.४.४) तामसकीलकानां दर्शनवशात् फलविचारः -

यस्मिन् देशे ते अर्कमण्डलगताः तामसकीलकाः भवन्ति। तस्मिन् देशे महीपतीनां दुःखं भवति इति ज्ञातव्यः। ऋषयोऽपि त्यक्तधर्मसञ्चरिताः भूत्वा दुर्बलहस्ताः भूत्वा कृच्छ्रेण परदेशं यान्ति। तथा साधु जनाः तस्करैः च्छिन्नवित्ताः च भवन्ति। तथा श्वसनैस्संकुचिताः भूत्वा नेत्राच्छादनैः अन्यवसादंगतशरीरैः ( सन्नशरीरैः) दुःखेन अश्रुचक्षुषः तिष्ठन्ति। तस्मिन् देशे जनाः कृशाः भूत्वा स्वनृपतिना अन्यदेशेन च पीडिताः भवन्ति। मेघाः गर्भलक्षणयुक्त अपि वृष्टिप्राप्तसमयेप्रभूतं जलं न वर्षन्ति। तथा नद्यस्तु स्वल्पजलेन यान्ति। तथा धान्यादिकं क्वचित् क्वचित् उत्पद्यते।

### २.४.५) तामसकीलकानां आकृतिवशात् फलविचारः -

सूर्यमण्डले दण्डाकारचिह्ने भवति चेत् राज्ञः मृत्युः स्यात्। कबन्धेचिह्ने अर्थात् कबन्धसंस्थाने अर्के रोगभयं वदेत्। अर्के ध्वांक्षाकारे (काकआकारे) भवति चेत् चोरभयं वदेत्। कीलकाकारे भवति चेत् दुर्भिक्षं भवेत्।

यथा -

**दण्डे नरेन्द्रमृत्युर्व्याधिभयं स्यात् कबन्धसंस्थाने।**

**ध्वाङ्क्षे च तस्करभयं दुर्भिक्षं कीलकेऽर्कस्थे।।**

राजोपकरणरूपेण यदि अर्कः विद्धो भवति चेत् अर्थात् छत्रध्वजचामरादिभिः आकारैः सूर्यः विद्धः चेत् अत्र आदिग्रहणात् भृङ्गारकुम्भकारैः यदि अर्कः विद्धः भवति चेत् तदा अन्यः राजा भवतीत्यर्थः। अथ स्फुल्लिङ्गैः धूमैः युक्तः अर्कः जनान् हन्ति।

अर्कस्थ एकः वेधः दुर्भिक्षं करोति। द्वौत्रयश्चत्वाराः वेधाः राज्ञः विनाशाय भवेयुः। आदित्यः तैश्चिह्नैः सितरक्तपीतकृष्णैः विद्धो भवति चेत् द्विजादीन् वर्णान् हन्ति।

श्वेतवर्णैः चिह्नैः विद्धः ब्राह्मणान् हन्ति रक्तवर्णैश्चिह्नै विद्धः क्षत्रियान् हन्ति। पीतवर्णैश्चिह्नैः विद्धः वैश्यान् हन्ति। कृष्णवर्णैः विद्धः शूद्रान् हन्ति। ते महोत्पाताः ध्वाक्षप्रभृतयः रविबिम्बे उत्पन्नाः यस्यां दिशि दृश्यन्ते तस्यां दिशि जनानां भयमायान्ति। अर्थात् पूर्वस्यां दक्षिणस्यां पश्चिमायां उत्तरस्यां वा विदिक्षुवा यदि दृश्यन्ते तर्हि तथा तस्यां दिशि भवति।

## २.५) अर्करश्मिवशात् शुभाशुभफलविचारः -

यदा आदित्य ऊर्ध्वरश्मिकरः दृश्यते अर्थात् आदित्यस्य अधोभागे रश्मयः यदा न दृश्यन्ते काम्रवर्णश्च भवति चेत् तदा सेनापतिं विनाशयति। ऊर्ध्वकरः रश्मिः पीतवर्णः यदा भवति तदा नृपसुतं मारयति। ऊर्ध्वकरः रश्मिः श्वेतवर्णः यदा भवति तदा पुरोहितं मारयति। आदित्यस्य ऊर्ध्वस्थितः रश्मिः चित्रवर्णो वा धूम्रवर्णो वा भवति चेत् चोरसंग्रामोपमर्दनैः व्याकुलं भवति। अपि च शीघ्रं जलं न पातयति अर्थात् न वर्षति।

यथा -

**ऊर्ध्वकरो दिवसकरस्ताम्रः सेनापतिं विनाशयति**

**पीतोनरेन्द्रपुत्रं श्वेतस्तु पुरोहितं हन्ति।**

**चित्रोऽथवापि धूम्रो रविरश्मिर्व्याकुलं करोत्यूर्ध्वम्।**

**तस्करशस्त्रनिपातैर्यदि सलिलं नाशु पातयति।**

## २.६) अर्कस्य ऋतुवर्णलक्षणफलविचारः -

शिशिरऋतौ (माघफाल्गुणयोः) आदित्यः ताम्रवर्णे वा कपिल वर्णे वा भवति चेत् शस्तो भवति। शुभफलद इत्यर्थः। वसन्तऋतौ ( चैत्रवैशाखयोः ) आदित्यः कुङ्कुम वर्णो वा पीतलोहितवर्णोवा भवति चेदपि शस्त एव । ग्रीष्मऋतौ (ज्येष्ठ-आषाढयोः) आदित्यः पाण्डुरवर्णोवा कनकवर्णो वा भवति चेदपि शस्त एव। वर्षऋतौ (श्रावण भाद्रपदयोः) आदित्यः श्वेतवर्णः भवति चेत् शस्त एव। शरद्ऋतौ

(आश्वयुजकार्तिकयोः) आदित्यः पद्मोदरसदृशकान्तिः भवति चेत् अपि शस्त एव। हेमन्तऋतौ (मार्गशीर्षपुष्ययोः) आदित्यः रक्तवर्णः भवति चेदपि शस्त एव। वर्षसमये स्निग्धोऽपि च सर्वेषां शिशिरादीनां ऋतूनां ये वर्णा उक्तास्तेषां निभोऽपि शुभप्रदः एव भवति।

यथा -

**ताम्रः कपिलोवार्कः शिशिरे हरिकुङ्कुमच्छविश्चमधौ।**

**आपाण्डुकनकवर्णो ग्रीष्मे वर्षासु शुक्लश्च।**

**शरदिकमलोदराभो हेमन्ते रुधिरसन्निभः शस्तः।**

**प्रावृट्काले स्निग्धः सर्वर्त्तु निभोऽपि शुभदायी।**

ग्रीष्मऋतौ आदित्यः लोहितवर्णे दृष्टो भवति चेत् भयं करोति। वर्षऋतौ आदित्यः अशितवर्णः वृष्टिभयं करोति। हेमन्तऋतौ पीतवर्ण आदित्यः शीघ्रमेव रोगभीतिं करोति। शेषर्त्तुषु न विशेषः। पूर्वोक्तमेव शुभाशुभमिति।

यथा -

**ग्रीष्मे रक्तो भयकृद्वर्षास्वसितः करोत्यनावृष्टिम्।**

**हेमन्तेपीतोर्कः करोति न चिरेण रोगभयम्।**

सहस्रांशुरादित्यः इन्द्रधनुस्तुल्येन चिह्नेन विदारितामूर्तिः भवति चेत् राज्ञः विरोधप्रदो भवति अशुभश्च इत्यर्थः। वर्षसमये निर्मलकान्तिः अस्तिचेत् सद्यः तस्मिन्नेव अहनि वृष्टिं करोति इत्यर्थः वर्षाकाले शिरीषपुष्पकान्तिसदृशो भवति चेत् सद्यः वृष्टिं करोति। मयूरचन्द्रिकाकारश्च भवति चेत् द्वादशवर्षाणि न वर्षयतीत्यर्थः।

श्यामवर्णे सूर्यः अस्तिचेत् सस्यानां कृमिभीतिर्भवति। भस्मवर्णे रूक्षे अस्तिचेत् अन्यनृपात् भीतिर्भवति। आदित्यः यस्मिन् नक्षत्रे सच्छिद्रो भवति तन्नक्षत्रं तस्य राज्ञःकूर्मविभागेन वनाशो भवति।

यथा -

**श्यामेऽर्के कीटभयं भस्मनिभे भयमुशान्ति परचक्रात्।**

**यस्यार्क्षे सच्छिद्रस्तस्य विनाशः क्षितीशस्य।**

शशलोहितवर्णः आदित्यः नभस्तलस्थे मध्यह्ने अस्तिचेत् युद्धानि भवन्ति। चन्द्रनिभेव विरश्मिः आत्यिः भवति चेत् राज्ञः मरणं भवति। आश्वेवान्यो राजा भवति।

घटाकार अर्कः दुर्भिक्षं मारकं च करोति। एकदेशाद्धीनो जनान् हन्ति। विगतरश्मिः भीतिं ददाति। तोरणाकारः नगराणि हन्ति। आतपत्राकारः जनपदस्य नाशं करोति। आदित्यः पातकरूपो वा धनूरूपो वा भवति चेत् सङ्ग्रामाः भवन्ति। कम्पमानः रूक्षोवा (अस्निग्धः) भवति चेदपि युद्धान्येव भवन्ति। आदित्ये कृष्णवर्णरेखा यदि मध्ये दृश्यते चेत् तदा राज्ञः सचिवस्य च मरणं भवति। आदित्यं उदयरेखास्थं वा अपररेखास्थं वा उल्का अशनिविद्युद्वा आसां फलं उच्यते तस्निन् काले नरपतेः मरणं द्वितीयस्य राज्ञः प्रतिष्ठा च तत्क्षणमेव भवति इति

यथा -

**दिनकरमुदयास्तसंस्थितमुल्काशनि विद्युतो यदा हन्यः।**

**नरपति मरणं विन्द्यात्तदान्यराजप्रतिष्ठां च**

सूर्यः उष्णरश्मिः परतिदिवसं मण्डलवान् भवति चेत् अथवा उदयास्तमयोः मण्डलवान् भवति चेत् अथवा रक्तवर्णे अस्तं गच्छति चेत् अथवा रक्तवर्णे उदेति चेत् तदा द्वितीयं भूपं करोति। अत्र यादृश लोहितवर्ण उक्तः  तादृश एव सकलमहर्भूत्वा रक्तवर्ण एव अस्तमेति। प्रतिदिवसं सर्वत्र संबध्यते तदा तस्निन् प्रकारत्रये द्वितीयं भूपं करोति।

यथा -

**प्रतिदिवसमहिमकिरणः परिवेषी सन्धयोर्द्वयोरथवा।**

**रक्तोऽस्तमेति रक्तोदितश्च भूीपं करोत्यन्यम्।**

## २.७) अर्कस्य सन्ध्याकाले शुभाशुभलक्षणफलविचारः -

सन्ध्याकाले आयुधाकृतिभिः सदृशैमेघैः उदयास्तमयकाले आच्छादितः सूर्यः सङ्ग्रमकृत् भवति। मृग - महिष - पक्षी - गर्दभ - उष्ट्र सदृशैः मेघैः उदयास्तमयकाले

आच्छादित आदित्यः भीतिं ददाति।

यथा -

**प्रहरणसदृशैर्जलदैः स्थगितः सन्ध्याद्वयेपि रणकारी।**

**मृगमहिषविहगखरकरभसदृशरूपैश्च भयदीया।।**

## २.८)प्रतिसूर्य लक्षणफलविचारः -

उदायात् प्रभृति यावत् तनुघनः अर्कसमीपे यदा भवति तदा अर्करश्मि वशात् तत्र अर्कः द्वितीय इव लक्ष्यते। स एव प्रतिसूर्यः इत्युच्यते।

सः प्रतिसूर्यः एवं अस्तमयेऽपि सम्भवति। आदित्यस्य उत्तरे यदा प्रतिसूर्यः दृश्यते तदा वृष्टिर्भवति। दक्षिणस्थो अर्कः वातकरो भवति। उभयस्थोऽर्थात् उत्तरदक्षिण भागयोऽपि स्थितोऽर्कः जलभीतिं करोति। तस्यैव अर्कस्योपरि स्थितः प्रतिसूर्यः राजानं घातयति। अधः स्थितः प्रतिसूर्यः जनान् हन्ति।

यथा -

**दिवसकृतः प्रतिसूर्योजलकृदुदग् दक्षिणे स्थितोनिलकृत्।**

**उभयस्थः सलिलभयं नृपमुपरि निहन्त्यधो जनाहा।**

अदित्यः आकाशे अकस्मादेव रक्तवर्णः यदा दृश्यते तदा शीघ्रमेव राज्ञोऽन्तकरो भवति। वियत् ग्रहणउदयास्तमयौ विहाय अन्यत्र रूक्षेण रजसा अरुणीकृत तनुः यदि दृश्यते चेत् अपि शीघ्रमेव राज्ञः अन्तकरो भवति। कृष्णवर्ण नानावर्णः नीलवर्णः रूक्षश्च अर्कः जनानां घातं करोति। पक्षिणः मृगाः उदये अस्तमये च भीषणस्वरयुताः यदा भवन्ति तदा अपि जनघातं भवति।

यथा -

**रुधिरनिभो वियत्यवनिपान्तकरो न चिरात्।**

**परुषरजोऽरुणीकृततनुर्यदि वा दिनकृत्।**

**असितविचित्रनीलपरुषो जनघातकरः।**

**खगमृगभैरवस्वररुतैश्च निशाद्युमुखे।**

निर्मलशरीरः स्पष्टबिम्बः स्पष्ट विपुलामलदीर्घकान्तिः अविकृतमूर्तिः अविकृतवर्णः अविकृतचिह्नः दिवाकरः जनानां श्रेयः करोति।

यथा -

अमलवपुरवक्रमण्डलः स्फुटविपुलामलदीर्घदीधितिः।
अविकृततनुवर्णचिह्नभृज्ञ्गगति करोति शिवं दिवाकरः।।

# २.९) प्रश्नावली

**१. संक्षेपेण लिखत** **५*२=१०**

१. अयनं नाम किं ? तानि कानि ?

२. अर्कस्य सन्ध्याकाले शुभाशुभ लक्षणानि कानि ?

**२. विस्तरेण उत्तरं लिखत** **१०*४=४०**

१. वराहमिहिरमते एयनविचारं कुरुत ?

२. अर्कमण्डलगतानां तामसकीलकानां फलानि विचारयत ?

३. अर्करश्मिवशात् शुभाशुभफलानि चर्चयत?

४. तामसकीलकानां आकृतिवशात् फलानि विचारयत ?

**३. व्याख्यात** **२०*४=८०**

१. वराहमिहिरमते अयनयोर्लक्षणानि फलानि च विचारयत ?

२. तामसकीलकानां लक्षणानि तेषां उदयनिमित्तानि दर्शनवशात् फलानि च विवेचयत?

३. अर्कस्य ऋतुवर्णलक्षणानि फलानि च आविष्कुरुत ?

४. प्रतिसूर्यस्य लक्षणानि फलानि च प्रतिपादयत ?

# संरचना

| | |
|---|---|
| ३ | तृतीयोऽध्यायः |
| ३.१ | अवतरणिक |
| ३.२) | उद्देश्यानि |
| ३.३) | चन्द्रगोलेशुक्लवृद्धिविचारः |
| ३.४) | नक्षत्रेषु चन्द्रस्य गमनेन शुभाशुभफलविचारः |
| ३.५) | चन्द्रस्य नक्षत्रयोगफलविचारः |
| ३.६) | चन्द्रस्य संस्थानवशात् फलविचारः |
| ३.६.१) | नौसंस्थानस्य लक्षणं फलं च |
| ३.६.२) | लाङ्गलसंस्थानस्य लक्षणं फलं च |
| ३.६.३) | दुष्टलाङ्गल संस्थानस्य लक्षणं फलं च |
| ३.६.४) | समदण्डसंस्थानस्य लक्षणं फलं च |
| ३.६.५) | दण्डसंस्थानस्य लक्षणं फलं च |
| ३.६.६) | कार्मुकसंस्थानस्य लक्षणं फलं च |
| ३.६.७) | युगसंस्थानस्य लक्षणं फलं च |
| ३.६.८) | पार्श्वशायिसंस्थानस्य लक्षणं फलं च |
| ३.६.९) | आवर्जितसंस्थानस्य लक्षणं फलं च |
| ३.६.१०) | कुण्डाख्यसंस्थानस्य लक्षणं फलं च |
| ३.६.११) | संस्थानानाम् सामान्यलक्षणफलविचारः |
| ३.६.१२) | चन्द्ररूपाणि तेषां फलविचारः |

३.७)　चन्द्रस्यवर्णलक्षणफलविचारः

३.८)　चन्द्रस्य पक्षवृद्धौ वा हानौ वा साम्ये शुभाशुभफलविचारः

३.९)　चन्द्रस्य कुजादिभिः ताराग्रहैः शृङ्गभिन्ने फलविचारः

३.९.१)　शुक्रभिन्नबिम्बस्य फलविचारः

३.९.२)　जीवभिन्नबिम्बस्य फलविचारः

३.९.३)　भौमभिन्नस्य बिम्बस्य फलविचारः

३.९.४)　शनैश्चरभिन्नस्य बिम्बस्य फलविचारः

३.९.५)　बुधभिन्नस्य बिम्बस्य फलविचारः

३.९.६)　केतुभिन्नस्य बिम्बस्य फलविचारः

३.१०)　प्रश्नावली

# ३ तृतीयोऽध्यायः

## ३.१ अवतरणिका

समस्तजगतः शुभाशुभफलविषयान् ज्ञातुं बहवः मार्गाः सन्ति तेष्वन्यतमः ग्रहचारो भवति। ग्रहाणां चारवशात् कदावृष्टिर्भवति, कदा उपद्रवो भवति, कदा भूकम्पादयो भवन्ति इत्येवं कस्मिन् देशे अरिष्टादयो वा शुभफलानि वा कदा कथं भवन्ति इत्यपि ज्ञातुं शक्यते। प्रत्येकं ग्रहस्य तथैव अगस्त्यस्य सप्तर्षीणां ज्योतिर्मयस्वरूपाणां चारवशात् एतत् सर्वं पृथक् पृथक् ज्ञातुं शक्यते। अस्मिन्नध्याये चन्द्रचारवशात् कथं कीदृशं फलं भवति इति प्रदर्श्यते।

# ३.२) उद्देश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* चन्द्रगोले शुक्लवृद्धिविचारं कर्तुं समर्थो भवति।
* नक्षत्रेषु चन्द्रस्य गमनेन शुभाशुभफलानि विचारयितुं समर्थो भवति।
* चन्द्रस्य नक्षत्रयोगफलानि प्रकटयितुं शक्नोति।
* चन्द्रस्य संस्थानवशात् फलविचारं तथा संस्थानानां सामान्यलक्षणफलविचारं च कर्तुं समर्थो भवति।
* चन्द्ररूपाणि तेषां फलविचारः तथा चन्द्रस्य वर्णलक्षणफलविचारश्च वराहमिहिरेण कथं कृत इति वक्तुं शक्नोति।
* चन्द्रस्य पक्षवृद्धौ वा हानौ वा साम्ये शुभाशुभ फलविचारं कर्तुं समर्थो भवति।
* चन्द्रस्य कुजादिभिःताराग्रहैः शृङ्गभिन्ने फलानि कथं भवन्तीति विवेचयितुं शक्नोति

## ३.३)चन्द्रगोलेशुक्लवृद्धिविचारः -

आतपस्थस्यकुम्भस्य यस्मिन्नर्द्धे रश्मयः पतन्ति तदर्धं रश्मिवशात् शुक्लं दृश्यते। अन्यदर्धं स्वच्छयया कृष्णं दृश्यते तथैव आदित्यादधस्थस्य चन्द्रस्य सूर्यरश्मिभिः नित्यं एकमर्धं शुक्लं भवति। अर्थात् यस्मिन् गोलभागे अर्करश्मयः पतन्ति तदेवार्धं शुक्लं भवति दितीयमर्धं नित्यं स्वच्छायया कृष्णं भवतीति।

यथा -

**नित्यमधःस्थस्येन्दोर्भाभिर्भानोः सितंभवत्यर्द्धम्।**

**स्वच्छाययाऽन्यदसितं कुम्भस्येवाऽऽतपस्थस्य।**

यथा गृहस्य द्वारप्रवेशे दर्पणोदरे संरुद्धाः सूर्यरश्मयः गृहस्यान्तर्मध्ये विद्यमानं तिमिरं नाशयति तथैव अम्बुमये चन्द्रमसि आदित्यस्य रश्मयः प्रतिफलिताः रात्र्युत्पन्नं अन्धकारं नाशयन्ति।

यथा -

**सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमोनैशम्।**

**क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः।**

अर्कतलं त्यजतःचन्द्रमसः येन प्रकारेण पश्चिमायां दिशि शुक्लत्वं आक्रमते तेनैव प्रकारेण चन्द्रस्य दिनकरवशात् बुध्नभागादारभ्योदयः विराजते। अत्र एवं चिन्तनीयं रवेरधोभागस्थश्चन्द्रमा अमावास्यान्ते भवति तत्र च तस्य चन्द्रस्य सूर्याभिमुखं गोलार्द्धं शुक्लं भवति। अधःस्थितमवनि दृश्यभागं कृष्णवर्णं भवति। ततः प्रतिपदादिषु तिथिषु यथा यथा स्वभागतुल्येन अर्कात् प्राङ्मुखः शीघ्रगतित्वात् याति तथा तथा सितमधोभागे अवलम्ब्य दृष्टिवर्ती भवति।

यथा -

**त्यजतोऽर्कतलं शशिनः पश्चादवलम्बते यथा शौक्ल्यम्।**

**दिनकरवशात्तथेन्दोः प्रकाशतेऽधः प्रभृत्युदयः।**

एवमनेन प्रकारेण चन्द्रस्य आदित्यात् स्थानान्तरगमनेन शुक्लभावस्य अधिकतरावृद्धिर्भवति। यथा यथाग्रतो राशिभागवशेन याति तथा तथा तस्य शुक्लाधिक्यं

भवति। यथा दिनार्द्धे पश्चिमार्धे आतपस्थस्य कुम्भस्य शुक्लता भवति तथेति। अत्र एवं चिन्तनीयम् यथा चन्द्रः प्राङ्मुखो शशिभागेन याति तथा तथा शौक्ल्यपरिवृद्धिर्भवति। एवं शुक्लाष्टम्यर्धे शशिचयान्तरितस्य अर्धशुक्लता भवति। पौर्णमास्यन्ते षड्राश्यान्तरितस्य सर्वशुक्लता भवति । ततः यथा यथा अर्कसन्निकर्षमायाति तथा तथा शौक्लहानिर्भवति। यावत् कृष्णाष्टम्यर्धे कृष्णार्धता भवति। अमावस्यान्ते सर्वकृष्णता भवतीति।

यथा -

**प्रतिदिवसमेवमर्कात्स्थानविशेषेणशौक्लपरिवृद्धिः।**

**भवति शशिनोऽपराह्ने पश्चाद्भागे घटस्येव।**

### ३.४) नक्षत्रेषु चन्द्रस्य गमनेन शुभाशुभफलविचारः -

चन्द्रः ज्येष्ठानक्षत्रे वा मूलानक्षत्रे वा पूर्वाषाढउत्तराषाढयोः वा यदा दक्षिणे चरति तदा बीजानि जलप्राणिनः वनानि च नाशयति। तथा अग्निभयं च भवति। तथैव चन्द्रः एतेषु नक्षत्रेषु एव यदा उत्तरगत्या चरति तदा शुभफलदो भवति।

यथा -

**ऐन्द्रस्य शीतकिरणो मूलाषाढाद्वयस्य चायतः।**

**याम्येन बीजजलचरकाननाहा वह्निभयदश्च।**

तथैव चन्द्रः विशाखानुराधयोः नक्षत्रयोः याम्य भोगे यातश्चेत् पापफलदो भवति एतयोः नक्षत्रयोः एव उत्तरभागे गतः चेत् शुभफलदो भवति। एवं मघा विशाखयोर्मध्ये यदि चन्द्रः गतः तर्हि शुभफलप्रदो भवति। तथैव मघाविशाखयोः उत्तरेभागेऽपि गतः चन्द्रः शुभफलप्रदो भवति।

यथा -

**दक्षिणपार्श्वेन गतः शशीविशाखानुराधयोः पापः।**

**मध्येन तु प्रशस्तः पितृदेवविशाखयोश्चापि।**

## ३.५) चन्द्रस्य नक्षत्रयोगफलविचारः -

रेवती नक्षत्रात् आरभ्य षण्नक्षत्रेषु स्थितश्चन्द्रः शुभकरो भवति। तथा आर्द्रानक्षत्रात् आरभ्य द्वादशनक्षत्रेषु स्थितश्चन्द्रः मध्यमः भवति अर्थात् मध्यम फलप्रदो भवति। ज्येष्ठानक्षत्रादारभ्य नवनक्षत्रेषु स्थितश्चन्द्रः पुनः शुभफलदायको भवति। रेवतीनक्षत्रात् षण्नक्षत्राणि, नाम रेवती अश्वनी भरणी कृत्तिका रोहिणी मृगशिरा इत्यादीनि भवन्ति। एतेषु नक्षत्रेषु चन्द्रः यदा संयोगं याति तदा शुभकरो भवति।

एवमार्द्रानक्षत्रात् द्वादशनक्षत्राणि नाम आर्द्रा पुनर्वसु पुष्यमी आश्लेषा मघा पूर्वाफल्गुणी उत्तरफल्गुणी हस्ता चित्ता स्वाती विशाखा अनूराधा इत्यादीनि भवन्ति। एतेषु नक्षत्रेषु यदा मध्यं गत्वा तिष्ठति तदा आर्द्रायोगं भवति तदा मध्यफलं ददाति।

एवमेव ज्येष्ठानक्षत्रात् नवनक्षत्राणि नाम ज्येष्ठ मूला पूर्वाषाढ उत्तराषाढ श्रवण धनिष्ठा शतभिषं पूर्वाभाद्रा उत्तराभाद्रा इत्यादीनि भवन्ति। एतेषु नक्षत्रेषु यदा चन्द्रमससंयोगं करोति तदा पुनः शुभफलदो भवति।

यथा -

**षडनागतानि पौष्णाद्द्वादशरौद्राच्च मध्ययोगीनि।**

**ज्येष्ठाद्यानि नवर्क्षाण्युडुपतिनातीत्य युज्यन्ते।**

## ३.६) चन्द्रस्य संस्थानवशात् फलविचारः -

चन्द्रमसः दश संस्थानानि भवन्ति। तद्यथा नौर्लाङ्गलं दुष्टलाङ्गलं समोदण्डः कार्मुकं युगं पार्श्वशायि आवर्जितम् कुण्डाख्यमिति। एतानि संस्थानानि आकृतिवशात् आविर्भवन्ति। तान्यथा -

### ३.६.१) नौसंस्थानस्य लक्षणं फलं च

यदा चन्द्रस्य श्रुङ्गं उच्चं विस्तीर्णं च भवति तदा चन्द्रस्य आकृतिः नौसंस्थानमित्युच्यते। अर्थात् नौकारूपेण भवति इति। तस्मिन् नौसंस्थाने नाविकानां पीडा भवति। तथा च सर्वलोकस्य शिवं भवति।

### ३.६.२) लाङ्गलसंस्थानस्य लक्षणं फलं च

चन्द्रस्य शृङ्गस्य अर्धभागं यावत् ऊर्ध्वं उन्नतत्वं भवति चेत् तत् लाङ्गलसंस्थानमित्युच्यते। अर्थात् हलाकारे तिष्ठति इति। एतस्मिन् संस्थाने कर्षकाणां पीडा भवति। तथा राज्ञां कारणं विनैव प्रीतिर्भवति। लोकेश्रेयः सुभिक्षं च भवति।

### ३.६.३) दुष्टलाङ्गल संस्थानस्य लक्षणं फलं च

यदा चन्द्रस्य दक्षिणशृङ्गं अर्धोन्नतं भवति तदा दुष्ट लाङ्गलंनाम संस्थानमित्युच्यते। अस्मिन् संस्थाने जाते पाण्ड्यदेशस्य राज्ञः निधनं भवति। तथा सैन्यानां उद्यमं भवति।

### ३.६.४) समदण्डसंस्थानस्य लक्षणं फलं च

चन्द्रः तुल्यशृङ्गः भवति चेत् समदण्डसंस्थानमित्युच्यते। अर्थात् प्रतिपत् दिनस्य आकृतिः तुल्या भवति। प्रतिपत् दिने यादृशः सुभिक्षः यादृशी वृष्टिः भवति तादृश एव मासंयावत् भवेत्।

### ३.६.५) दण्डसंस्थानस्य लक्षणं फलं च

दण्डाकारे चन्द्रः उदितः चेत् तत् दण्डसंस्थानमित्युच्यते। अस्मिन् दण्डसंस्थाने गवां पीडा भवति। तथा राजा तीक्ष्णकरो भवति । प्रतिपत्दिने यादृशी वृष्टिः भवति तादृशी वृष्टिः मासं यावत् भवति।

### ३.६.६) कार्मुकसंस्थानस्य लक्षणं फलं च

धनुराकारे चन्द्रः उदितश्चेत् तत् संस्थानं कार्मुकसंस्थानमित्युच्यते। एतस्मिन् संस्थाने युद्धानि भवन्ति। कार्मुकाकारे स्थितस्य चन्द्रस्य यस्मिन् भागे ज्या तिष्ठति तस्मिन् भागे स्थितानां राज्ञां जयः भवति। अर्थात् ज्या यस्यां दिशि भवति तस्यां दिशि स्थितानां देशानां राज्ञां च जयो भवति।

### ३.६.७) युगसंस्थानस्य लक्षणं फलं च

चन्द्रस्य दक्षिण सौम्यभागं विस्तीर्णः, मध्यमं मण्डलं यदि भवति तद्युगं नाम संस्थानम्। एवं विधे संस्थाने तन्मासमध्ये भूमिकम्पो भवति इति वक्तव्यः।

### ३.६.८) पार्श्वशायिसंस्थानस्य लक्षणं फलं च

युगसंस्थानस्यैव दक्षिण श्रुङ्गाग्रेकिञ्चित् उच्चं यदि भवति तर्हि तत् पार्श्वशायि इति उच्यते। एतस्मिन् संस्थाने चन्द्रः सार्धप्रदानान् घातयति। तथा वृष्टेरभावश्च भवति।

### ३.६.९) आवर्जितसंस्थानस्य लक्षणं फलं च

चन्द्रस्य यद्येकं शृङ्गं अधोमुखं भवति तत् संस्थानम् आवर्जितमित्युच्यते। तत् संस्थानम् लोके दुर्भिक्षं करोति। नकेवलं गोधनस्यापि एवं तृणानामपि अभावः भवति। दुर्भिक्षं च भवति।

### ३.६.१०) कुण्डाख्यसंस्थानस्य लक्षणं फलं च

चन्द्रमसः सर्वत्र खण्डरेखाकारे यदा दृश्यते तदा तत् कुण्डाख्यसंस्थानम् इति उच्यते। अस्मिन् संस्थाने माण्डलिकानां राज्ञां स्थानचलनं भवति। अर्थात् तेषां स्वस्थानात् च्युतिर्भवति।

### ३.६.११) संस्थानानाम् सामान्यलक्षणफलविचारः -

यानि संस्थानानि कथितानि तेषां अभावात् उत्तरोन्नतश्चन्द्रः सस्यवृद्धिः वर्षणं च करोति । तथैव दक्षिणोन्नतश्चन्द्र दुर्भिक्षं भयं च करोति।

यथा -

**प्रोक्तस्थानाभावादुदगुच्चः क्षेमवृद्धिवृष्टिकरः।**

**दक्षिणतुङ्गश्चन्द्रो दुर्भिक्षयाय निर्दिष्टः।।**

एवं विधं अवलोकितस्य मनुजस्य जीवितात् आयुः नश्यति। अर्थात् यः एक एव एकेन शृङ्गेन उपलक्षितं अथवा शृङ्गविलीनं चन्द्रं अथवा अधोमुखं चन्द्रं वा पश्यति सः मरणं प्राप्नोति ।

यथा -

**शृङ्गेणैकेनेन्दुर्विलीनमथवाऽप्यवाङ्मुखं शृङ्गम्।**

**सम्पूर्णं चाभिनवं दृष्टवैको जीविताद् भ्रश्येत्।।**

**३.६.१२) चन्द्ररूपाणि तेषां फलविचारः**

उक्तसंस्थानप्रकारात् चन्द्रमसः परतः रूपाणि भवन्ति तानि स्वल्पः महान् मद्यतनुः वज्राख्यः मृदङ्गरूपः विशालमूर्तिः स्थूलः तनुमूर्तिः इति भवन्ति। एतेषु आकारेषु स्थितश्चन्द्रः आकृतिवशात् जगतः प्रत्येकं फलं ददाति। तद्यथा - स्वल्पाकृतिश्चन्द्रः दुर्भिक्षं करोति। महान् रूपः चन्द्रः सुभिक्षमावहति। मध्यतनुः यः सः वज्राख्यः क्षुत्भयं दुर्भिक्षं च करोति। नृपाणां च उद्यमाय भवति। मृदङ्गाकारः चन्द्रः क्षेमसुभिक्षावहो भवति। विशालमूर्तिरर्थात् विस्तीर्णबिम्बः चन्द्रः राज्ञः श्रेयः वृद्धियर्थं इति ज्ञातव्यः। स्थूलश्चन्द्रः सुभिक्षं करोति। तनुमूर्तिश्चन्द्र अर्थात् अघनदेहः दुर्भिक्षकारी भवति।

**३.७) चन्द्रस्यवर्णलक्षणफलविचारः -**

चन्द्रः भस्मवर्णो वा रूक्षो वा लोहितशरीरो वा रश्मिभिः वर्जितो वा श्यामशरीरो वा भग्नो कम्पमानो वा भवति चेत् क्रमशः दुर्भिक्षं शतृकलहः रोगः तस्काराः एषां सम्बद्धि भयं भवति ।

यथा -

**भस्मनिभः परुषोऽरुणमूर्तिः शीतकरः किरणैः परिहीनः।**

**श्यामतनुः स्फुटितः स्फुरणो वा क्षुड्डमरामयचौरभयाय।**

एवं विधः चन्द्रः प्रालेयकुन्दकुमुदे अर्थात् निर्मलहिमयुते तथा गौर्यासमन्ततः निर्मलीकृत्य इव यत्नतः उपरि न्यस्तः महेश्वराय रात्रौ भविष्यति इति निश्चित्य एवं विधं चन्द्रं य अवलोकयति सः जगतः श्रेयसे भविष्यतीत्यर्थः।

यथा -

प्रालेयकुन्दकुमुदस्फटिकावदातो

यत्नादिवाऽद्रिसुतया परिमृज्य चन्द्रः

उच्चैः कृतो निशि भविष्यति मे शिवाय
यो दृश्यते स भविता जगतः शिवाय

**३.८)चन्द्रस्य पक्षवृद्धौ वा हानौ वा साम्ये शुभाशुभफलविचारः -**

शुक्लपक्षे सम्यक् प्रवृद्धिं गते चन्द्रे ब्राह्मणाः क्षत्रियाः तथा प्रजाश्च वृद्धिं यान्ति। तस्मिन्नेव शुक्लपक्षे क्षयं गतश्चेत् ब्राह्मणानां क्षत्रियाणां प्रजानां च हानिर्भवति। समत्वे अर्थात् नक्षयं न वृद्धिश्चेत् तेषां ब्राह्मणक्षत्रियप्रजानां साम्यमेव भवति। कृष्णपक्षे प्रागुक्तं सर्वं फलं विपरीतेन ज्ञातव्यम्। एतदुक्तं भवति - कृष्णपक्षे प्रवृद्धे ब्राह्मणक्षत्रिय प्रजानां हानिः, हीने तस्मिन्नेव पक्षे तेषां वृद्धिः, समपक्षे समत्वमिति।

चन्द्रः कुमुदं, मृणालम्, हारः, गौरवत् यदि भवति तथा तिथिक्रमेण क्षयं गच्छति वा तिथिक्रमेण वृद्धिं याति वा शुक्लकृष्णप्रतिपत्तादितिथिषु वृद्धिक्षयौ तुल्यौ भवतः अर्थात् कदाचित् दिनाधिकतो भवति। तथा विकाररहितगमनं वा अर्थात् कम्पनादि दोषरहितो वा अविकृतबिम्बं वा भवति चेत् एवं विधश्चन्द्रः पुंसां विजयं कल्पयति।

**३.९) चन्द्रस्य कुजादिभिः ताराग्रहैः शृङ्गभिन्ने फलविचारः**

चन्द्रस्य ताराग्रहैस्सह संयोगे भौमादयः बिम्बभेदनं कुर्वन्ति। तत्र इदं फलं वक्तव्यम्। चन्द्रः कुजेन विषाणे ताडिते सति दूरवासिनः कुत्सितनरपतीन् घातद्यति। तथैव शनैश्चरेण ताडिते सति शस्त्रभयं दुर्भिक्षं च करोति। यदि बुधेन ताडितश्चेत् अवृष्टितः उद्भूतं भयं दुर्भिक्षजं भयं भवति। बृहस्पतिना ताडिते सति श्रेष्ठान् नरपतीन् घातयति। शुक्रेन ताडिते सति स्वल्पान् नृपान् हन्ति। इदं ग्रहकृतं शृङ्गभङ्गफलं शुक्लपक्षे किंचित् भवति। कृष्णपक्षे यथा निर्दिष्टं सकलं फलं तथैव भवति।

**३.९.१) शुक्रभिन्नबिम्बस्य फलविचारः**

यदा शुक्रेण भिन्नः चन्द्रः मध्यात् विदारितो भवति तदा मगधान् जनन् यवान् पुलिन्दान् नेपालभृङ्गिमरुकच्छसुराष्ट्रमद्रान् पाञ्चालान् कैकयान् कुलूतकान् पुरुषभक्षान् उशीनरजनान् एतान् सर्वान् पाककालात् अनन्तरं सप्तमासेषु घातयेत्।

### ३.९.२) जीवभिन्नबिम्बस्य फलविचारः

चन्द्रस्य गुरुणा शृङ्गभिन्नो भवति चेत् गान्धारान् सौवीरकान् सैन्धवान् कीरान् एतान् सर्वान् जनान् संपीडयति। तथा धान्यानि पर्वतान् द्रविडदेशीय अधिपतीन् ब्राह्मणान् एतान् सर्वान् दशमासेषु पीडयति। पाककालात् परतः इदं ज्ञेयमिति.

### ३.९.३) भौमभिन्नस्य बिम्बस्य फलविचारः

चन्द्रः भौमेन भिन्नः चेत् नरपतीन् उद्योगेस्थितान् विजगीषून् वाहनैश्वर्यादिभिस्सह घातयति। मालवान् कौलिन्दान् समूहप्रदानान् शिबीन् अयोध्यकान् पार्थिवान् अपि तथा कौरवानां मत्स्यानां शुक्तीनां जनानां च अधिपतीन् च हन्यात्।

### ३.९.४) शनैश्चरभिन्नस्य बिम्बस्य फलविचारः

चन्द्रः शनैश्चरेणभिन्नमण्डलो भवति चेत् दशमासोपतापेन यौधेयान् सचिवान् सकौरवान् पूर्वस्यां दिशि स्थितान् अधिपतीन् च घातयेत्।

### ३.९.५) बुधभिन्नस्य बिम्बस्य फलविचारः

बुधः यदि चन्द्रं विदार्यतिष्ठति चेत् मगधदेशान् मथुराश्च हन्ति। वेणा नाम नद्याः तीरे ये निवासं कुर्वन्ति तान् जनान् वर्जयित्वा अन्यान् हन्ति।

### ३.९.६) केतुभिन्नस्य बिम्बस्य फलविचारः

चन्द्रः यदि केतुना विदारित बिम्बो भवति तर्हि तदा क्षेमारोग्यं सुभिक्षं च विनाशयति। तथा आयुधजीविनां विनाशं कुर्यात्। तस्कराणां पीडां च कुर्यात्।

# ३.१०) प्रश्नावली

**१. संक्षेपेण लिखत** **५*३=१५**

१. चन्द्रस्य संस्थानानि कानि ? तेषां नामानि लिखत ?

२. चन्द्रस्य संस्थानानां सामान्य लक्षणानि कानि ?

३. चन्द्रस्य वर्णलक्षणानि कानि ?

**२. विस्तरेण उत्तरं लिखत** **१०*५=५०**

१. चन्द्रगोले शुक्लवृद्धिं उद्धिश्य समग्र विचारं कुरुत ?

२. नक्षत्रेषु चन्द्रस्य गमनेन शुभाशुभफलविचारं कुरुत ?

३. चन्द्रस्य नक्षत्रयोगफलविचारं कुरुत?

४. संस्थानवशात् चन्द्रस्य फलानि चर्चयत ?

५. चन्द्रस्य रूपाणि तेषां फलानि च प्रतिपादयत?

**३. व्याख्यात** **२०*४=८०**

१. चन्द्रगोले शुक्लवृद्धिः कथं भवति इति विषये विस्तरेण विश्लेषयत?

२. दशसंस्थानेषु चन्द्रस्य शुभाशुभफलं विचार्य संस्थानानां सामान्यलक्षणानि प्रतिपादयत ?

३. चन्द्रस्य पक्षवृद्धौ वा हानौ वा साम्ये शुभाशुभ फलानि विवेचयत ?

४. कुजादिभिः ताराग्रहैः चन्द्रस्य शृङ्गभिन्ने फलविचारं कुरुत ?

# संरचना

४ . चतुर्थोऽध्यायः

४.१) अवतरणिका

४.२) उद्देश्यानि

४.३.) राहोर्ग्रहत्व प्रतिपादनाय मतान्तराणां विचारः

४.४ राहोर्ग्रहत्वप्रतिपादने वराहमिहिरेण कृतपरमतखण्डनम

४.५) अर्केन्दोः ग्रहणे वराहमिहिरस्य सिद्धान्त:्

४.६) प्रतिमासं किमिति चन्द्रस्य ग्रहणं न भवति इत्येतत् प्रतिपादने विचारः

४.७) चन्द्रग्रहणंतु सर्वत्र एकरूपं दृश्यते अर्कग्रहणं तु भिन्नरूपेण दृश्यते किमर्थंति विचारः

४.८) अर्कचन्द्रयोः विषाणताविषये विचारः

४.९) अर्कचन्द्रयोर्ग्रहणं राहुकृतं न इति वराहमिहिरस्य प्रतिपादनम्।

४.१०) गर्गादिभिरुक्तग्रहणज्ञाननिमित्तानां विचारः

४.११) ग्रहणे ग्रासप्रमाणदिग्ज्ञानवेलाज्ञानानां विचारः

४.१२) ब्रह्मादीनां सप्तानां पर्वाणां विचारः

४.१३) एकस्मिन् मासे चन्द्रसूर्ययोः ग्रहणयोः फलविचारः

४.१४) ग्रस्तोदितयोर्ग्रस्तास्तयोश्चन्द्रार्कयोः फलविचारः

४.१५) उदयात् प्रभ्रुति अस्तमयं यावत् दिनस्थयोः चन्द्रसूर्ययोः सप्तस्वाकाशभामेषु फलविचारः

४.१६)		राहोः कारणतः अयनफलस्य दिक्फलस्य विचारः

४.१७)		मेषादिराशिषु ग्रस्तयोश्चन्द्रार्कयोः फलविचारः

४.१८)		सूर्यचन्द्रयोः दशग्रासानां फलविचारः

४.१९)		राहोः वर्णवशात् फलविचारः

४.२०)		अर्कचन्द्रयोः ग्रहदृष्टिफलविचारः

४.२१)		ग्रस्तानां भौमादीनां फलविचारः

४.२२)		कार्तिकादिमासानां फलविचारः

४.२३)		अर्कशशिनोः दशमोक्षणां फलविचारः

४.२४ )		प्रश्नावली

# ४ . चतुर्थोऽध्यायः

## ४.१) अवतरणिका

समस्तजगतः शुभाशुभफलविषयान् ज्ञातुं बहवः मार्गाः सन्ति तेष्वन्यतमः ग्रहचारो भवति। ग्रहाणां चारवशात् कदावृष्टिर्भवति, कदा उपद्रवो भवति, कदा भूकम्पादयो भवन्ति इत्येवं कस्मिन् देशे अरिष्टादयो वा शुभफलानि वा कदा कथं भवन्ति इत्यपि ज्ञातुं शक्यते। प्रत्येकं ग्रहस्य तथैव अगस्त्यस्य सप्तर्षीणां ज्योतिर्मयस्वरूपाणां चारवशात् एतत् सर्वं पृथक् पृथक् ज्ञातुं शक्यते। अस्मिन्नध्याये राहोः चारवशात् कथं कीदृशं फलं भवति इति प्रदर्श्यते।

# ४.२) उद्देश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* राहोर्ग्रहत्व प्रतिपादनाय मतान्तराणि ज्ञात्वा वराहमिहिरेण कृत परमतखंडनम् आविष्कर्तुं समर्थो भवति।

* अर्केन्दोः ग्रहणे वराहमिहिरस्य सिद्धान्तं लेखितुं शक्नोति।

* प्रतिमासं किमिति चन्द्रस्य ग्रहणं न भवति इत्येतत् प्रतिपादने विचारयितुं समर्थो भवति।

* चन्द्रग्रहणं तु सर्वत्र एकरूपं दृश्यते अर्कग्रहणं तु भिन्नरूपेण दृश्यते किमर्थमिति चर्चयितुं पारयति।

* अर्कचन्द्रयोः विषाणताविषये चर्चां कर्तुं समर्थो भवति।

* अर्कचन्द्रयोर्ग्रहणं राहुकृतं न इति वराहमिहिरस्य प्रतिपादनम् आविष्कृत्य गर्गादिभिरुक्तग्रहणज्ञाननिमित्तानां विचारमपि कर्तुं समर्थो भवति।

* ग्रहणे ग्रासप्रामाणदिग्ज्ञानवेलाज्ञानानां विचारं ब्रह्मादीनां सप्तानां पर्वाणां विचारं च कर्तुं शक्नोति।

* वेलहीने अतिवेले च पर्वणि फलविचारं, एकस्मिन् मासे चन्द्रसूर्ययोः ग्रहणयोः फलविचारं च कर्तुं शक्नोति।

* ग्रस्तोदितयोर्ग्रस्तास्तयोश्चन्द्रार्कयोः फलानि विचारयितुं समर्थो भवति।

* उदयात् प्रभृति अस्तमयं यावत् दिनस्थयोः चन्द्रसूर्ययोः सप्तस्वाकाशभागेषु फलविचारं कर्तुं शक्नोति।

* राहोः कारणतः अयनफलस्य दिक्फलस्य विचारं कर्तुं शक्नोति

* मेषादिराशिषु ग्रस्तयोश्चन्द्रार्कयोः फलानि तथा सूर्यचन्द्रयोः दशग्रासानां फलनि च प्रतिपादयितुं समर्थो भवति।

* राहोः वर्णवशात् फलानि अर्कचन्द्रयोः ग्रहदृष्टिफलानि च प्रतिपादयितुं शक्नोति।

* कार्तिकादिमासानां फलविचारं कर्तुं शक्नोति।

* अर्कशशिनोः दशमोक्षाणां फलविचारं कर्तुं शक्नोति।

## ४.३.) राहोर्ग्रहत्व प्रतिपादनाय मतान्तराणां विचारः

लोके यः राहुरित्युच्यते स चासुरः सैंहिकेयः पुरा अमृतं पिबतः तस्य शिरः हरिणा सुदर्शनाख्येन चक्रेण छिन्नं कृतमपि अमृतास्वादनहेतोः सः प्राणैरपरित्यक्तः तथैव ग्रहत्वमपि प्राप्तमिति केचिदाचार्याः वदन्ति

चन्द्रबिम्बस्य सूर्यबिम्बस्य च यादृश्याकृतिरस्ति तादृगेव राहुमण्डलस्यापि अस्ति इति केचन वदन्ति। यद्येवं चेत् तत् किमिति आकाशे न दृश्यते? इति प्रश्नस्य समाधानरूपेण कृष्णत्वात् न दृश्यते यतोऽसौ तमोमय इति । यदाकदापि तस्य दर्शनम् गगने भवति वा न वा इति प्रश्नस्य ब्रह्मणः वरप्रदानात् ग्रहणसमये एव दृश्यते अन्यस्मिन् काले न दृश्यते। पुनः पर्वकाले दृश्यते इति समाधानरूपेण तैः कथ्यते।

**पराशरेण एवमुक्तम्**

पुरा पुरूहूतपितरं कश्यपं अपत्यार्थमकाले सिंहिका अभियाचयामास। कश्यपस्तस्यै अकालयाञ्चाकोपाद्धारुमकालान्तकोपमं सुतं अदात्। स एव राहुरित्युच्यते। स जातमात्र एवअदिति सुतसङ्गरावमर्दादनुविमुखीकृतः क्रोधाद्धिमवति दिव्यमत्युग्रमयुतं वर्षाणां तपोऽतप्यत। स पितामहाद्धिवि चरणममरतां सुरविजयं अर्कचन्द्रसम्भक्षणं च वरमभिवरयामास। तस्मै ब्रह्म प्रहसन्नुवाच त्वमेतौ जरयितुं अशक्तः किन्तु एवमस्तु इत्युक्त्वा अन्तर्हिते भगवति राहुः अर्कच्द्रावभिदुद्राव। ततः हरिः अरिविमथनंचक्रं राहोरुपरि प्रक्षिप्य शिरच्छित्वोवाच - पितामहवचस्सर्वमवितथं भवतु स्वे स्वे युगे पर्वणि ग्रहणं कुर्वन् जगतः शुभाशुभानां कर्ता भविष्यसि इति।

केचन आचार्याः एवं कथयन्ति मुखपुच्छविभक्ताङ्गमिति। अर्थात् मुखपुच्छाभ्यां विभक्तानि अङ्गानि अस्य सन्ति इति। एवं कथ्यते चेत् अस्य राहोः मुखपुच्छाभ्यां परतः अन्यदवयवादिकं नास्ति इति ज्ञायते।

अन्ये आचार्याः राहोः भुजङ्गाकारं कथयन्ति अपरे आचार्याः राहुः मूर्तिरहितः भवति इति तमोमयो भवति इति कथयन्ति।

## ४.४राहोर्ग्रहत्वप्रतिपादने वराहमिहिरेण कृतपरमतखण्डनम्

बहवः वराहमिहिरात् पूर्वाचार्याः राहो ग्रहत्वप्रतिपादनविषये स्वस्वमतेषु भिन्नभिन्नरूपेण भिन्नभिन्नविषयान् कथितवन्तः किन्तु वराहमिहिरः तान् असत् विषयान् सहेतुकं खण्डितवान्

तान्यथा -

यद्यसौ राहुः मूर्तिमान् राशिषु नक्षत्रेषु विचरणशीलो भवति अथवा शिरोमान् मण्डलवान् वा भवति तर्हि सः कथं निश्चितगतिर्भूत्वा राशिषट्केनान्तरितौ सूर्यचन्द्रमसौ गृह्णाति। अस्य तिस्रो लिप्ता एकादश विलिप्ताश्च नियता गतिरस्ति इति गणितस्कन्धे उक्तम् तस्य नियतचारस्य यथा अर्कादीनां षड्राश्यन्तरिता गतिः न सम्भाव्यते।

यदि असौ राहुः अनिश्चितगतिः भवति तर्हि सः केत्वादिरिव कथं संख्यया गणिते नोपलब्धः? अस्मिन् राशौ राहुरवस्थित इति कथं ज्ञायते। अथवा सः मुखपुच्छविभक्ताङ्गो यदि भवति तर्हि सः राशिद्वयेन राशित्रयेण राशिचतुष्केण राशिपञ्चकेन वा कस्मात् हेतोर्नगृह्णाति। केवलं अर्कचन्द्रौ षड्राश्यःन्तरितौ एव गृह्णाति।

यदि राहुः सर्पाकारो भवति चेत् सः षड्राश्यन्तरितावर्कचन्द्रौ लाङ्गूलेन वदनेन वा गृह्णाति। एवं चेत् मुखपुच्छमध्यवर्त्ति राशिषट्कं कस्मात् हेतोः नाच्छादयति? अतो इदं असत् भवति।

अथ राहुद्वयमप्यस्ति तत्रैको नियतचारः अन्योऽनियतचारः यश्चानियतरः सः षड्राश्यन्तरितयोरर्कचन्द्रयोर्मुखेन ग्रहणं करोति इत्येतत् मतं प्रतिषेधयन्नाह वराहमिहिरेण तद्यथा -

यदि राहुद्वयं भवेत् चेत् तयोरेकेन अस्तमिते अथवा उदिते चन्द्रे ग्रस्ते सति रविरपि रवितुल्यगतिनान्येन द्वितीयेन राहुणा ग्रस्तोऽवलोक्यते च । किन्तु अत्र एवं पर्वकाले न दृश्यते अतः राहुद्वयं स्यात् इति मतं असत् भवति।

## ४.५) अर्केन्दोः ग्रहणे वराहमिहिरस्य सिद्धान्तः

राहुकृतमर्कचन्द्रयोर्ग्रहणे इन्दोः प्राक्प्रग्रहणं सूर्यस्य पश्चात् भवति। तत्किमिति चेत् अत्र राहोरेकरूपत्वं कारणं न भवति भूच्छायैवात्र कारणं भवति। चन्द्रः स्वग्रहणे भूच्छयां प्रविशति सूर्यग्रहणे सूर्यबिम्बं प्रविशति यतोऽर्कात् सप्तमराशौ भूच्छाया भ्रमति चन्द्रश्च पौर्णमास्यान्ते तत्रैव भवति। चन्द्रः च शीघ्रत्वात् पूर्वाभिमुखो भूच्छयां प्रविशति। तत्र प्रविष्टस्य खण्डं नोत्पद्यते। अतस्तस्य पूर्वार्द्धात् प्रग्रहणं भवति। सूर्यग्रहणे चन्द्रार्कावेकराशिगौ भवतः। तत्र चन्द्रमा शीग्रगतित्वात् अमावास्यान्ते पश्चादागत्य अर्कतलं प्रविशति अतः अविक्षिप्तः स एवाधःस्थोऽर्कमाच्छादयति। अतः पश्चात् सूर्यस्य खण्डं नोत्पद्यते। अस्मात् चन्द्रस्य पश्चात् अर्द्धात् प्रग्रहणं न भवति। सूर्यस्य पूर्वार्द्धात् प्रग्रहणं न भवति इति।

यथा -

**भूच्छायां स्वग्रहणे भास्करमर्कग्रहे प्रविशतीन्दुः।**
**प्रग्रहणमतः पश्चान्नेन्दोर्भानोश्च पूर्वार्द्धात्।।**

**रात्रौ भूच्छायाविचारः -**

यथा वृक्षस्य स्वच्छाया आदित्यस्य आवरणवशात् एकस्मिन् पार्श्वे सूर्याद्विपक्षयां दिशि आयामिनी भवति। तेनैव प्रकारेण रात्रौ दिनकरस्य आवरणवशादेव भूच्छाया दीर्घचया भवति। यतः भूः सूर्यमाच्छादयति। अतः एकपार्श्वे दीर्घचया भवति।

यथा -

**वृक्षस्य स्वच्छाया यथैकपार्श्वे भवति दीर्घचया।**
**निशि निशि तद्वद्भूमेरावरणवशाद्दिनेशस्य।।**

## ४.६) प्रतिमासं किमिति चन्द्रस्य ग्रहणं न भवति इत्येतत् प्रतिपादने विचारः

यदि चन्द्रः आदित्यात् सप्तमेराशौ स्थितो भूच्छायातः उत्तरेण दक्षिणेन च नात्यर्थं याति स्वल्पेन विक्षेपेण विक्षिप्तो भवति इत्यर्थः। तदा प्राचीं दिशमनुसरन्नौर्वीच्छायां प्रविशति नान्यथेति। यतो भूच्छाया मूलाद् बृहती भवति अग्रात् अल्पा भवति। सा च

चन्द्रकक्षाया ऊर्ध्वं याति। तत्रस्थ चन्द्रमा च अत्यल्पविक्षिप्तो यदा भवति तदा सर्वग्रास उत्पद्यते। विक्षेपे सति तदनुसारेण चतुर्भागग्रासप्रमाणमर्द्धग्रासप्रमाणं पादोनग्रासप्रमाणं ग्रासाभावो वा स्वबुद्ध्या ऊह्यम्।

यथा -

**सूर्यात् सप्तमराशौ यदि चोदग्दक्षिणेन नातिगतः।**

**चन्द्रः पूर्वाभिमुखश्छायामौर्वी तदा विशति।।**

**४.७) चन्द्रग्रहणंतु सर्वत्र एकरूपं दृश्यते अर्कग्रहणं तु भिन्नरूपेण दृश्यते किमर्थेति विचारः**

आदित्यात् अधस्थश्चन्द्रः पश्चिमभागात् समागतः मेघखण्डवत् अर्कआच्छादयति। तस्मात् देशं देशं प्रति सूर्यग्रहणं दर्शनहेतोः नानाप्रकारं दृश्यते।तद्यथा - क्वचित् सर्वग्रहणं दृश्यते क्वचित् खण्डग्रहणं दृश्यते क्वचित् ग्रहणाभावश्च भवति। यथा मेघखण्डाच्छादितमर्कबिम्बं समाधोवर्तिनां सर्वमेवादृश्यं पार्श्ववर्त्तिनां केषाञ्चिदर्द्धदृश्यं केषञ्चिच्चतुर्थभागादृश्यमन्येषां सर्वदृश्यमिति।

यथा -

**चन्द्रोऽधःस्थः स्थगयति रविमम्बुदवत् समागतः पश्चात्।**

**प्रतिदेशमतश्चित्रं दृष्टिवशाद्भास्कर ग्रहणम्।**

**४.८) अर्कचन्द्रयोः विषाणताविषये विचारः**

अर्द्धच्छन्नस्य चन्द्रमसः कुण्ठविषाणता भवति अर्द्धच्छन्नस्य अर्कस्य तीक्ष्णविषाणता भवति तत्किमेकत्वात् ग्राहकस्येत्येतत्प्रतिपादनार्थं वराहमिहिरेण एवं उक्तम् चन्द्रस्य अतिबृहत् आवरणं भवति तस्मात् हेतोः अर्द्धग्रस्तः चन्द्रः भग्नशृङ्गो भवति। आदित्यश्च स्वल्पं आवरणं भवति अतः अर्द्धग्रस्त रविः तीक्ष्णशृङ्गो भवति।

यथा -

**आवरणं महदिन्दोः कुण्ठविषाणस्ततोऽर्द्दसंछन्नः।**

**स्वल्पं रवेर्यतोऽतस्तीक्ष्णविषाणो रविर्भवति।**

## ४.९) अर्कचन्द्रयोर्ग्रहणं राहुकृतं न इति वराहमिहिरस्य प्रतिपादनम्।

दिव्यदृग्भिराचार्यैः अर्कचन्द्रयोर्ग्रहणे राहुकारणमिति कथितम्। किन्तु अस्मिन् ग्रहणे राहुरकारणमिति परमार्थः इति वराहमिहिरस्य मतम्। ननु यद्येवं अर्केन्दोर्ग्रहणं राहुकृतं न तत् श्रृतिसंहितालोकैः सह विरुध्यते। यतो लोके राहुकृतं ग्रहणं इति आगोपालाङ्गनादि प्रसिद्धम्।

यथा -

**एवमुपरागकारणमुक्तमिदं दिव्यदृग्भिराचार्यैः।**

**राहुरकारणमस्मिन्नित्युक्तः शास्त्रसद्भावः।।**

एवं मत्वा लोकश्रुतिस्मृतिसंहितानां यथैक्यं भवति तत्प्रतिपादनाय राहोरेव ग्राहकत्वमाह। असौराहुरसुर इति सैंहिकेयाख्यो इति ब्रह्मण वरं प्राप्त इति कथितः। किं तद्वरंचेत् यथा ग्रहणेऽर्कचन्द्रयोर्दत्तहुताशेन यत् दानं दीयते यच्च वह्नौ हूयते ततोऽसौ भागः तेन दत्तहुतांशेन ते तवचापि तर्पणं भविष्यति इति

तस्मिन् ग्रहणसमये कमलजवरप्रदानात् राहोः सन्निहितत्वं भवति। तेन कारणेन लोके राहुरिति कथ्यते। तेन भूच्छाया चन्द्रगोलौ द्वेस्थाने तस्य निवासार्थं परिकल्पिते। तत्र स्थितत्वात् स एव आच्छादक इति प्रसिद्धिः। गणिते तु पुनः दक्षिणसौम्यविक्षेपवशात् शशिगतिर्याम्योत्तरा भवति।स च पातवशात् दक्षिणसौम्यविक्षेप उत्पद्यते। अतः चन्द्रपात एव लोके राहुरिति प्रसिद्धः।

भौमादीनां ताराग्रहाणामपि पाता विद्यन्ते। तेषामपि तद्वशाद् विक्षेपो भवति। तेन याम्योत्तरागातिर्ज्ञायते। किमयं ग्रहः कान्त्यग्रादुत्तरेण विक्षिप्तो वा दक्षिणेन विक्षिप्तो वा इति ज्ञायते। एवं चन्द्रस्य यासौ दक्षिणोत्तरागतिः पातवशात् सिध्यति, सैव लोके राह्वर्थेन व्यवस्थाप्यते।

## ४.१०) गर्गादिभिरुक्तग्रहणज्ञाननिमित्तानां विचारः

ग्रहणपरिज्ञानं कथञ्चिदपि उत्पातरूपैश्चिह्नैः न विज्ञायते। यतोहि उत्पातरूप निमित्तानि अन्यस्मिन् कालेऽपि सम्भवन्ति। गर्गादिभिः उत्पातवशेन यत् ग्रहणज्ञानमुक्तं तन्न शोभनम्। यतः निमित्तानि ग्रहणकाले एव न सम्भवन्ति। अन्यस्मिन् कालेऽपि

सम्भवन्ति। तत्र च तानि उत्पातानि ग्रहणकारणानि इति न गण्यन्ते।

यथा -

**न कथञ्चिदपि निमित्तैर्ग्रहणं विज्ञायतेनिमित्तानि।**

**अन्यस्मिन्नपि काले भवन्त्योत्पातरूपाणि।।**

शास्त्रान्तरेषु कैश्चन आचार्यैः पञ्चानां ग्रहाणां संयोगात् ग्रहणस्य सम्भवो भवति इति उक्तम् एतदसत् भवति यतः पौर्णमास्यां वा अमावास्यां वा ग्रहणंभवति पञ्चानां ग्रहाणां संयोगः तयोर्दिनयोरेव न भवति अन्येषु दिनेष्वपि भवति एतत् प्रथमं कारणम् पौर्णमास्यां वा अमावस्यांवा यदि पञ्चग्रहसंयोगो भवति तदा ग्रहणाभावश्च भवेत्। एतदपि द्वितीयं कारणं भवति। शास्त्रान्तरेषु ग्रहणसम्बन्धिदिक्परिज्ञानमपि उक्तम्। तत् किमितिचेत् सोमग्रहणं सूर्यग्रहणं वा यदा भावि तदा अष्टम्यां समीपवर्तिन्यां तिथौ जलमध्ये तैलं क्षिप्तव्यं तत् यस्यां दिशि प्रसरति तस्यामेव दिशि ग्रहणं वक्तव्यम्। पुनरपि मोक्षार्थं भूयोजलमध्ये तैलं क्षिप्तव्यं यस्यामेव दिशि तत् न प्रसरति तस्यामेव दिशि मोक्षो वक्तव्य इति। एतदपि असद्भवति यतः अन्यस्मिन् भाण्डगते जले क्षिप्तं तैलं अन्यत्र सर्वत्र प्रसरति तत् तैलं वारं वारं यदि क्षिप्तं तर्हि तत् भिन्नभिन्नरूपेण प्रसरति अतः सर्वमेतत् असत् भवति। तस्मात् पण्डितैरिदं न अङ्गीकार्यम्।

यथा -

**पञ्चग्रहसंयोगान्न किलग्रहणस्य सम्भवो भवति।**

**तैलं च जलेऽष्टम्यां न विचिन्त्यमिदं विपश्चिद्भिः।**

### ४.११)ग्रहणे ग्रासप्रमाणदिग्ज्ञानवेलाज्ञानानां विचारः

स्फुटविक्षेपस्य नाम अवनतिरिति अस्ति। तया अवनत्या सूर्ये गसो ज्ञेयः। तत्कथमिति चेत् अत्यल्पे विक्षेपे महाग्रहणं महतिविक्षेपे अल्पग्रहणं इति। चन्द्रार्कमानयोगार्द्धात् अवनतिमापस्य शेषे रविमानादधिके सर्वग्रहणं भवति ऊने खण्डग्रहणं भवति शुद्धे ग्रहणाभावो भवति एवं अवनत्यार्के ग्रासः ज्ञेयः।

तत्कालोत्पन्नयावनत्या च परिलेखकरणेन प्रग्रहणादीनां दिग् ज्ञेया। तिथ्यवसानात् वेला ज्ञेया। तिथ्यवसानं नाम अमावास्या इति।

यथा -

**अवनत्यार्के ग्रासो दिग्ज्ञेया वलनयाऽवनत्या च ।**

**तिथ्यवसानाद्वेला करणे कथितानि तानि मया।**

### ४.१२) ब्रह्मादीनां सप्तानां पर्वाणां विचारः

रविचन्द्रयोः ग्रहणं षण्मासबुद्ध्या शोधयेत्। तथा कल्पादितः क्रमात् षड्भिः मासैः एकः पर्वः अनन्तरं षट्भिः मासैः एकः पर्वः एवं एतादृशानि पर्वाणि सप्त भवन्ति। एतेषां सप्तानां पर्वाणां अपि ब्रह्माद्याः सप्तदेवताः क्रमेण ईशाः भवन्ति। तद्यथा - ब्रह्म - चन्द्रः - इन्द्रः - कुबेरः - वरुणः - अग्निः - यमः - एतेसप्त यथासांख्यं सप्तानां पर्वाणां अधिपतयः भवन्ति।

**सप्तानां पर्वाणां फलविचारः -**

४.१२.१) ब्रह्मपर्वः - ब्रह्मपर्वणि ब्राह्मणादीनां, पशूनां च वर्धनं भवति। तथा क्षेमं लब्धपालनं नीरोगत्वं एतानि भवन्ति। सस्यानां समृद्धिः भवति।

४.१२.२) चन्द्रपर्वः - चन्द्रपर्वणि ब्रह्मपर्वसदृश एव भवति। द्विजपशुवृद्धिः क्षमः अरोगता च भवति। सस्यसम्पच्च भवति । तस्मिन् सौम्ये तु पुनः पण्डितानां पीडा अवर्षणं च भवति।

४.१२.३) ऐन्द्रपर्वः - ऐन्द्रपर्वणि राज्ञों परस्परविरोधः तथा सस्यानां धान्यानां च विनाशः लोके क्षामं च भवति।

४.१२.४) कुबेरपर्वः - कुबेरपर्वणि ईश्वराणां वित्तक्षयो भवति। सुभिक्षं च भवति।

४.१२.५) वारुणपर्वः - वारुणपर्वणि राज्ञां अशुभं भवति। सर्वजनानां क्षेमं च भवति। तथैव सस्यानां वृद्धिश्च भवति।

४.१२.६) आग्नेयपर्वः - अस्मिन् पर्वणि आरोग्यकरं भवति। तदा सस्यानां वृद्धिः च भवति जलभयरहितं भवति। अर्थात् न अतिबहुलं न अत्यल्पं च वृष्टिर्भवति।

यथा कालोपयोग्यं भवति तथा भवति।

४.१२.७) यम्यपर्वः - अस्मिन् पर्वणि संस्थानां विनाशो भवति। क्षुद्भयं दुर्भिक्षं च भवति। उक्त पर्वसप्तकात् यत् अन्यत् पर्वः भवति तत् अनिष्टदं भवति।

**वेलहीने अतिवेले च पर्वणि फलविचारः**

गणितागतप्रग्रहणात् पूर्वं यदि प्रग्रहणं दृश्यते। तदा तत्पर्वं वेलहीनं इत्युच्यते। अथ गणितागतप्रग्रहणकालात् पश्चात् यदि दृक्प्रग्रहणं भवति तदा तत्पर्वं अतिवेलमित्युच्यते तयोः पर्वयोः फलानि यथा -

१. वेलहीने पर्वणि गर्भाणां नाशो भवति। तथा युद्धं च भवति। गर्भ अगर्भलक्षणमग्रतः वक्ष्यति। ते तत्र ज्ञातव्याः।

२. अतिवेले पर्वणि पुष्पाणां फलानां च विनाशो भवति। लोके सस्यानां नाशश्च भवति।

**४.१३) एकस्मिन् मासे चन्द्रसूर्ययोः ग्रहणयोः फलविचारः**

एकस्मिन्नेव मासे रविचन्द्रयोः ग्रहणं भवति चेत् तदा राजानः आत्मीयसैन्यानां विनाशमायान्ति सङ्ग्रामाश्च अधिकतया भवन्ति। तथैव राज्ञां अर्थनाशनं, लोके अवृष्टिश्च भवति।

यथा -

**यद्येकस्मिन् मासे ग्रहणं रविसोमयोस्तदा क्षितिपाः।**

**स्वबलक्षोभैः संक्षयमायान्त्यतिशस्त्रकोपश्च।।**

ज्योतिःशास्त्रे मासः शुक्लदिरुक्तः। प्रथमपक्षान्ते सोमग्रहो द्वितीयपक्षान्ते अमावास्यायां अर्कग्रहात् तथैकमासः सञ्जायते तस्मात् अयं महान् दोषः।

**४.१४) ग्रस्तोदितयोर्ग्रस्तास्तयोश्चन्द्रार्कयोः फलविचारः**

चन्द्रः यदा ग्रस्तोदितो वा ग्रस्तास्तमितो वा भवति तदा शारदधान्यस्य विनाशकर्ता भवति। एवं सूर्यः ग्रस्तोदितो वा ग्रस्तास्तमितो वा भवति तदा राज्ञः क्षयदो भवति। सूर्येद्रू सर्वग्स्तौ यदि पापग्रहयोः दृष्टौ तदा दुर्भिक्षं मारकं च ददत इति

यथा -

**ग्रस्तावुदितास्तमितौ शारदधान्यावनीश्वरक्षयदौ।**

**सर्वग्रस्तौ दुर्भिक्षमारकदौ पापसन्दृष्टौ।।**

**<u>४.१५) उदयात् प्रभ्रुति अस्तमयं यावत् दिनस्थयोः चन्द्रसूर्ययोः सप्तस्वाकाशभामेषु फलविचारः</u>**

चन्द्रो वा अर्को वा यदा ग्रस्तौ भवतः तदा ग्रहणात् दिनप्रमाणं सप्तभिः भागैः विभज्यते चेत् यत् मानं लभ्यते, तेन मानेन आकाशमपि सप्तथा कृतं भवति। एतेषु सप्तसु आकाशभागेषु यस्मिन् भागे प्रग्रहणं वा मोक्षो वा भवति इति ज्ञात्वा एवं फलं विचारयेत्। सप्तसु भागेषु प्रथम दिनभागे यदि अर्कस्य वा चन्द्रस्य वा ग्रहणं भवति चेत् सः भागः प्रथमाकाश भाग इत्यर्थः।

**सप्तानां आकाशभागानां फलविचारः**

१. <u>प्रथमाकाशभागः</u> - अस्मिन् भागे चन्द्रार्कौ यदि ग्रस्तौ भवतः चेत् तदा सुवर्णकारान्, गुणिनः, आश्रमवासिनः ब्राह्मणान् च हन्ति।

२. <u>द्वितीयाकाशभागः</u> - कृषिकारान्, वेदबाह्यान्, क्रयविक्रयकारान्, राज्ञः, सेनापतीन् च हन्ति।

३. <u>तृतीयाकाशभागः</u> - शिल्पिनः, शूद्रान्, म्लेच्छान्, मन्त्रिजनान्, निहन्ति।

४. <u>चतुर्थाकाशभागः</u> - अयं भागः साधारणतया मध्याह्ने भवति। मध्यदेशे यो राजा भवति तमेव पीडयति। धान्यस्य अर्धस्य च शोभनं भवति।

५. पञ्चमाकाशभागः - तृणभुजः, चतुष्पदान्, मन्त्रिणः, अन्तःपुरस्थराजदारान्, वैश्यान् च निहन्ति।

६. षष्ठाकाशभागः - स्त्रीजनान्, शूद्रजातीः, चोरान् च निहन्ति।

७. सप्तमाकाशभागः - अयं भागअस्तमय काले भवति। चोरान्, गह्वरवासिनश्च हन्ति।

विशेषफलविचारः -

यस्मिन् आकाशभागे मोक्षो भवति तस्मिन् प्रोक्तानां उपजीविप्रभृतीनां च श्रेयः भवति। यस्मिन् आकाशभागे प्रग्रहः मोक्षश्च भवति तदा तस्मिन् भागे यदुक्तंफलं तन्नभवति अर्थात् शुभाशुभमिश्रम फलं भवति।

**४.१६) राहोः कारणतः अयनफलस्य दिक्फलस्य विचारः**

मकरादि राशिषट्कस्थेऽर्के उत्तरायनम्। कर्कटादिराशिषट्कस्थे अर्के दक्षिणायनम् इति। उत्तरायने राहुणा दृष्टः अर्कः ब्राह्मणान् क्षत्रियान् हन्ति। तथा दक्षिणायने चेत् वैश्यान् शूद्रान् च हन्ति।

उत्तराद्यासु चतसृषु दिक्षु प्रदक्षिणेन राहुर्दृष्टश्चेत् ब्राह्मणदीन् हन्ति अर्थात् पूर्वस्यां दिशि दृष्टश्चेत् क्षत्रियान् हन्ति। दक्षिणस्यां दिशि दृष्टश्चेत् वैश्यान् पश्चिमायां चेत् शूद्रान् निहन्ति। अत्र यद्यप्यर्कचन्द्रयोः दक्षिणोत्तरदिग्भागात् प्रग्रहणं न सम्भवति। तथाप्याचार्येण पूर्वशास्त्रदृष्टत्वात् कृतम्।

**४.१७) मेषादिराशिषु ग्रस्तयोश्चन्द्रार्कयोः फलविचारः**

मेषराशौ - मेषसंस्थितः अर्को वा चन्द्रो वा यदि राहुणा ग्रस्तश्चेत् पाञ्चालजनाः कलिङ्गाः शूरसेनाः काम्बोजाः उड्राः किराताः तथा शस्त्रवृत्तयः अग्निवृत्तयः एते सर्वे पीडां पप्नुवन्ति।

वृषभराशौ - वृषभराशौ सूर्यो वा चन्द्रो वा राहुणा ग्रस्तः चेत् गोपालकाः पशवः गोमिनः( एषां गावः विद्यन्ते ते) मनुष्याः पूज्यतां प्राप्ताः जनाः ये सन्ति ते सर्वे पीडां प्राप्नुवन्ति।

मिथुनराशौ - मिथुनराशौ स्थितसूर्यचन्द्रौ ग्रस्तौ चेत् प्रधानश्रियः राजानः नृपसदृशाः (अमात्याः) प्राणिनः कलाविदः (चित्रगीतनृत्यवाद्याभिज्ञाः) यमुनानद्याः तीरे ये जातयः सन्ति ते च बाह्लिकजनाः तथा मत्स्याः सुह्मजनैः सहिताः एते सर्वे पीडां प्राप्नुवन्ति।

कर्कटकराशौ - कर्कटकराशौ यदि सूर्यचन्द्रौ ग्रस्तौः भवतः तदा राज्ञः जनांश्च पह्लवजनान् बाहुयुद्धज्ञान् मत्स्यान् शाकानपि पञ्चालान् अङ्गहीनान् एतान् सर्वान् जनान् पीडयति तथा अन्नं च निहन्ति।

सिंहराशौ - सिंहराशौ यदि अर्कचन्द्रौ ग्रस्तौ भवतः तदा निषाधजनाः तेषां समूहाः मेकलजनाः सत्वप्रदानाः राजन्यतुल्याः राजानः वनवासिनः एते सर्वे जनाः मरणं प्राप्नुवन्ति।

कन्याराशौ - कन्याराशौ यदि अर्कचन्द्रौ ग्रस्तौ भवतः चेत् तदा प्रसिद्धानि सस्यानि पण्डिताः लेखज्ञाः गेयतराः अश्मकाः जनाः त्रिपुरदेशाःजनाः शालियुतदेशाः (येषु धान्यानि बहूनि भवन्ति ते शालियुताः) एतादृशाः जनाः सर्वे मरणं प्राप्नुवन्ति।

तुलाराशौ - तुलाराशौ स्थितौ अर्कचन्द्रौ ग्रस्तौ भवतः चेत् तदा अवन्त्याः जनाः अपरन्त्याः जनाः सज्जनाः वणिजः किराटाः दशार्णजनाः इत्यादयः ये तिष्ठन्ति तान् मरुकच्छपाञनाश्च एतान् सर्वान् हन्ति।

वृश्चिकराशौ - वृश्चिकराशौ स्थितौ अर्केन्दू ग्रस्तौ भवतः चेत् तदा अलिन्याः उदम्बराः जनाः मद्राः चोलाः इत्यादयः ये तिष्ठन्ति तान् जनान् द्रुमान् यौधेयान् जनान् विषायुधीयान् एतान् सर्वान् हन्ति।

धनूराशौ - धनूराशौ स्थितौ सूर्यचन्द्रौ ग्रस्तौ भवतः चेत् तदा मन्त्रिणः प्रधानाः अश्वाः विदेहजनाः बाहुयुद्धज्ञाः पांचलजनाः वैद्याः क्रयविक्रयिणः क्रूराः आयुधवेत्तारः इत्यादयः ये सन्ति तान् सर्वान् हन्ति।

मकरराशौ - मकरराशौ स्थितौ सूर्यचन्द्रौ ग्रस्तौ भवतः चेत् तदा मत्स्याः सचिवाः अथवा सचिवानां कुलानि अधमकर्मकराः इत्यादीन् तथा मन्त्रेषु शैववैष्णवशौरेषु

औषधीषु च कुलान् वृद्धान् आयुधीयान् एतान् हन्ति।

कुम्भराशौ - कुम्भराशौ स्थितौ अर्कचन्द्रौ ग्रस्तौ भवतः चेत् तदा पर्वतमध्यजातान् जनान् पश्चिम दिग्भागजनान् भारोद्वहान् चौरान् आभीरान् दरदान् प्रधानजनान् सिंहपुरकान् बर्बरान् जनान् एतान् सर्वान् हन्ति।

मीनराशौ - मीनराशौ स्थितौ चन्द्रार्कौ ग्रस्तौ भवतः चेत् तदा समुद्रोत्पन्नानि द्रव्याणि रत्नादीन् वनोद्भवान् बुद्धियुक्तान् जलोपजीविनः एतान् हन्ति।

### ४.१८) सूर्यचन्द्रयोः दशग्रासानां फलविचारः

सूर्यचन्द्रयोः दशग्रासाः भवन्ति। ते क्रमशः सव्यः अपसव्यः लेहः ग्रसनं निरोधः अवमर्दनम् आरोहः आघ्रातम् मद्यतमः तमोऽन्त्यः इत्येवं प्रकाराः दश भवन्ति। चन्द्रग्रहणे आग्नेयां राहोरागमनं सव्यः ईशान्यां अपसव्यः भवति सूर्यग्रहणे वायुव्ये राहोरागमनं सव्यो भवति । नैऋत्यां अपसव्यो भवति।

सव्यः - सव्यगते राहौ चन्द्रस्य वा अर्कस्य वा दक्षिणभागगतप्लवनं सव्यो भवति। अयं भयरहितो भवति।

अपसव्यः - अपसव्यो नाम वामगर्तो राहौ चन्द्रार्कयोः प्लवनम्। अस्मिन् चोराणां पीडनैः प्रजानाशः भवति।

लेहः - चन्द्रस्य वा अर्कस्य वा परितः राहोः बिम्बं रसनयोपलीढमिव दृश्यते तदा सः ग्रासः लेह इति। तदा तत्र ग्रासे भूमिः समस्तभूताः जनाः हर्षिता भवन्ति। तदा वारिबाहुल्यं भवति।

ग्रसनम् - बिम्बार्थं वा त्रिभागो वा तमसा आच्छद्यते चेत् स ग्रासः ग्रसनमिति उच्यते। तस्मिन् ग्रासे अतिविभवयुक्तानां राज्ञां धननाशो भवति तथैव विभवयुक्तानां देशानां च पीडा भवति।

निरोधः - राहुसंमन्तः संच्छाद्य मध्यभागे धनतरं भूत्वा यदि तिष्ठेत् तदा सः ग्रासः निरोध इति ज्ञातव्यः। अयं ग्रासः सर्वभूतानां हर्षकृत् भवति।

अवमर्दनम् - राहुः समग्रमेव मण्डलं स्थगयित्वा यदि बहुकालं तिष्ठेत् तदा

अवमर्दनम् नाम ग्रासो भवति। अयं ग्रासः प्रधानान् नृपान् , प्रधानांश्च देशान् घातयेत्। ग्रहणे अतिक्रान्ते राहुः पुनः यदि तत् क्षणं च्छादयन् तिष्ठेत् तदा आरोहणं नाम ग्रासः भवति। तस्मिन् ग्रासे नृपाणां परस्परावमर्दनैः भीतिं करोति।

आघ्रातम् - एकस्मिन् स्थाने आदर्शमिव श्वासवायुना च उपरतः चेत् तदा सः ग्रासः आघ्रातमित्युच्यते। अस्मिन् ग्रासे जगतः शोभनं भवति वृष्टेः वृद्धिं च वहति।

मध्यतमः - राहुरन्तः यदि प्रविष्टः दृश्यते तर्हि परितः तमोरहितं भवति। तदा सः ग्रासः मध्यतमः भवति तस्मिन् ग्रसे मध्यदेशस्य विघातं भवति। कुक्षिरोगभयं च भवति। अस्य ग्रासस्य संस्थानं अर्कग्रहणे एव सम्भवति। चन्द्रग्रहणेच्छाद्यस्य अल्पत्वात् च्छादकस्य अधिकत्वात् ( भूच्छायायाः महत्वात्) न सम्भवति।

तमोऽन्त्यः - बिम्बपरिध्याः अन्तर्भागेषु अतिघनं मध्यभागे अतिस्वल्पं दृश्यते चेत् तदा सः ग्रासः तमोन्त्याख्यो भवति। सस्यानां इतयः भयं उपद्रवाश्च भवन्ति अस्मिन् ग्रासे।

### ४.१९) राहोः वर्णवशात् फलविचारः

राहुः शुक्लवर्णे यदि दृश्यते चेत् क्षेमं सुभिक्षं च भवति। ब्राह्मणानां च पीडा विनिर्दिशेत्।

अनलवर्णे राहुः अग्निभयं करोति सुवर्णकारादीनां पीडा च भवति।

हरितवर्णे राहु दृश्यते चेत् रोगप्राचुर्यं भवति । सस्यानां इतयः उपद्रवाश्च भवन्ति।

राहुः पिङ्गलवर्णे भवति चेत् तदा सत्वानाम् उष्ट्रादीनां तथा म्लेच्छानां दुर्भिक्षं च भवति।

राहुः अरुणरश्मिसदृशो भवति चेत् दुर्भिक्षं अवृष्टिश्च भवति। पक्षिणां च पीडा भवति।

धूम्रवर्णे राहु भवति चेत् क्षेमं सुभिक्षं च वक्तव्यम्। स्वल्पां च वृष्टिं आदिशेत्।

कपोतवर्णे तथा लोहितवर्णे अथवा रुणवर्णे वा कपिलवर्णे वा राहुर्भवति चेत् दुर्भिक्षं भयं च वक्तव्यम्। कृष्णवर्णश्च शूद्राणां पडा वहो भवति।

राहुः यदि विमलकमणेरिव पीतः अर्थात् नीलपीतो भवति तदा वैश्यहन्तको भवति सुभिक्षाय च भवति।

राहु ज्वालसदृशो भवति चेत् अग्निभयं भवति।

गैरिकसदृशः राहुः सङ्ग्रामान् कल्पयति।

दूर्वाकाण्डवत् राहुः श्यामो अतिपीतवर्णे वा भवति चेत् मारकं निर्दिशेत्।

राहुर्यदि पाटलपुष्पसदृशः श्वेतलोहितः भवति चेत् तदा अशनिभयं ददाति।

राहु विलोहितरूपः भवति चेत् क्षत्रियाणां नाशनं वृष्टेश्च नाशनं भवति।

बालरवेरिव कमलस्येव इन्द्रधनुषिरिव कान्तिं राहुः धारयति चेत् तदा युद्धानि भवन्ति

### ४.२०) अर्कचन्द्रयोः ग्रहदृष्टिफलविचारः

ग्रस्तं अर्कं बुधः यदि पश्यति तदा धृतमधुतैलानां राज्ञां च नाशाय भवति। यदि भौमः पश्यति चेत् तदा युद्धं अग्निप्रकोपः चौरभयं च भवति। शुक्रः यदि पश्यति चेत् तदा सस्य विनाशनं भूमौ अनेकान् कृच्छ्रान् उत्पादयति। शनिः यदि पश्यति चेत् अवर्षणं दुर्भिक्षं चौरभीतिं च करोति।

**शुभदृष्टेः विवरणम्** - उक्तमशुभं फलं सर्वं ग्रहणकाले गुरुणा अवलोकिते चेत् जलेन अग्निरिव शान्तिं उपयाति।

### ४.२१) ग्रस्तानां भौमादीनां फलविचारः

**भौमस्य फलम्** - यः ग्रहः अर्केन वा चन्द्रेण वा एकराशौ स्थितो भवति सः विक्षिप्तो न भवति। तदा छादनात् ग्रसे भवति इत्युच्यते। एवं अङ्गारकः ग्रस्तो भवति चेत् तदा अवन्तिकदेशजनपदाः तथा कावेरी नद्याः नर्मदायाश्च तीरप्रान्तेषु स्थितानां जनपदानां च तथा दर्पिष्टान् राज्ञः एतान् सर्वान् पीडयति।

**बुधस्य फलम्** - गङ्गायमुनयोर्मध्यं प्रान्तं सरयूनदीप्रान्तं नेपालदेशं पूर्वसमुद्रं च शोणानदः स्त्रियः राजानः सङ्ग्रामकुशलाः बालाः इत्यादयः ये सन्ति तान् सर्वान् पण्डितैस्सह

सर्वान् यदि बुधः ग्रस्तः चेत् घातयति।

**जीवस्य फलम्** - यदि बृहस्पतिः ग्रस्तो भवति चेत् तदा पण्डितानां राज्ञां सचिवानां गजानां अश्वानां च विनाशो भवति तथा सिन्धुर्नाम नदीतटवासिनः ये सन्ति तेषां सर्वेषां अपि तथा उदग्दिशं संश्रितानां जनानां च ध्वंस एव भवति।

**शुक्रस्य फलम्** - शुक्रः यदि राहुणा ग्रस्ते सति दाशेरकाः जनाः कैकेयाः सयौधेयाः आर्यावर्ताः शिबयः स्त्रयः मन्त्रिणः समूहाः इत्यादयः ये सन्ति ते सर्वे पीडयन्ति।

**शनेः फलम्** - शनैश्चरः यदि ग्रस्तो भवति चेत् मरुभूमौ उत्पत्तिः येषां भवति ते सर्वे तथैव पुष्करजनाः सौराष्ट्रिकाः धातुद्रव्याणि पर्वतनिवासिनः निकृष्टजनाः गोमिनः पार्यात्राः इत्यादयः ये सन्ति ते सर्वे क्षिप्रमेव नाशं गच्छन्ति।

### ४.२२) कार्तिकादिमासानां फलविचारः

कार्तीकमासः - अस्मिन् कार्तिकमासे राहुर्यदि दृश्यते चेत् तदा सुवर्णकार प्रभृतयः मगधजनाः पूर्वस्यां दिशि ये अधिपतयः सन्ति तानधिपतीन् तथा कोसलान् कल्माषान् सूरसेनान् तथा काशीजनान् एतान् सर्वान् उपतापयेत्। तथा कलिङ्गदेशीयः राजा भवति। तं मन्त्रिभिः सर्वकर्म करैः सह क्षिप्रं नाशयेत्। तथा राजन्यानां तापं ददाति । सुभिक्षं क्षेमं च उत्पादयति।

मार्गशीर्षमासः - मार्गशीर्षमासे राहुः दुष्टश्चेत् काश्मीरकान् जनान् कोसलांश्च पुण्ड्रैर्जनैः सहितान् अरण्यप्राणिनः अपरान्तकान् जनान् एतान् सर्वान् नाशयेत्। तथा ये सोमपाः सन्ति तान् च निहन्ति। शोभनां वृष्टिं च करोति । क्षेमं सुभिक्षं च करोति।

पुष्यमासः - पुष्यमासे राहुः यदि दृश्यते चेत् ब्राह्मणानां क्षत्रियाणां च उपद्रवो भवति। तथा सैन्धवाः कुकुराश्च तथा विदेहजनाः एते सर्वे विनाशं गच्छन्ति। तदा अल्पां वृष्टिं च दुर्भिक्षसहितं भयं च जानीयात्।

माघमासः - माघमासे राहुः यदि दुष्टो भवति चेत् मातृपितृभक्तान् तथा वसिष्ठगोत्रान् तथा स्वाध्याये पाठे धर्मे निरतान् हस्तिनः अश्वान् वङ्गान् अङ्गान् अपि काशीदेशे मनुष्यान् एतान् सर्वान् उपतापयति । तथा कृषिकराणां अभीष्टां वृष्टिं च करोति।

फाल्गुणमासः - फाल्गुणमासे ग्रहणं भवति चेत् वङ्गानां अश्मकानां अवन्तिकानां

मेकलानां उपतापजनकं भवति। तथा नाट्यविदां सस्यानां प्रवराङ्गनानां प्रधानमन्त्रीणां धनुष्कराणां शिल्पिनां क्षत्रियाणां तपस्विनां एषां सर्वेषां पीडाकरं भवति।

चैत्रमासः - चैत्रमासे अमावास्यां वा पौर्णम्यां वा राहु दृष्टश्चेत् तदा चित्रकाराः शिल्पिनः लिपिज्ञाः गीतरताः इत्यादयः ये सन्ति एतान् तथा वेश्याजनाः वेदपाठकाः सुवर्णविक्रयिनः इत्येतानपि तथैव पौण्ड्रजनाः औड्राः कैकयाः एतान् सर्वान् अश्मकाश्च एतादृशान् सर्वान् जनान् सन्तपः स्पृशति। अस्मिन् वर्षे इन्द्रः नानाप्रकारं वृष्टिं वर्षति। क्वचित् न वर्षति क्वचित् वर्षति इत्यर्थः।

वैशाखमासः - वैशाखमासे राहुणा ग्रहणं भवति चेत् तिलाः मुद्गसहिताः विनाशं गच्छन्ति तथा इक्ष्वाकवः जनाः यौधेयाः शककलिङ्गाः उपद्रवसहिताः भवन्ति। किन्तु अस्मिन् ग्रहणे सुभिक्षं च भवति।

ज्येष्टमासः - ज्येष्टमासे ग्रहणे राजानः ब्राह्मणाः राजस्त्रियः प्रसिद्धानि सस्यानि वृष्टिः महासमूहाश्च एते सर्वे नाशमायान्ति तथा च उत्तरदिग्वासिनः साल्वैः समेतः प्रणिधातकानां समूहाः इत्यादयः प्रध्वंसनं आयान्ति।

आषाढमासः - आषाढमासे ग्रहणे जलधारः वापीकूपतटाकादिः नदीप्रवाहः पुलिनः फलमूलवार्ताः तथा गान्धारजनाः काश्मीरजनाः पुलिन्दाः चीनाः एतान् सर्वान् पीडयति। अस्मिन् पर्वणि मण्डलवर्षं भवति।

श्रावणमासः - श्रावणमासे ग्रहणं दृष्टश्चेत् काश्मीरान् जनान् चीनान् यवान् तथा कुरुक्षेत्रजान् गान्धारान् मध्यदेश सहितान् सर्वान् नाशयेत्। तथा काम्बोजान् अश्वगर्भदान् शारदधान्यादिकान् अपि हन्ति। यथोक्तान् इमान् काश्मीरान् त्यक्त्वा अन्यत्र देशेषु प्रभूतेन अन्नेन ये हृदाः नराः सन्ति तैः भूमिं व्याप्तां करोति।

भाद्रपदमासः - भाद्रपमासे राहुरागतश्चेत् कलिङ्गान् वङ्गान् मगधान् सौराष्ट्रान् म्लेच्छान् सौवीरान् दरदान् अश्मकान् एतान् सर्वान् घातयति। केचित् दरदाञ्छकान् इत्यपि पठन्ति। तथा स्त्रीणां गर्भान् निहन्ति। सुभिक्षं करोति।

आश्वयुजमासः - राहु आश्वयुजमासे दृष्टश्चेत् काम्बोजान् चीनान् यवान् एतान्

सर्वान् व्रणचिकित्सकैश्च तथा बाह्लिकान् तथा सिन्धुनद्याः तीरे ये निवसन्ति तान् च घातयति। तथा आनर्त्ता पौण्ड्राः भिषजः किराताः एतान् नाशयेत्। तथा भूरि सुभिक्षकृच्च भवति।

### ४.२३) अर्कशशिनोः दशमोक्षणां फलविचारः

अर्कशशिनोः ग्रहणानन्तरं मोक्षः दशप्रकारेषु भवति। ते दशप्रकाराः दशमोक्षाः इत्युच्यन्ते। तान्यथा -

| | |
|---|---|
| १. दक्षिणहनुः | २. वामहनुः |
| ३. दक्षिणकुक्षिः | ४. वामकुक्षिः |
| ५. दक्षिणपायुः | ६.वामपायुः |
| ७. संछर्दनम् | ८. जरणम् |
| ९. मध्यविदारणम् | १०.अन्त्यविदारणम् इति |

१.दक्षिणहनुभेदस्य लक्षणं फलं च - चन्द्रस्य पूर्वदक्षिणस्यां दिशि अर्थात् आग्नेय्यां दिशि ग्रहणस्य निवर्तनं भवति चेत् तदा स मोक्षो दक्षिणहनुसंज्ञितो भवति। चन्द्रग्रहणमत्रोपलक्षणार्थं अर्कस्यापि यतो वक्ष्यति। एते सर्वे मोक्षाः भास्करस्यापि वक्तव्या इति अस्मिन् मोक्षे सस्यनाशो भवति तथा वदनपीडा नृपस्य पीडा च भवति सुवृष्टिश्च भवेत्।

२.वामहनुभेदस्य लक्षणं फलं च - पूर्वोत्तरस्यां दिशि अर्थात् ईशान्यां दिशि राहोरागमनं यदि भवति तदा स वामहनुभेदो नाम मोक्षः भवति। स च नृपपुत्राणां भयदायी भवति। तस्मिंश्च मोक्षे वक्त्रपीडा शस्त्रभयं संग्रामभीतिं च जानीयात् तथैव सुभिक्षं च भवति।

३.दक्षिणकुक्षिभेदस्य लक्षणं फलं च - दक्षिण भागेन यदि मोक्षो भवेत् स दक्षिण कुक्षिभेदो नाम मोक्षः तस्मिन् मोक्षे राजसुतानां पीडा भवति। तथा दक्षिणदिक्स्थाः शत्रवोऽभियोज्याः एतदौत्पातिकम्। यतः गणिगोलवसनया दक्षिणोत्तरयोर्दिशोर्ग्रासमोक्षौ न भवतः कदाचिदपि आचार्येण पूर्वशास्त्रानुसारेणोक्तम्।

४. वामकुक्षिभेदस्य फलं लक्षणं च - उत्तरस्यां दिशि राहुः यदि संस्थितो भवति

तदा स वामकुक्षिभेदो नाम मोक्षः तस्मिन् मोक्षे स्त्रीणीं गर्भविनाशो भवति। तथा सस्यानि मध्यानि भवन्ति अर्थात् नाल्पानि न बहूनि इति।

५.दक्षिणपायुभेदस्य लक्षणं फलं च - नैऋत्यां अर्थात् दक्षिण पश्चिमायां दिशि व्यवस्थिते तमसि दक्षिणपायुभेदः पायुशब्देन अपानस्थानमित्युच्यते अतः गुदरोगो भवति स्वल्प वृष्टिश्च भवति।

६.वामपायुभेदस्य लक्षणं फलं च - वायव्ये दिशि अर्थात् पश्चिमोत्तरस्यां दिशि अवस्थिते तमसि वामपायुभेदः। अस्मिन् भेदे गुह्यरोगं वा लिङ्गरोगं वा भवति तथा राजपत्न्याः मरणं च भवति।

७.संछर्दनभेदस्य लक्षणं फलं च - पूर्वस्यां दिशि प्रग्रहणं कृत्वा पूर्वस्यामेव यद्यपसर्पेत स मोक्षः संछर्दनमिति उच्यते। एतच्च लोकस्य क्षेमप्रदं सस्यप्रदं तुष्टिप्रदं च भवति।

८. जरणभेदस्य लक्षणं फलं च - यस्मिन् ग्रहणे पूर्वस्यां दिशि प्रग्रहणं कृत्वा पश्चिमायां दिशि अपसर्पणं भवति तदा सः जरणं नाम मोक्षो भवति । तस्मिन् मोक्षे जनाः क्षुच्छस्त्रभयोद्विग्नाः भवन्ति। दुःखिता भूत्वापि शरणं न प्राप्नुवन्ति।

९.मध्यविदारणभेदस्य लक्षणं फलं च - बिम्बस्य मध्यभागे यदि प्रकाशः स्थित्वा रितः तमो भवति तर्हि सः मोक्षः मध्यविदरणं नाम मोक्षः। एतदपि औत्पातिकम्। यतो इदं गणितगोल विरुद्धं भवति इदं राजगृहे कोपकरं तथा सुभिक्षं ददाति नातिवृष्टिकरं भवति।

१०. अन्त्यविदारणभेदस्य लक्षणं फलं च - बिम्बान्तरभागेषु यदि निर्मलत्वं भवति मध्यभागे बहुलतमो भवति चेत् तथा सः अन्त्यविदरणाख्यो मोक्षः। अस्मिन् मोक्षे मध्यदेशः विनश्यति। तथा सस्यानां च क्षयो भवति। एतदप्यौत्पातिकम्। यतः गणितगोलविरुद्धमिति।

भास्करस्यापि ज्ञेयः - एते सर्वे मोक्षाः ये चन्द्रमस्युक्तास्ते सर्वे सूर्येऽपि कथनीयाः। किन्तु अत्र अयं विशेषः यथा चन्द्रे पूर्वादिक् तथा आदित्ये पश्चिमादिक् कल्या । एतदुक्तं भवति आदित्यस्य पश्चिमादिक् पूर्वा, पूर्वा च पश्चिमा। दक्षिणा उत्तरा। उत्तरा च दक्षिणा विदिशश्चानेनैव वैलोम्येन परिकल्प्य चन्द्रवत् मोक्षाः वाच्याः इति।

## ४.२४ ) प्रश्नावली

**१. संक्षेपेण लिखत** **५*५=२५**

१. भूच्छायायाः लक्षणं लिखत ?
२. अर्कचन्द्रयोः विषाणताविषये विचारयत?
३. ब्रह्मादीनां सप्तपर्वाणां नामानि लिखत ?
४. सूर्यचन्द्रयोः ग्रासाः के ?
५. अर्कशशिनोः दशमोक्षाणां नामानि लिखत ?

**२. विस्तारेण उत्तरं लिखत** **१०*१०=१००**

१. राहोः ग्रहत्व प्रतिपादनाय मतान्तराणि प्रतिपादयत ?
२. राहोः ग्रहत्व विषये पराशरेण किमुक्तं इति विवेचयत ?
३. प्रतिमासं किमर्थं चन्द्रस्य ग्रहणं न भवति विचारयत ?
४. चन्द्रग्रहणं सर्वत्र एकरूपं दृश्यते अर्कग्रहणं तु भिन्नरूपेण दृश्यते किमर्थमिति विचारयत ?
५. ग्रहणे ग्रासप्रमाण दिग्ज्ञानवेलाज्ञानानां विचारं कुरुत ?
६. वेलहीने अतिवेले च पर्वणि फलानि कानि विचारयत ?
७. एकस्मिन्नेन मासे अर्कचन्द्रयोः ग्रहणयोः फलानि चर्चयत ?
८. ग्रस्तोदितयोः ग्रस्तास्तमितयोः चन्द्रार्कयोः फलानि विवेचयत ?
९. राहोः कारणतः अयन फलस्य दिक् फलस्य च विचारं कुरुत ?
१०. राहोः वर्णवशात् फलानि कानि विशदयत ?

**३. व्याख्यात** **२०*११=२२०**

१. राहोः ग्रहत्वप्रतिपादने मतान्तराणि लिखित्वा वराहमिहिरेण कृतपरमतखण्डनं लिखत ?
२. अर्के न्दोः ग्रहणे वराहमिहिरस्य सिद्धान्तः कः विशदयत ?
३. गर्गादिभिरुक्त ग्रहणज्ञाननिमित्तानि चर्चयत ?
४. ब्रह्मादीनां सप्तानां पर्वाणां समग्रविचारं कुरुत ?
५. उदयात्प्रभृति अस्तमयं यावत् दिनस्थयोः चन्द्रसूर्ययोः सप्तषु आकाशभागेषु फलानि समग्रतया विचारयत ?
६. मेषादिराशिषु ग्रस्तयोः अर्कचन्द्रयोः फलानि विचारयत ?
७. सूर्यचन्द्रयोः दशग्रासानां फलानि विचारयत ?
८. अर्कचन्द्रयोः ग्रहदृष्टि फलविचारं कुरुत ?
९. ग्रस्तानां भौमादीनां ग्रहाणां फलानि विचारयत ?
१०. कार्तिकादि मासानां फिलानि विचारयत ?
११. अर्कशशिनोः दशमोक्षाणां फलानि चर्चयत ?

# संरचना

५. पञ्चमोऽध्यायः

५.१) अवतरणिका

५.२) उद्धेश्यानि

५.३) भौमस्य पंचमुखानां लक्षणानि फलानि च

५.३.१) उष्णमुखस्य लक्षणं फलं च

५.३.२) अश्रुमुखस्य फलं लक्षणं च

५.३.३) व्यालमुखस्य लक्षणं फलं च

५.३.४) रुधिरमुखस्य लक्षणं फलं च

५.३.५) असिमुशलमुखस्य लक्षणं फलं च

५.४) कुजस्य वक्रगतेः फलविचारः

५.५) कुजस्य वार्षिकनक्षत्रेषु फलविचारः

५.६) भौमस्य वर्णलक्षणफलविचारः

५.७) प्रश्नावली

# ५. पञ्चमोऽध्यायः

## ५.१) अवतरणिका

समस्तजगतः शुभाशुभफलविषयान् ज्ञातुं बहवः मार्गाः सन्ति तेष्वन्यतमः ग्रहचारो भवति। ग्रहाणां चारवशात् कदावृष्टिर्भवति, कदा उपद्रवो भवति, कदा भूकम्पादयो भवन्ति इत्येवं कस्मिन् देशे अरिष्टादयो वा शुभफलानि वा कदा कथं भवन्ति इत्यपि ज्ञातुं शक्यते। प्रत्येकं ग्रहस्य तथैव अगस्त्यस्य सप्तर्षीणां ज्योतिर्मयस्वरूपाणां चारवशात् एतत् सर्वं पृथक् पृथक् ज्ञातुं शक्यते। अस्मिन्नध्याये भौमस्य चारवशात् कथं कीदृशं फलं भवति इति प्रदर्श्यते।

# ५.२) उद्धेश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* भौमस्य पंचमुखानां लक्षणानि फलानि च वक्तुं समर्थो भवति।

* कुजस्य वक्रगतेः फलविचारं कर्तुं शक्नोति।

* कुजस्य वार्षिकनक्षत्रेषु फलविचारं कर्तुं शक्नोति।

* नक्षत्रेषु उदितस्य कुजस्य फलानि लेखितुं समर्थो भवति।

* भौमस्य वर्णलक्षणफलविचारं कर्तुं समर्थो भवति।

## ५.३) भौमस्य पंचमुखानां लक्षणानि फलानि च

भौमस्य पंचमुखानि कथितानि । तानि यथा -

१. उष्णम् २. अश्रु ३. व्यालम् ४. रुधिरम् ५. असिमुशलम् इति उच्यन्ते। एतेषां पंचानां मुखानां लक्षणानि फलानि च एवं कथ्यते।

**५.३.१) उष्णमुखस्य लक्षणं फलं च** - अङ्गारकः यस्मिन् नक्षत्रे स्थित्वा आदित्यमण्डलात् उदेति तत् उदयनक्षत्रं भवति। तस्मात् उदयनक्षत्रात् सप्तम अष्टम नवम नक्षत्रेषु कुजः यदि प्रतीपगमनं करोति अर्थात् वक्रं गच्छति तदा तद्वक्रं उष्णमुखमित्युच्यते। तच्च भौमस्य उदये रविमण्डलात् पुनरपि निर्गमे सुवर्णकारलोहकारादीनां पीडाकरं भवति। वक्रादनन्तरं यदा अर्कमण्डले अस्तमेष्यति तदा एतत् फलं एषां सर्वेषां ज्ञेयम्।

**५.३.२) अश्रुमुखस्य फलं लक्षणं च** - उदयनक्षत्रात् द्वादशे नक्षत्रे वा एकादशे नक्षत्रे वा अथवा दशमे नक्षत्रे वा यदि अङ्गारको वक्रिते सति अश्रुमुखुमति उच्यते। तच्चोदये पुनरर्कमण्डलनिर्गमने मधुराम्ललवणतिक्तकटुकषायान् इत्यादि रसान् सदोषान् करोति तेषां रसानां भक्षणेन नराणां पीडा भवति। एवं रोगान् करोति। वृष्ट्यभावं च करोति।

**५.३.३) व्यालमुखस्य लक्षणं फलं च** - उदयनक्षत्रात् त्रयोदश नक्षत्रे वा चतुर्दश नक्षत्रे वा यदि कुजः वक्रिते सति तत् व्यालं नाम मुखम् भवति। अस्मिन् मुखे सूकरकुक्कुरादयः सर्पाः मृगाः इतर अरण्यजन्तवः ये सन्ति तेभ्यः लोकानां पीडा भवति। सुभिक्षं च भवति।

**५.३.४) रुधिरमुखस्य लक्षणं फलं च -** उदयनक्षत्रात् पंचदशनक्षत्रे षोडशनक्षत्रे वा वक्रिते अङ्गारके रुधिरमुखं इति उच्यते। यावत् कालं एतत् वक्त्रं तिष्ठन्ति तावत् कालं मुखरोगं भवति सुभिक्षं उत्पादयति च।

**५.३.५) असिमुशलमुखस्य लक्षणं फलं च** - उदयनक्षत्रात् सप्तदशनक्षत्रे वा अष्टादश नक्षत्रे वा अङ्गारको वक्रिते सति तद्वक्त्रं असिमुशलमित्युच्यते। एतस्मिन् वक्त्रे चोरसंघेभ्यः प्रजानां पीडा भवति। तथा अवृष्टिं शस्त्रभयं च करोति।

## ५.४) कुजस्य वक्रगतेः फलविचारः

कुजस्य वक्रगतेः फलं भवति इति बहुविधैः आचार्यैः प्रतिपादितम्। अत्र आदौ यदि कुजः पूर्वाफल्गुनी वा उत्तराफल्गुनी वा एतयोः द्वयोः नक्षत्रयोः उदयं प्राप्य उत्तराषाढ रोहिणी एतयोः द्वयोः नक्षत्रयोः वक्री। भवति चेत् लोकत्रयस्य विनाशकरो भवति तथैव प्रजापत्येः नाशकरः भवति अत्र फलमपि पृथक् उक्तम् उत्तराषाढायां यदि वक्री भवति चेत् तदा प्रजापत्येः विनाशं वक्तव्यम् रोहिण्यां अस्तंगतश्चेत् तदा त्रीनपि भूर्भुवस्सुवरारन्यान् लोकान् निपीडयति इति वक्तव्यम्।

यथा -

**भाग्यार्यमोदितो यदि निवर्तते वैश्वदैवतेभौमः।**

**प्रजापत्येऽस्तमितस्त्रीनपि लोकान्निपीडयति।।**

एवमेव यदि कुजः श्रवणानक्षत्रे उदयं प्राप्य पुष्यम्यां वक्री भवति चेत् राज्ञां हनिः भवति। तथा यस्मिन् दिशि उदितः तस्मिन् दिशि स्थितदेशस्य राज्ञः भयोत्पन्नं करोति।

यथा -

**श्रवणोदितस्य वक्रं पुष्ये मूर्द्धाभिषिक्तपीडाकृत्।**

**यस्मिन्नृक्षेऽभ्युदितस्तद्दिग्व्यूहान् जनान् हन्ति।।**

एवमेव यदि कुजः मखानक्षत्रे उदयं प्राप्य तस्मिन्नेव वक्री भवति चेत् अवृष्टिः शस्त्रभयं तथा पाण्डुदेशस्य राज्ञः मरणभयं च भवति।

यथा -

**मध्ये न यदि मोघानां गतागतं लोहितः करोति ततः।**

**पाण्ड्योनृपो विनश्यति शस्त्रोद्योगाद्भयमवृष्टिः।।**

यदि कुजः मघयोगतारकाभेदं कृत्वा विशाखाम् अपि भेदं करोति। तदा दुर्भिक्षं करोति। यदि रोहिणीं अपि भित्वा याति तदा जनानां तीव्रं मारकं करोति।

यथा -

**भित्वा मघाविशाखां भिन्दन् भौमः करोति दुर्भिक्षम्।**

**मारकं करोति घोरं यदि भित्वा रोहिणीं याति।।**

एवमेव यदि कुजः उत्तराफल्गुणी उत्तराषाढा उत्तराभाद्रा रोहिणी मूला श्रवण मृगशिर इत्यादिषु नक्षत्रेषु चलन् रोहिणीतः दक्षिणभागे गच्छतिचेत् अनावृष्टिः भवति।

यथा -

**दक्षिणतो रोहिण्याश्चरन्महीजोऽर्थवृष्टिनिग्रहकृत्।**

**धूमायन् स शिखो वा विनिहन्यात् पारियात्रस्थान्।।**

## ५.५) कुजस्य वार्षिकनक्षत्रेषु फलविचारः

अङ्गारकः रोहिण्यां श्रवणे मूले उत्तराफल्गुणि उत्तराषाढाउत्तराभाद्रासु ज्येष्टायां वा एतेषु एकतमे विचरन् मेघवृन्दानां विनाशकर्ता भवति।

यथा -

**प्रजापत्ये श्रवणे मूले त्रिषुचोत्तरेषु शाक्रे च ।**

**विचरन् घननिवहानामुपघातकरः क्ष्मातनयः।।**

## नक्षत्रेषु उदितस्य कुजस्य फलविचारः

अङ्गारकस्य श्रवणे मघायां पुनर्वसौ हस्ते मूले पूर्वाभाद्रपदायां अश्विन्यां विशाखायां रोहिण्यां च एतेषु नक्षत्रेषु चारोदयाः शोभनाः भवन्ति। अर्थात् पूर्वोक्त अशुभफलं अत्र न भवति। यथा -

**चारोदयाः प्रशस्ताः श्रवणमघादित्यहस्तमूलेषु।**

**एकपदाश्विविशाखाप्रजापत्येषु च कुजस्य।।**

## ५.६) भौमस्य वर्णलक्षणफलविचारः

अङ्गारकः विमलमूर्तिः अर्थात् विस्तीर्मनिर्णलमूर्तिः तथा किंशुकाशोकवर्णः अर्थात् पुष्पविशेषः अतिलोहितसदृशवर्णः तथा स्फुटरुचिरमयूख अर्थात् स्पष्टदीप्तमन्तः रश्मियुतः तथा तप्ततामप्रभासः अर्थात् तप्तस्य ताम्रस्य यादृशी प्रभा वर्तते तादृशी प्रभायुतः वा भूत्वा यस्मिन् कस्मिन् अपि नक्षत्रे स्थित्वा उत्तरभागे यदि याति तदा

राज्ञां श्रेयस्करो भवति। तदा प्रजानां लोकानां च तुष्टिदो भवति।

यथा -

**विपुलविमलमूर्तिः किंशुकाशोकवर्णः**
**स्फुटरुचिरमयूखस्तत्पताम्रप्रभाभः**
**विचरति यदिमार्गं चोत्तरं मेदिनीजः**
**शुभकृदवनिपानां हार्दिदश्च प्रजानाम्।**

# ५.७) प्रश्नावली

**१. संक्षेपेण लिखत** **५*२= १०**

१. भौमस्य पञ्चमुखानां नामानि लिखत ?
२. वार्षिकनक्षत्रेषु कुजस्य फलानि लिखत ?

**२. विस्तरेण उत्तरं लिखत** **१०*३=३०**

१. कुजस्य वक्रगतेः फलानि चर्चयत ?
२. नक्षत्रेषु उदितस्य कुजस्य फलं विचारयत ?
३. भौमस्य वर्णलक्षण फलान् विचारयत ?

**३. व्याख्यात** **२०*२=४०**

१. भौमस्य पंचमुखानां लक्षणानि फलानि च विस्तरेण व्याख्यात ?
२. कुजस्य वक्रगतिवशात् कानि कानि शुभाशुभफलानि भवन्ति इति प्रतिपादयत?

# संरचना


६. षष्ठोऽध्यायः

६.१) अवतरणिका

६.२) उद्देश्यानि

६.३) उदितस्य बुधस्य फलविचारः

६.४) नक्षत्रावस्थितस्य बुधस्य फलविचारः

६.५) बुधस्य सप्तगतीनां लक्षणफलविचारः

६.६) पराशरमते बुधस्य सप्तगतीनां विचारः

६.७) बुधस्य गतिचतुष्टयस्य लक्षणफलविचारः

६.८) बुधस्योदयास्तमययोः शुभाशुभलक्षणफलविचारः

६.९) बुधस्य बिम्बलक्षणफलविचारः

६.१०) प्रश्नावली

# ६. षष्ठोऽध्यायः

## ६.१) अवतरणिका

समस्तजगतः शुभाशुभफलविषयान् ज्ञातुं बहवः मार्गाः सन्ति तेष्वन्यतमः ग्रहचारो भवति। ग्रहाणां चारवशात् कदावृष्टिर्भवति, कदा उपद्रवो भवति, कदा भूकम्पादयो भवन्ति इत्येवं कस्मिन् देशे अरिष्टादयो वा शुभफलानि वा कदा कथं भवन्ति इत्यपि ज्ञातुं शक्यते। प्रत्येकं ग्रहस्य तथैव अगस्त्यस्य सप्तर्षीणां ज्योतिर्मयस्वरूपाणां चारवशात् एतत् सर्वं पृथक् पृथक् ज्ञातुं शक्यते। अस्मिन्नध्याये बुधस्यचारवशात् कथं कीदृशं फलं भवति इति प्रदर्श्यते।

# ६.२) उद्देश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* उदितस्य बुधस्य फलविचारं कर्तुं शक्नोति

* नक्षत्रावस्थितस्य बुधस्य फलविचारं कर्तुं समर्थो भवति

* बुधस्य सप्तगतीनां लक्षणफलानि प्रतिपादयितुं समर्थो भवति

* पराशरमते बुधस्य सप्तगतीनां विचारं कर्तुं शक्नोति

* बुधस्य गतिचतुष्टयस्य लक्षणफल विचारं कर्तुं शक्नोति

* बुधस्य उदयास्तमययोः शुभाशुभलक्षणफल विचारं कर्तुं समर्थो भवति

* बुधस्य बिम्बलक्षणफलविचारं कर्तुं समर्थो भवति

**६.३) उदितस्य बुधस्य फलविचारः**

बुधः उत्पातविरहितो न कदाचितदपि उदयं गच्छति। अपि तु यदा यदा उद्गच्छति तदा तदा सोत्पातरूपएवेति। अयं उदयन्नेव जलं अग्निः वायुः एभ्यः भयं करोति। तथा धान्यस्य क्षयं च करोति।

यथा -

**नोत्पातपरित्यक्तः कदाचिदपि चन्द्रजोव्रजत्युदयम्।**

**जलदहनपवनभयकृत् धान्यार्घक्षयविवृद्धौ वा।।**

**६.४) नक्षत्रावस्थितस्य बुधस्य फलविचारः**

यदि बुधः श्रवणं धनिष्ठा रोहिणी मृगशिरः उत्तराषाढा इत्यादिषु नक्षत्रेषु विचरन् भेदं वा करोति तदा अवर्षणं रोगभयं च करोति। अत्र भेदनं श्रवणमध्यात् केषांचित् सम्भवति केषांचित् न सम्भवति इति पूर्वशास्त्रानुसारेण आचार्यैः उक्तम्

यथा -

**विचरन् श्रवणधनिष्ठा प्रजापत्येन्दुवैश्वदेवानि।**

**मृद्नन् हिमकरतनयः करोत्यवृष्टिं सरोगभयम्।।**

बुधः आर्द्रादिषु पञ्च नक्षत्रेषु ( अर्थात् आर्द्रा पुनर्वसु पुष्य आश्लेषा मघासु) यदा विचरति तदा प्रजानां शस्त्रानिपातेन दुर्भिक्षभीत्या, रोगैः अवर्षणेन च पीडा भवति।

यथा -

**रौद्रादीनि मघान्तान्युपास्रिते चन्द्रजे प्रजापीडा।**

**शस्त्रनिपातक्षुद्भयरोगानावृष्टिसन्तापैः।**

यदि बुधः हस्तादीनि षट् नक्षत्राणि ( अर्थात् हस्त चित्र स्वाण्ति विशाखा अनुराधा ज्येष्ठा इत्यादीनि) भिन्दन् तिष्ठति तदा गाः हन्ति । तैलघृतानां मधुरादीनां अर्घानां च वृद्धिं करोति। तथा भूमिं पर्याप्तसस्यां करोति।

यथा -

**हस्तादीनि चरन् षड्ऋक्षाण्युपपीडयन् गवामशुभः।**

**स्नेहरसार्घविवृद्धिं करोति चोर्वीं प्रभूतान्नाम्।।**

बुधः उत्तरा भाद्रा उत्तराफल्गुनी कृत्तिका भरणी इत्यादि नक्षत्रेषु यदा चरति तदा देहिनां धातुक्षयं करोति ( अर्थात् वासासृङ्मांसमेदास्थिमज्ज्ञाशुक्राणि धातवः इति)

यथा -

**आर्यम्णं हौतभुजं भद्रपदामुत्तरां यमेशं च।**

**चन्द्रस्य सुतो निघ्नन् प्राणभृतां धातुसंक्षयकृत्॥**

बुधः अश्वनी शतभिषक् मूलारेवती इत्यादिषु नक्षत्रेषु यदा चरति तदा वणिक् प्रभृतीनां वैद्यानां नाविकानां जलोत्पन्नद्रव्याणां (मुक्ताफलादीनां) अश्वानां च नाशकर्ता भवति।

यथा -

**आश्विनवारुणमूलन्युपमृद्नन् रेवतीं च चन्द्रसुतः।**

**षण्यभिषग्गौ जीविकसलिलजतुरगोपघातकरः॥**

बुधः पूर्वाफल्गुनी पूर्वाषाढा पूर्वाभाद्र इत्यादि पूर्वत्रयाख्ये नक्षत्रेषु यदा चरति तदा लोकस्य दुर्भिक्षेण संग्रामैः चोरैः रोगैः च भीतिं ददाति।

यथा -

**पूर्वाद्युक्षत्रितयादेकमपीन्दोः सुतोऽभिमृद्नीयात्।**

**क्षुच्छस्त्रतस्करामय भयप्रदायीं चरन् जगतः॥**

## <u>६.५) बुधस्य सप्तगतीनां लक्षणफलविचारः</u>

एवमेव बुधचारवशात् जगतः शुभाशुभफलं ज्ञातुं बुधस्य सप्तगमयः भवन्ति। तेषां गतीनां द्वारा अपि जगतः शुभाशुभफलं बहुभिःपूर्वाचार्यैः उक्तम्। तान्यथा -

१. प्राकृता - २. विमिश्र - ३. संक्षिप्ता - ४. तीक्ष्णा - ५. योगान्तिका - ६. घोरा - ७. पापा एताः बुधस्य सप्तगतयः। एतास्सर्वाः परशरतन्त्रे कीर्तिताः।

<u>१. प्राकृता</u> - स्वाती भरणी रोहिणी कृत्तिका इत्यादीनां नक्षत्राणां अन्यतये स्थितः बुधः प्राकृतगत्या स्थितो भवति।

<u>२. विमिश्रा</u> - मृगशिरः आर्द्रा मघ आश्लेष एतेषु नक्षत्रेषु स्थितस्य बुधस्य गतिः

विमिश्रा भवति।

३. संक्षिप्ता - पुष्यमि पुनर्वसु पूर्वाफल्गुनि उत्तराफल्गुनि एतेषु नक्षत्रेषु स्थितस्य बुधस्य गतिः संक्षिप्ता इत्युच्यते।

४. तीक्ष्णा - पूर्वाभाद्र उत्तराभाद्र ज्येष्ठा अश्वनी रेवती एतेषु नक्षत्रेषु स्थितस्य बुधस्य गतिः तीक्ष्णागतिः भवति।

५. योगान्तिका - मूला पूर्वाषाढ उत्तराषाढ एतेषु नक्षत्रेषु स्थितस्य बुधस्य गतिः योगान्तिकागतिः इति उच्यते।

६. घोरा - श्रवणं चित्रा धनिष्ठा शतभिषक् एतेषु नक्षत्रेषु सिस्थतस्य बुधस्य गतिः घोरा इत्युच्यते।

७. पापा - हस्ता अनुराधा विशाखा एतेषु नक्षत्रेषु स्थितस्य बुधस्य गतिः पापा इत्युच्यते।

### ६.६) पराशरमते बुधस्य सप्तगतीनां विचारः

बुधस्य सूर्यमण्डलात् निर्गमः प्रवासः तत्रैव अस्तमयो भवति। एतान् कर्तुं यानि दिनानि अपेक्षन्ते तेभ्यः दिनेभ्यः गतिलक्षणमेवमुक्तवान्। प्रकृतायां गतौ यदि बुधः उदेति तदा चत्वारिंशत् दिनानि उदितैव तिष्ठति। अथवा अस्तमेति तदा चत्वारिंशत् दिनानि अस्तमित एव तिष्ठति । एवं विमिश्रायां त्रिंशत्। संक्षिप्तायां द्वाविंशति। तीक्ष्णायां अष्ठादश। योगान्तिकायां नव। घोरायां पञ्चदश। पापाख्यां च एकादश दिनानि अपेक्षन्ते इति यद्यपि गणितवासनैः तन्नोत्पद्यते तथापि पराशरमङ्गीकृत्याऽऽचार्येणोक्तम्।

**एतासां फलानि** - प्रकृतगत्यां स्थितोबुधः आरोग्यं वृष्टिं सस्यानां वृद्धिं करोति। तथा लोके क्षेमं च भवति।संक्षिप्तमिश्रयोः द्वयोः गत्योः एतदेव फलं भवति। अन्यासु तीक्ष्णयोगान्तघोरपापाख्यासु विपरीतं फलं भवति। अर्थात् अनारोग्यं अनावृष्टिः सस्यानां अवृद्धिः अक्षेमम् इति।

### ६.७) बुधस्य गतिचतुष्टयस्य लक्षणफलविचारः

या स्वाभाविकी गतिः सा ऋज्वी। कुटिलगतित्वमाश्रित्य तन्मध्ये ग्रहस्य यदा भुक्त्यभावो भवति तदा अतिवक्रागतिरुच्यते। ऋजुं मार्गं परित्यज्य निवृत्तिं करोति

सा वक्रा। या वैकारिकीन्यूनागतिः सा विकला। देवलमते न केवलं ऋज्व्यतिवक्रावक्राः विकला इति चतुर्था गतिरपि वर्तते। एता एव देवलमते उक्ता चतस्रोगतयः।

यथा -

**ऋज्व्यतिवक्रावक्रा विकला च मतेन देवलस्यैताः।**

**पञ्चचतुर्द्व्येकाहा ऋज्व्यादीनां षड्भ्यस्ताः।**

**आसां प्रमाणानि** - पञ्चचतुर्द्व्येकाहा षड्भ्यस्ताः ऋज्व्यादीनां प्रमाणानि । उदयप्रवासदिवसैरिति अनुवर्तते। पञ्चचतुर् द्वि एकाः षड् गुणिताः त्रिंशदादीनि भवन्ति। एतानि ऋज्व्यादीनां क्रमेण प्रमाणानि भवन्ति।

१. ऋज्वी गत्यां ३० दिनानि ।

२. अतिवक्रा गत्यां २४ दिनानि ।

३. वक्र गत्यां १२ दिनानि ।

४. विकला गत्यां ६ दिनानि ।

आसां फलानि - ऋज्वीगतिः प्रजानां शुभकरी भवति।अतिवक्रगतिः अर्थं विनाशयति। अन्ये अर्थं दुर्भिक्षं च करोति। वक्रगतिः शस्त्रभयं सङ्ग्रामभीतिं च करोति। विकलागतिः भयं रोगान् गादांश्च उत्पादयति।

यथा -

**ऋज्वी हिता प्रजानामतिवक्राऽर्धं गतिर्विनाशयति।**

**शस्त्रभयदा च वक्रा विकलाभयरोगसंजननी।।**

## ६.८) बुधस्योदयास्तमययोः शुभाशुभलक्षणफलविचारः

पुष्यमि आषाढ श्रवण वैशाख मघ मासेषु बुधः यदि उदितो भवति तदा लोकस्य भीतिः भवति। तेष्वेव पौषादिषु मासेषु यदि अस्तंगतः तर्हि तदा शुभपलकृत् भवति।

कार्तिकमासे आश्वयुजमासे वा यदि बुधः उद्गच्छति तदा शस्त्रभयं संग्रामभयं तस्करभयं अग्निभयं रोगभयं जलभयं क्षुद्भयं दुर्भिक्षभयं एतानि करोति।

सूर्यमण्डलस्थो बुधः अस्तंगते सति यानि नगराणि शतृभिः वेष्टितानि तानि रुद्धानि। तथैव उदिते सति मोक्षं प्राप्नुवन्ति। अन्येतु पुनः तदज्ञाः पण्डिताः नन्दिप्रभृतयः पशचात् उदिते बुधे नगराणां लाभं करोति इति कथयन्ति।

## <u>६.९) बुधस्य बिम्बलक्षणफलविचारः</u>

बुधः सुवर्णाभः अथवा शुककान्तिः अर्थात् नीलपीतवर्णोः वा नीलवर्णेन सद्दशो वा तथा निर्मलदेहो वा विस्तीर्णबिम्बोवा एवं विधः यदि भवति तदा लोकानां श्रेयसे भवति। किन्तु उक्तविषयात् । यदि विपर्यये भवति तर्हि अशुभकरः लोकानां इत्यर्थः। अर्थात् विपरीतफलं एव ददाति।

यथा -

**हेमकान्तिरथवा शुकवर्णः सस्यकेन मणिना सद्दशो वा।**
**स्निग्धमूर्तिः अलघुश्च हितायव्यत्यये न शुभकृच्छशिपुत्रः।।**

# ६.१०) प्रश्नावली

**१. संक्षेपेण लिखत** **५*४= २०**

१. उदितस्य बुधस्य फलं किं ?
२. बुधस्य सप्तगतीनां नामानि लिखत ?
३. बुधस्य गतिचतुष्टयस्य नामानि लिखत ?
४. बुधस्य बिम्बलक्षणानि कानि ?

**२. विस्तरेण उत्तरं लिखत** **१०*३=३०**

१. बुधस्य सप्तगतीनां लक्षणानि फलानि च विचारयत ?
२. बुधस्य सप्तगतीनां विषये पराशरमतं किं ? विवेचयत ?
३. बुधस्य उदयास्तमययोः शुभाशुभलक्षणानि फलानि च प्रतिपादयत ?

**३. व्याख्यात** **२०*२=४०**

१. नक्षत्रावस्थितस्य बुधस्य फलानि समग्रतया लिखत ?
२. बुधस्य गतिचतुष्टयस्य लक्षणानि फलानि च निरूपयत ?

# संरचना

७. सप्तमोऽध्यायः

७.१) अवतरणिका

७.२) उद्देश्यानि

७.३) बृहस्पतिवर्षनिर्णयः

७.४) कार्तिकादीनां द्वादशानां वर्षाणां फलविचारः

७.५) नक्षत्रेषु चरतः गुरोः विशेषफलविचारः

७.६) संवत्सरपुषस्य फलविचारः

७.७) गुरुग्रहस्य वर्णवशात् फलविचारः

७.८) द्वदशानां षष्ट्यब्दावस्थितानां युगानां लक्षणफलविचारः

७.९) प्रश्नावली

# ७. सप्तमोऽध्यायः

## ७.१) अवतरणिका

समस्तजगतः शुभाशुभफलविषयान् ज्ञातुं बहवः मार्गाः सन्ति तेष्वन्यतमः ग्रहचारो भवति। ग्रहाणां चारवशात् कदावृष्टिर्भवति, कदा उपद्रवो भवति, कदा भूकम्पादयो भवन्ति इत्येवं कस्मिन् देशे अरिष्टादयो वा शुभफलानि वा कदा कथं भवन्ति इत्यपि ज्ञातुं शक्यते। प्रत्येकं ग्रहस्य तथैव अगस्त्यस्य सप्तर्षीणां ज्योतिर्मयस्वरूपाणां चारवशात् एतत् सर्वं पृथक् पृथक् ज्ञातुं शक्यते। अस्मिन्नध्याये बृहस्पतिचारवशात् कथं कीदृशं फलं भवति इति प्रदर्श्यते।

# ७.२) उद्देश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* बृहस्पतिवर्षनिर्णयं कर्तुं योग्यो भवति।

* मासक्रमेणैव वर्षक्रमस्य विचारं कर्तुं शक्नोति।

* कार्तिकादीनां द्वादशानां वर्षाणां फलविचारं कर्तुं समर्थो भवति।

* नक्षत्रेषु चरतः गुरोः विशेषफलानि ज्ञातुं प्रभवति।

* संवत्सरपुुषस्य फलविचारं कर्तुं समर्थो भवति।

* गुरुग्रहस्य वर्णवशात् फलविचारं कर्तुं समर्थो भवति।

* द्वदशानां षष्ट्यब्दावस्थितानां युगानां लक्षणफलविचारं कर्तुं समर्थो भवति।

### ७.३) बृहस्पतिवर्षनिर्णयः

यस्मिन् नक्षत्रे स्थितः गुरुः सूर्यमण्डलात् दर्शनं याति तन्नक्षत्रं गुरुसहितनक्षत्रं भवति। यस्मिन् नक्षत्रेस्थितो गुरुः सूर्यमण्डले प्रविशति तस्य नक्षत्रस्य नाम्ना एव वर्षं वक्तव्यम्। तच्च मासक्रमेणैव भवति। यथा रोहिणीस्थोऽस्तंगतो मृगशिरस्थश्चोदयं गतः तदनन्तरं अक्रान्तमाससंज्ञितक्रमेण वर्षं वक्तव्यम्।

यथा -

**नक्षत्रेण सहोदयमुपगच्छति येन देवपतिमन्त्री।**

**तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव॥**

**मासक्रमेणैव वर्षक्रमस्य विचारः**

कार्तिकमासपूर्वाणि वर्षाणि भवन्ति। अर्थात् माससमानि वर्षाणि द्वादश भवन्ति। तानि च आग्नेयात् कृत्तिकातः नक्षत्रद्वयानुयोगीनिक्रमेण भवन्ति। तद्यथा - कृत्तिकारोहिणीभ्यां कार्तिकः। मृगशिरार्द्राभ्यां मार्गशीर्षः। पुनर्वसुपुष्याभ्यां पौषः। अश्रेषमघाभ्यां माघः। पूर्वाफल्गुन्युत्तरफल्गुनीहस्तैः फल्गुनः। चित्रास्वातीभ्यां चैत्रः। विशाखानुराधाभ्यां वैशाखः। ज्येष्ठामूलाभ्यां ज्येष्ठः। पूर्वाषाढोत्तराषाढाभ्यां आषाढः। श्रवणाधनिष्ठाभ्यां श्रावणः। शतभिषक् पूर्वोभाद्रपदोत्तरभाद्रपदादिभिर्भाद्रपदः। रेवत्यश्वनी भरणीभिश्चाश्वयुज इति एतदुक्तं भवति यदा कृत्तिकायां रोहिण्यामवस्थितो वा गुरुरुदयं याति तदा कार्तिकं वर्षं ज्ञेयम्। एवमन्येषामपि। अत्रान्ये एवं व्याचक्षते -

यथोपान्त्यमन्त्यं चेत्यत्रन्त्यशब्दः समीपवाची। उपान्त्यस्यैकादशस्य समीपं दशमं श्रावणं न तु द्वादशमाश्वयुजमिति। यतस्तत्र गर्गादिवचनैः सह विरोधो भवति।

यथा -

**वर्षाणि कर्तिकादीन्याग्नेयाद् भद्वयानुयोगीनि।**

**क्रमशस्त्रिभं तु पञ्चममुपान्त्यमन्त्यं च यद्वर्षम्॥**

## ७.४) कार्तिकादीनां द्वादशानां वर्षाणां फलविचारः

<u>कार्तिकवर्षफलम्</u> - कार्तिकवर्षे शकटेन गत्या ये उपजीवन्ति तेषां तथैव सुवर्णकाराणां लोहकाराणां गवां च पीडा भवति। तथैव रोगाः युद्धानि च भवन्ति। तथैव रक्तं पीतं च पुष्पं येषां सम्भवति तेषां च वृद्धिः भवति।

<u>मार्गशीर्षवर्षफलम्</u> - मार्गशीर्षे अब्दे अनावृष्टिः भवति। अरण्यपशवः मूषिकाः प्राणिनः कीटजातयः पक्षिणः एतैः सस्यानां नाशः भवति। तथा रोगभीतिः भवति। राज्ञा सुहृद्भि साकं वैरप्रीतिः उत्पद्यते। तथैव शतृभिस्सह न भवेदिति।

<u>पौषवर्ष फलम्</u> - पौषवर्षे लोकस्य शुभं भवति राजानः विगतवैरिणः भूत्वा अन्योन्यं मैत्र्या भवन्ति। तथैव धान्यस्य वृद्धिः द्विगुणस्त्रिगुणो वा भवति। अर्थात् धान्यस्य यत् मूल्यं आसीत् तेनैव मूल्येन द्विगुणं त्रिगुणं वा धान्यिं लभ्यते। तथैव पृष्टिदानां कार्याणां प्रसिद्धिः अतिशयेन भवति।

<u>माघवर्षफलम्</u> - माघेवर्षे जनाः अत्यर्थं पितृपूजाकर्मणि रताः भवन्ति। माघायाः पितृदेवत्वात् सर्वभूतानां चित्ततुष्टिर्भवति। तथैव नीरोगता भवति। तथैव वृष्टिः धान्यस्य वृद्धिः च भवति। तथैव मित्रलाभश्च भवति। अर्थात् सर्वत्र सर्वेषु प्राणिषु मित्रत्वं आपाद्यते।

<u>फाल्गुणवर्षफलम्</u> - फल्गुने वर्षे विन्ध्यात् क्वचित् क्षेमं क्वचित् वृष्टिः , क्वचित् च सस्यं भवति। किन्तु न सर्वत्र। तथा स्त्रीणां दुर्भाग्यत्वं तत् नृणां अवाल्लभ्यं भवति। तस्कराः प्रबलाः भवन्ति। तथैव राजानः क्रूराः भवन्ति।

<u>चैत्रवर्षफलम्</u> - चैत्र अब्दे अल्पवृष्टिः भवति। अन्नं सुदुर्लभं भवति। लोके लब्धपालनं तथा राजानः अक्रूराः भवन्ति। शिम्बिधान्यस्य मुद्गादेः वृद्धिः भवति। तथा सुरूपाणां पीडा च भवति।

<u>वैशाखवर्षफलम्</u> - वैशाखे अब्दे प्रजाः राज्ञा सहिताः भवन्ति। सर्वजनपदाः धर्मासक्ताः भयरहिताः प्रहृष्टश्च भवन्ति। तथैव यागकर्मणां प्रवर्तनं च भवति। तथैव सर्वेषां सस्यानां निष्पत्तिः भवति।

ज्येष्ठवर्षफलम् - ज्येष्ठे अब्दे जातीनां श्रेष्ठाः कुलानां श्रेष्ठाः धनश्रेष्ठाः श्रेणिश्रेष्ठाः ये सन्ति ते अपि च नृपाः धर्मज्ञानैः जनैः सहिताः भवन्ति। ते सर्वे एव पीड्यन्ते। तथैव धान्यानि च पीड्यन्ते। कङ्गुशमीजातीतिलादीन् वर्जनीयम्।

आषाढवर्षफलम् - आषाढे अब्दे क्वचित् क्वचित् सस्यानि उत्पद्यन्ते। न तु सर्वत्र अन्यत्र अन्यत्र देशेषु वृष्टेरभावः दृश्यते। तथैव लोके योगक्षमं च सामान्यं भवति। लब्धपालनं क्षेमं तच्चमध्यमं भवति। अति उत्कृष्टं च न भवति। अतिनिकृष्टं च न भवति इत्यर्थः। राजानः सोद्यमाः भवन्ति।

श्रावणवर्षफलम् - श्रावणे वर्षे क्षेमं भवति तथैव सर्वाणि सस्यानि सम्यक् निष्पत्तिम् उपायान्ति। तथैव ये क्रूराः ये वेदबाह्याः सन्ति ते सर्वे पीड्यन्ते । तेषां भक्ताः च अर्थात् सेवकाः च बाध्यन्ते।

भाद्रपदवर्षफलम् - भाद्रपदे अब्दे मुद्गादिकं परिपाकं प्राप्नोति । तथैव प्रथममुप्तं सस्यं निष्पत्तिं याति। पश्चात् उप्तं सस्यं न भवति। कुत्रचित् प्रान्तेषु सुभिक्षं भवति क्वचित् च भीतिः भवति।

आश्वयुजवर्षफलम् - आश्वयुजे अब्दे सततं वृष्टिः भवति। अर्थात् जलवृद्धिः भवति। तथैव सर्वाः प्रजाः प्रहृष्टाः भवन्ति। क्षेमं च भवति। तथैव सर्वेषां अवशेषाणां प्राणचयः, बलोपचयः भवति। तथैव अतिसुभिक्षं च भवति।

### ७.५) नक्षत्रेषु चरतः गुरोः विशेषफलविचारः

यदा बृहस्पतिः नक्षत्रेषु उत्तरमार्गे चरति तदा सुभिक्षं आरोग्यं च करोति। तथैव दक्षिणमार्गे यदा चरति तदा अनारोग्यम् अशुभं च करोति। अर्थात् उत्तरभागफलात् विपरीत फलं ददाति। तथैव गुरुः नक्षत्राणामध्यभागे चरन् मध्यफलदायी भवति। अर्थात् शुभं न करोति अशुभं च न करोति।

गुरुः यदा वर्षे नक्षत्रद्वयं विचरति तदा प्रजानां शुभकरो भवति। तन्नक्षत्रद्वयं सार्द्धं यदि विचरति तदा मध्यमं फलं ददाति अर्थात् न शुभं नाप्यशुभं च भवति। नक्षत्रद्वयात् अधिकेन वर्षेण यदि विचरेत् तदा सस्यानि विनाशयति।

## ७.६) संवत्सरपुषस्य फलविचारः

रोहिणी कृत्तिका एते द्वे नक्षत्रे संवत्सरतनुः भवतः। पूर्वाषाढ उत्तराषाढ एते द्वे नक्षत्रे गुरोः नाभिः भवतः। आश्रेषा हृदयं मघा पुष्पम् इति उक्तम्।

पापग्रह विरहितैः शुद्धतनुभिः शुभं फलं भवति। रवि भौमसौरैः यदि देहे युतः चेत् तदा अग्निभयं भवति। एवमेव यदि नाभ्यां पीडितश्चेत् वायुभयं भवति। यदि पुष्पे पीडितशचेत् मूलद्रव्याणाम् आम्रादि फलानां च विनाशो भवति । यदि हृदये पीडितश्चेत् अवश्यं सस्यानां धान्यानां च नाशो भवति ।

यथा -

**रोहिण्योनलभं च वत्सतनुर्नाभिस्त्वषाढाद्वयं**

**सार्पं हृत्पितृदैवतं च कुसुमं शुद्धैः शुभं तै फलम्**

**देहे क्रूरनिपीडिते ग्न्यनिलजं नाभ्यां भयं क्षुत्कृतम्**

**पुष्पे मूलफलक्षयोऽथ हृदये सस्यस्य नाशो ध्रुवम्**

## ७.७) गुरुग्रहस्य वर्णवशात् फलविचारः

बृहस्पतिः यदि अनलवर्णो भवति चेत् अग्निभीतिः भवति। पीतवर्णो भवति चेत् व्याधिपीडा भवति। श्यामवर्णो भवति चेत् संग्रामः भवति। हरितवर्णो भवति चेत् लोकानां चोरेभ्यः पीडनं भवति। लोहितवर्णो भवति चेत् शस्त्रभयं भवति। धूमवर्णोभवति चेत् अनावृष्टिः भवति। दिवसभागे दृष्टे राज्ञः मृत्युर्भवति।

## ७.८) द्वदशानां षष्ट्यब्दावस्थितानां युगानां लक्षणफलविचारः

शकनृपवधात् आरभ्य अभीष्टवर्षं यावत् यानि वर्षाणि अतीतानि तानि एकादशभिः गुणयेत्, ततः पुनरपि चतुर्भिः गुणयेत्। एवं क्रियते चेत् चतुश्चत्वारिंशता गुणितानि भवन्ति इत्यर्थः। ततो नवाष्टपञ्चाष्ट ८५८९ संख्या युतानि कार्याणि । एवं कृत्वा ततः शून्यशरागरामै ३७५० इति संख्याभिः विभाजयेत् तदा यत् फलं लब्धं तत् वर्षाणि सूचयति। तान्येव बृहस्पतिराशयः। शेषं त्रिंशता सङ्गुण्य तेनैव छेदेन विभज्यावाप्तं राशीनां भागाः भवन्ति। ततः भागशेषं षष्ट्या सङ्गुण्य तेनैव छेदेन भागमपहृत्यावाप्तं

लिप्ताः भवन्ति। ततः लिप्तानां शेषं षष्ट्या सङ्गुण्य तेनैव छेदेन भागमपहृत्यावाप्तं विलिप्ताः भवन्ति। ततः शश्यादिना फलेन लब्धेन शकनृप समयं युक्तं कार्यम् । यतः तानि वर्षरूपाण्येव गुरोः सम्पन्नाः राशयः। ततः यत् लब्धं तं षष्ट्या भागमपहरेत् ततः शेषं लभ्यते तत् वर्तमानषष्ट्ब्दस्य गतवर्षाणि। ततस्तान्यब्दानि पंचभिः विभाजयेत् ततः यत् लब्धं तदेव वर्तमानषष्ट्यब्दस्यातीतयुगानि। एतानि विष्णुप्रभृतीनि भवन्ति। शेषं पञ्चभ्यः संशोध्य यदवशिष्यते तावन्ति वर्षाणि तत्र भवन्ति।

यथा -

**गतानि वर्षाणि शकेन्द्रकालाद्धतानि रूद्रैर्गुणयेच्चतुर्भिः**

**नवाष्टपञ्चाष्ट ८५८९ युतानि कृत्वा विभाजयेच्छून्यशरागरामैः ३७५०**

**लब्धेनयुक्तं शकभूपकालं संशोध्य षष्ट्या विषयैर्विभज्य**

**युगानि नारायण पूर्वकाणि लब्धानि शेषाः क्रमशः समास्युः।**

युगानां नामानि अधिपतयः - अत्र द्वादश युगानां नामानि उक्तनि। तेषां युगानाम् अधिपतीनां नामानि च उक्तानि । तान्यथा -

प्रथमयुगस्य अधिपतिः - नारायः

द्वीतीययुगस्य अधिपतिः - बृहस्पतिः

तृतीययुगस्य अधिपतिः - इन्द्रः

चतुर्थयुगस्य अधिपतिः - अग्निः

पञ्चमयुगस्य अधिपतिः - त्वष्टानाम प्रजापतिः

षष्ठयुगस्य अधिपतिः - अहिर्बुध्न्यः

सप्तमयुगस्य अधिपतिः - पिता

अष्टमयुगस्य अधिपतिः - विश्वः

नवमयुगस्य अधिपतिः - सोमः

दशमयुगस्य अधिपतिः - इन्द्रः अग्निः च

एकादशयुगस्य अधिपतिः - अश्विसंज्ञः

द्वादशयुगस्य अधिपतिः - सूर्यः

एते देवता विशेषाः द्वादश अपि युगेशाः भवन्ति। अत्र युगेयुगे पञ्चवर्षाणि भवन्ति। तेषां नामानि च भिन्नभिन्नानि भवन्ति। तेषां वर्षाणां च काश्चन देवता भवन्ति। एवमत्र वर्षाणां देवताकथनेन प्रयोजनं किम् ? इति वक्तव्यम् चेत् यथा युगानां अधिपतयः उक्ताः तथैव वर्षाणामपि वक्तव्यम्। यस्मिन् वर्षे यः अधिपतिः अस्ति इति ज्ञात्वा तस्य यागः करणीयः इति वेदे पठ्यते। तदर्थं एव देवताकथनं इत्यर्थः।

**प्रथमयुगस्य वर्षाणि तेषां फलानि -**

संवत्सरपरिवत्सरेदाद्यनुवत्सरेद्वत्यराख्यानि पञ्चवर्षाणि भवन्ति। तत्र यः वत्सरः प्रथम वत्सरो भवति तस्य अग्निदेवः स्वामी भवति। द्वितीयः परिवत्सरः भवति तस्य अधिपतिः सूर्यः भवति। तृतीयः इदावत्सरः भवति तस्य अधिपतिः चन्द्रो भवति। चतुर्थः अनुवत्सरः भवति तस्य स्वामी ब्रह्मा भवति। पञ्चमः इद्वत्सरः भवति तस्य अधिपतिः रुद्रः भवति।

<u>तेषां वर्षाणां फलम्</u> - संत्सरो नाम प्रथमे वर्षे वृष्टिः सामान्यरूपेम भवति। अर्थात् अधिकं न भवति अल्पमपि न भवति इत्यर्थः। द्वितीये परिवत्सर नामवर्षे प्रथमभागो वृष्टिः भवति। तदनन्तरं वृष्टिः न भवति। तृतीये इदावत्सर नाम वर्षे वृष्टिरधिकं भवति। जलवृद्धिः भवति चतुर्थे अनुवत्सर नाम वर्षे अन्तिमे जलं वर्षति। प्रथमे न भवति पंचमे इद्वत्सर नाम वर्षे अल्पजलं भवति।

<u>**द्वितीय युगस्य फलम् -**</u>

द्वितीये बार्हस्पत्ययुगे प्रथमः अब्दः अङ्गिरः द्वितीयः अब्दः श्रीमुखः। तृतीयः अब्दः भावसेत्याहः। चतुर्थः अब्दः युव पञ्चमः दुब्दः सुधाता। एतानि पञ्चवर्षाणि यथा क्रमेण स्थितानि भवन्ति। अस्मिन् युगे त्रीणि प्रथमानि वर्षाणि शोभनानि भवन्ति। अनन्तरं चतुर्थपंचमे द्वे वर्षे समे अर्थात् न शुभे नाशुभे च इति । प्रथम त्रिषुवर्षेषु नाम अङ्गिर श्रीमुख भावसाह्वेषु इन्द्रः निकामवर्षी भवति। अर्थात् यवत् आवश्यकं तावत् वृष्टिं ददाति। तथैव लोके जनाः निर्गत उपद्रव भयभीताश्च भवन्ति। तथैव पश्चिमे अब्दद्वये शोभनवृष्टिः भवति। कालानुगुणं वृष्टिः भवति। किन्तु अस्मिन् वर्षद्वये रोगाः भवन्ति। सङ्ग्रामश्च भवति।

**तृतीययुगस्य फलम् -**

तृतीये इन्द्रयुगे प्रथमं वर्षं ईश्वरसंज्ञम्। द्वितीयं वर्षं बहुधान्यसंज्ञम्। तृतीयं प्रमथिनं चतुर्थं विक्रमम्। पंचमं वृष संज्ञम्। इन्द्रयुगे ईश्वर बहुधान्ययो- वर्षयोः प्रजानां शुभफलं भवति। एतयोः द्वयोः वर्षयोः प्रजाः धर्मरताः दीर्घजीविन्यः भवन्ति। तृतीय अब्दः प्रमाथी नाम अब्दः अनिष्टफलदः भवति। चतुर्थपञ्चमौ वृषविक्रमौ द्वावब्दौ तु सुभिक्षं ददतः । किन्तु रोगभयं च कुरुतः।

**चतुर्थयुगस्य फलम् -**

चतुर्थःयुगः श्रेष्ठ इति । हुताशाख्यस्य अस्य युगस्य प्रथमं वर्षं चित्रभानु द्वितीयं वर्षं सुभानु तृतीयं वर्षं नतं चतुर्थं तारणं पञ्चमं वर्षं व्यय संज्ञं भवति।

प्रथमे चित्रभानुवर्षे शुभं भवति। तथैव द्वितये सुभानु नाम वर्षे मध्यमफलं भवति। तृतीये नतनाम वर्षे रोगाः भवन्ति मृत्युं च करोति। चतुर्थे तारणे नाम वर्षे भूविृष्टिः भवति। तथैव सस्यवृद्धिः राज्ञाः तुष्टिः च भवति। पञ्चमे व्ययनामवर्षे कामः प्रबलः भवति तथा विवाहादिभिः लोक आकुलो भवति।

**पञ्चमयुगस्य फलम् -**

त्वष्टानाम पञ्चमे युगे प्रथम अब्दः सर्वजित् इति। द्वितीय अब्दः सर्वधारी। तृतीय अब्दः विरोधी।चतुर्थअब्धः विकृतिः पञ्चम अब्दःखरः इति।

एतेषु अब्देषु प्रथम तृतीय चतुर्थ पञ्चमाः भयं जनयन्ति। अनिष्टफलदाः भवन्ति।द्वितीयः सर्वधारी शुभकृत् भवति।

**षष्ठयुगस्य फलम् -**

अहिर्बुध्न्ये युगे प्रथमः अब्दः नन्दनः। द्वितीयविजयः। तृतीय जयः। चतुर्थः मन्मथः। पंचमः दुर्मुख इति कथ्यते।

अत्र अस्मिन् युगे प्रथमवर्षत्रयं शुभं करोति। पश्चात् वर्षद्वये मन्मथ नाम अब्दः समफलदः न शुभ नाप्यशुभः इत्यर्थः। अन्तिमः दुर्मुखः नाम अब्दः अधमःअशुभफलदो भवति।

**सप्तमयुगस्य फलम् -**

सप्तमे पैत्रेयुगे प्रथम अब्दः हेमलम्ब इति। द्वितीय अब्द विलम्ब इति तृतीय अब्दः विकारि इति। चतुर्थ अब्दः शर्वरी इति पञ्चमे अब्दः प्लव इति।

प्रथम वर्षे ईतयो भवन्ति बहुवात बहुवृष्टिः च भवति। द्वितीये वर्षे सस्यं अल्पं भवति जलं प्रभूतं न भवति। तृतीये अब्दं उद्वेगकरं भवति। प्रभूतं जलं भवति। चतुर्थे अब्दे दुर्भिक्षं भवति। पञ्चमे प्लवे वर्षे शोभनं भवति।

**अष्टमयुगस्य फलम् -**

वैश्वनाम अष्टमे युगे प्रथमसंवत्सरः शोकाहृत् इति । द्वितीय अब्दः शुभकृत् तीतीयः अब्दः क्रोधी। चतुर्थः अब्दः विश्वावसुः पंचम अब्दः पराभवः इति।

प्रथमद्वितीयावब्दौ प्रजानां प्रीतिकरौ भवतः।तृतीयः क्रोधी बहुदोषदो भवति। चतुर्थपञ्चमौ समफलौ भवतः अर्थात्  न शुभौ नाशुभौ इति। किन्तु पराभवे अग्निभयं भवति। शस्त्रेण रोगैः पीडा भवति। तथा ब्रह्मणानां गवां च भयं भवति।

**नवमयुगस्य फलम् -**

नवमे युगे प्रथम अब्दः प्लवङ्गः। द्वितीय अब्दः कीलकः तृतीय अब्दः सौम्यः चतुर्थः अब्द साधारणः पञ्चम राधकृत् इति। कीलकसौम्यौ अब्दौ शुभफलप्रदौ भवतः। प्लवङ्गम अब्दः प्रजानां बहुप्रकारं कष्टं अशुभं ददाति। साधारणअब्दः स्वल्पं जलं ददाति। इतयः भवन्ति। तदनन्तरं पञ्चम अब्द रोधकृत् अब्दः क्वचित् क्वचित् नानाप्रकारं जलं वर्षति। तथा सस्यानां सम्पच्च भवति।

**दशमयुगस्य फलाम् -**

इन्द्राग्निदैवमिति दशमे युगे प्रथम अब्दः परिधावी इति द्वितीयं प्रमादि तृतीयं विक्रम चतुर्थं राक्षास पंचमं अनल संज्ञितम् इति। परिधाविनि वर्षे मध्यदेशस्य नाशो भवति। तत्रैव राज्ञः मरणं भवति। जलं चाल्पं भवति। वह्नि भयं भवति। प्रमादिसंज्ञे वर्षे लोकः अलसो भवति। तथैव कलहः च भवति। विक्रम इत्यस्मिन् वर्षे सकल लोकानां आनन्दः भवति। अस्य वर्षस्य आनन्द अपरं नाम। राक्षसः इत्यस्मिन् वर्षे लोकानां

विनाशो भवति। तेनैव प्रकारेण अनलस्य क्षयो भवति। अस्मिन् युगे राक्षसाब्दे ग्रीष्मधान्यानां सम्पर्को भवति। अग्निकोपं मारकं च ददाति।

**एकादशयुगस्य फलम् -**

अश्विने एकादश युगे प्रथम अब्दः पिङ्गलः। द्वितीय अब्दः कालयुक्तः। तृतीय अब्दः सिद्धार्थः। चतुर्थ अब्दः रौद्रः। पञ्चम अब्दः दुर्मतिः।

प्रथमे वर्षे महती वृष्टिः भवति। अधिकतया तस्कराः भवन्ति। तथैव जनानां हनूकम्पयुतकासो भवति। कालयुक्त अब्दः बहुदोषकरो भवति सिद्धार्थे अब्दे बहवः गुणाः सम्पदादयः भवन्ति। रौद्रे अब्दे अतिदुष्टफलं भवति। दुर्मतिः अब्दः मध्यमवृष्टिं करोति।

**द्वादशयगस्य फलम् -**

भाग्ये द्वादशे युगे प्रथम अब्दः दुन्दुभि संज्ञं भवति। द्वितीयं अङ्गार संज्ञं। तृतीयः अब्दः रक्ताक्षसंज्ञं भवति चतुर्थ अब्दः क्रोदसंज्ञं पंचम अब्दः क्षयसंज्ञं भवति।

प्रथमे वर्षे यस्य वृद्धिः भवति। द्वितीय वर्षे राज्ञां नाशो भवति। वृष्टिः अतुला भवति। तृतीये वर्षे शूकरादयस्तकृतं भयं भवति। तथा गदारोगाश्च भवन्ति। चतुर्थे क्रोधसंज्ञे वर्षे बहुप्रकारं लोकानां क्रोधः भवति। तथा राष्ट्राणि कलहैः शून्यी कुरुते। क्षये पञ्चमे वर्षे जनानां बहुविधं क्षयं भवति। ब्राह्मणानां भीतिः भवति। कर्षकाणां वृद्धिः भवति। वैश्यानां शूद्राणां च उपचयकरो भवति। तथा परधनहर्तुणामप्युपचयकरं भवति।

# ७.९) प्रश्नावली

**१. संक्षेपेण लिखत** **५*३= १५**

१. बृहस्पतेः वर्षनिर्णयः कथं क्रियते ?

२. गुरुग्रहस्य वर्णवशात् फलानि कानि ?

३. षष्ट्यब्दावस्थितानां द्वादशानां युगानां नामानि लिखत ?

**२. विस्तरेण उत्तरं लिखत** **१०*४=४०**

१. बृहस्पति वर्ष निर्णयं कृत्वा फलान् प्रतिपादय ?

२. नक्षत्रेषु चरतः गुरोः विशेष फलानां प्रतिपादनं कुरुत ?

३. संवत्सरपुरुषस्य फलानि लिखत ?

४. गुरोः द्वादशयुगानां नामानि लिकित्वा तेषां अधिपतयः के इति प्रतिपादयत?

**३. व्याख्यात** **२०*२=४०**

१. कार्तिकादि द्वादशानां वर्षाणां फलानि विवेचयत ?

२. षष्ट्यब्दावस्थितानां द्वादशानां युगानां लक्षण फल विचारं विस्तरेण कुरुत ?

# संरचना


८. अष्टमोऽध्यायः

८.१) अवतरणिका

८.२) उद्देश्यानि

८.३) शुक्रस्य नववीथीनां लक्षणानि

८.३.१) नववीथीनां नामानि

८.३.२) वीथीनां प्रविभागाः

८.३.३) तासां मार्गप्रविभागाः

८.४) शुक्रस्य षण्मण्डलानि तेषां लक्षणफलविचारः

८.५) नक्षत्राणां भेदनात् शुक्रस्य फलविचारः

८.६) दिवादृष्टस्य शुक्रस्य फलविचारः

८.७) शुक्रस्य तिथिष्वस्तमयोदये फलविचारः

१८.८) शुक्रस्य वर्णलक्षण फलविचारः

८.९) गुरुशुक्रयोरन्योन्यं सप्तमस्तयोः फलविचारः

८.१०) शुक्रस्य अग्रवर्तिनां सर्वेषां ग्रहाणां फलविचारः

८.११) प्रश्नावली

# ८. अष्टमोऽध्यायः

## ८.१) अवतरणिका

समस्तजगतः शुभाशुभफलविषयान् ज्ञातुं बहवः मार्गाः सन्ति तेष्वन्यतमः ग्रहचारो भवति। ग्रहाणां चारवशात् कदावृष्टिर्भवति, कदा उपद्रवो भवति, कदा भूकम्पादयो भवन्ति इत्येवं कस्मिन् देशे अरिष्टादयो वा शुभफलानि वा कदा कथं भवन्ति इत्यपि ज्ञातुं शक्यते। प्रत्येकं ग्रहस्य तथैव अगस्त्यस्य सप्तर्षीणां ज्योतिर्मयस्वरूपाणां चारवशात् एतत् सर्वं पृथक् पृथक् ज्ञातुं शक्यते। अस्मिन्नध्याये शुक्रचारवशात् कथं कीदृशं फलं भवति इति प्रदर्श्यते।

# ८.२) उद्देश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* शुक्रस्य नववीथीनां लक्षणफलविचारं कर्तुं शक्नोति।

* शुक्रस्य षण्मण्डलानि तेषां लक्षणफलविचारं कर्तुं समर्थोभवति।

* नक्षत्राणां भेदनात्शुक्रस्य फलानि वक्तुं पारयति।

* दिवादृष्टस्य शुक्रस्य फलविचारं कर्तुं समर्थो भवति।

* शुक्रस्य तिथिष्वस्तमयोदये फलविचारं कर्तुं शक्नोति।

* शुक्रस्य वर्णलक्षणफलानि प्रतिपादयितुं योग्यो भवति।

* गुरुशुक्रयोरन्योन्यं सप्तमस्थयोः फलविचारं कर्तुं शक्नोति।

* शुक्रस्य अग्रवर्तिनां सर्वेषां ग्रहाणां फलविचारं कर्तुं समर्थो भवति।

## ८.३) शुक्रस्य नववीथीनां लक्षणानि

शुक्रस्य चारवशात् नववीथयः उदङ्मध्यदक्षिणा इति त्रयो मार्गाः वातव्याडवैश्वानराः त्रयो मार्ग भेदाः षट्मण्डलानि भवन्ति। अत्रादावेव वीथीनां लक्षणमाह। अस्मिन् अध्याये देवलकश्यपादिभिरपि एताः नववीथयः भिन्नभिन्नरूपेण उक्ताः तथापि वराहमिहिरः स्वमतेन प्रविभागान् एवमाह

### ८.३.१) नववीथीनां नामानि

१. नागवीथी २. गजवीथी ३. ऐरावतवीथी ४. वृषभवीथी ५. गोवीथी ६. जरद्गववीथी ७. मृगवीथी ८. अजवीथी ९. दहनवीथी

### ८.३.२) वीथीनां प्रविभागाः -

नागवीथी - स्वाति भरणी कृत्तिका एतानि नक्षत्राणि नागवीथी।

गजवीथी - रोहिणी मृगशिर आर्द्रा एतानि नक्षत्राणि गजवीथी।

ऐरावतवीथी - पुनर्वसु पुष्यमि आश्रेषा एतानि नक्षत्राणि ऐरावती।

वृषभवीथी - मघा पूर्वाफल्गुनी उत्तरफल्गुनी एतानि नक्षत्राणि वृषबवथी।

गोवीथी - अश्वनि रेवती पूर्वाभाद्रोत्तराभाद्र एतानि चत्वारिनक्षत्राणि गोवीथी।

जरद्गववीथी - श्रवण धनिष्ठा शतभिषक् एतानि नक्षत्राणि जरद्गववीथी।

मृगवीथी - अनुराधा ज्येष्ठा मूला एतानि नक्षत्राणि मृगवीथी ।

अजवीथी - हस्त विशाख चित्त एतानि नक्षत्राणि अजवीथी।

दहनवीथी - पूर्वाषाढा उत्तराषाढाद्वयं दहनवीथी।

**८.३.३) तासां मार्गप्रविभागाः** - तासां नागाद्यानां नवानां वीथीनां क्रमात् उदङ्मध्ययाम्यमार्गेण तिस्रस्तिस्रो विथयः भवन्ति।

१. उत्तरमार्गस्थाः - नागगजैरावत्यः

२. मध्यममार्गस्थाः - वृषभगोजरद्गवाः

३. दक्षिणमार्गस्थाः - मृगाजदहनाः

उत्तरमध्यमदक्षिणमार्गस्थानामपि वीथीनां उत्तरमध्यदक्षिणेनैकैका स्थिता भवति तद्यथा -

उत्तरमार्गस्थाः -

| | | |
|---|---|---|
| १. उत्तरोत्तरा | २. उत्तरमध्यमा | ३. उत्तरदक्षिण |
| १.नागवीथी | २. गजवीथी | ३. ऐरावतवीथी |

मध्यममार्गस्थाः -

| | | |
|---|---|---|
| १.मध्यमोत्तरा | २. मध्यममध्यम | ३. मध्यमदक्षिमा |
| १. वृषभवीथी | २. गोवीथी | ३. जगद्गववीथी |

दक्षिणमार्गस्थाः -

| | | |
|---|---|---|
| १. दक्षिणोत्तरा | २. दक्षिणमध्यमा | ३. दक्षिणदक्षिणा |
| १. मृगवीथी | २. अजवीथी | ३. दहनवीथी |

## ८.४) शुक्रस्य षण्मण्डलानि तेषां लक्षणफलविचारः

नागगजैरावताख्यासु उत्तरवीथिषु स्थितो वा अर्कमण्डले अस्तमयं गतो वा अस्तमादेवोदयं गतो वा शुक्रः सुभिक्षकृत् भवति। एवं ऋक्षभगोजरद्गवाख्यासु मध्यमासु वीथिषु मध्यम फलदो भवति। तथा च दक्षिणस्थासु मृगाजदहनाख्यासु अनिष्टफलदो भवति।

यथा -

**उत्तरवीथिषु शुक्रः सुभिक्षशिवकृत् गतोऽस्तमुदयं वा।**

**मध्यासु मध्यफलदः कष्टफलो दक्षिणस्थासु।।**

**आसामपि विशेषफलम्** - नागद्यासु नवसु वीथिषु उदगाशाद्यासु फलं यथाक्रमं न्यूनं भवति। तद्यथा -

नागायां अतिशुभं फलं भवति। गजाख्यां वीथ्यां उत्तमशुभं फलं भवति। अर्थात् नागवीथ्यपेक्षया किञ्चिदूनं फलं भवति। ऐरावत्यां किञ्चिच्छुभं फलं भवति। अर्थात् गजवीथ्यपेक्षया किञ्चित् ऊनं फलं भवति। वृषभवीथ्यां मध्यमं फलं न शुभं नाप्यशुभं फलं भवति। गोवीथ्यां वृषभापेक्षय किञ्चिदूनं फलं भवति। तत ऊनं फलं जरद्गव्यां भवति। मृगवीथ्यां अनिष्टफलं भवति। अजवीत्यां मृगापेक्षया अधिकं अनिष्टं फलं भवति। दहनवीथ्यां अतिकष्टं फलं भवति अजवीथ्यापेक्षया अधिकं अनिष्टं भवति।

यथा -

**अत्यत्तमोत्तमोनं सममध्यन्यूनमधमकष्टफलम्।**

**कष्टतरं सौम्यद्यासु वीथिषु यथाक्रमं ब्रूयात्॥**

**<u>शुक्रस्य षण्मण्डलानि तेषां लक्षणफलविचारः</u> -**

शुक्रस्य चारवशात् षण्मण्डलेषु प्रत्येकं फलं अत्र उच्यते।

१. **प्रथममण्डलफलम्** - भरणी नक्षत्रात् चत्वारि नक्षत्राणि प्रथमं मण्डलं भवति। अर्थात् भरणी कृत्तिका रोहिणी मृगशिराश्चेति। अस्मिन् मण्डले शुक्रः यदा चरति तदा सुभिक्षं करोति। तथा वङ्ग अङ्ग महिषा बाह्लिक कलिङ्ग इत्यादिषु देशेषु भीतिं जनयति। यदि अस्मिन् मण्डले शुक्रः सूर्यमण्डलात् उद्गत्य अन्यग्रहस्य अग्रतः तिष्ठति चेत् तदा भद्राश्वजना शूरसेनकाः यौधेयकाः कोटिवर्षा इत्यादीन् नृपान् नाशयेत्।

२. **द्वितीयमण्डलफलम्** - अर्द्रात् नक्षत्रचतुष्कं द्वितीयमण्डलं भवति। अस्मिन् मण्डले चरतः शुक्रः अपरिमितं जलं सस्यानां संपदं च ददाति। तथा ब्राह्मणानां अशुभकरं फलं च ददाति। तथैव विशेषतः विषमस्वभावानां न शुभकरं भवति। अस्मिन् मण्डले अन्येन ग्रहेण आक्रान्तः शुक्रः म्लेच्छजनानां अरण्यवासिनां श्वजीविनां गोमन्तानाम् अधमकार्यकराणां शूद्राणां वैदेहानां उपद्रवं करोति।

३. **तृतीयमण्डलस्य फलम्** - मघादि पञ्चनक्षत्राणि तृतीयमण्डलं भवति। अस्मिन् मण्डले शुक्रः यदा सूर्यमण्डलात् उदितः विचरति तदा सस्यानां प्रणाशं करोति। तथा दुर्भिक्षभयं चोरभयं च जनयति। तथा नीचानां प्राधान्यं भवति। वर्णसङ्करं च करोति। माघाद्ये अन्येन रुद्धो यदि भवति तदा शबरान् शूद्रान् पुण्ड्रान् अपरान् शूत्रिकान् वनचरान् द्राविडान् सामुद्रान् च एतान् घातयति।

४. **चतुर्थमण्डलफलम्** - स्वातीनक्षत्रतः नक्षत्रत्रयं चतुर्थमण्डलं भवति। एतत् भयं न करोति ब्राह्मणानां क्षत्रियाणां च अभिवृद्धये भवति। तथा मित्राणां परस्परं भेदप्रीतिं जनयति। अस्मिन् मण्डले अन्येन ग्रहेण आक्रान्तः शुक्रः किरातानां अधिपस्य मृत्युं ददाति। तथा इक्ष्वाकून् गह्वरवासिनः अवन्त्यान् पुलिन्दान् तङ्गणान् सूरसेनान् एतान् सर्वान् च संचूर्णयति।

५. **पञ्चममण्डलफलम्** - ज्येष्ठानक्षत्रतः पंचनक्षत्राणि यावत् पंचममण्डलं भवति। अस्मिन् मण्डले दुर्भिक्षं तस्करपीडा रोगपीडा च भवति। तथा काश्मीरान् जनान् अश्मकान् मत्स्यान् चारुदेवीनदीतीरवासिनः अवन्तीन् इत्येतान् सर्वान् उपतापयति।

अस्मिन् मण्डले अन्यः ग्रहः यदि शुक्रं आरोहेत् तदा द्रविडान् आभीरान् अम्बष्ठान् त्रिगर्तान् सौराष्ट्रान् एतान् नाशयति। तथा सिन्धुसौवीरकांश्च नाशयति। तथैव काशी राजस्य मरणं च भवति।

६. **षष्ठं मण्डलफलम्** - धनिष्ठाद्यं षण्नक्षत्राणि यावत् षष्ठंमण्डलं भवति। अर्थात् धनिष्ठा शतभिषक् पूर्वाभाद्रा उत्तराभाद्रा रेवती अश्वनी भवन्ति। अस्मिन् मण्डले शुक्रः शुभफलप्रदो  भवति। तथा भूरिधनं गोकुलानि सर्वत्र भवन्ति। प्रभूतं शालिसंयुक्तं च भवति। क्वचित् क्वचित् भीतिं च जनयति।

अस्मिन् मण्डले यदि अन्यः ग्रहः शुक्रं आरोहेत् तदा शूलिकाः गान्धाराः अवन्तयः एतेजना पीड्यन्ते। तथा वैदेहानं मरमं अपि च गह्वरवासिनः यवनानां शकानां कर्मकराणां च वृद्धिः भवति।

### ८.५) नक्षत्राणां भेदनात् शुक्रस्य फलविचारः

#### १.कृत्तिकारोहिण्योः भेदनात् फलम् -

शुक्रः कृत्तिकां भित्वा यदि गतः चेत् तदा भूमिः आत्मीयप्रवाहम् अतिक्रम्य प्रभूतेन जलेन युक्तनदीभिः अव्यक्तउच्यनीचतुङ्गसमा भवति।

एवं रोहिणयाः भेदने भूमिः मूर्द्धजैः अस्थिखण्डैः मिश्रितशुक्लकृष्णा भवति। अतः कपालव्रतं धारयति अर्थात् ब्रह्महत्यां कृतमिव तिष्ठति। यतः ब्रह्महत्याप्रायश्चित्तार्थं कापालिकव्रतं करणीयमिति प्रसिद्धम्।

**२. मृगशिर आर्द्रायोर्भेदने फलम् -**

यदा शुक्रः मृगशिरं भिन्दति तदा मधुरादीनां रसानां नाशो भवति।आर्द्रां यदा भिन्दति तदा कोशलान् कलिङ्गान् च हन्ति तथा अतिवृष्टिं च करोति।

**३. पुनर्वसुपुष्ययोर्भेदने फलम् -**

पुनर्वसौ स्थितः शुक्रः अश्मकानां जनानां वैदर्भानं च उपद्रवं करोति। तथा पुष्ये स्थिते सति तदा बह्वीवृष्टिः भवति। तथा विद्याधरणां संग्रामे विमर्दः भवति।

**४. आश्रेषमघयोः भेदने फलम् -**

शुक्रः आश्रेषायां यदा तिष्ठति तदा सर्पैः लोके दारुणपीडा वहेत् । मघां विदारयन् हस्तिसाधनपतीनां दोषं करति। बहुवर्षकरश्च भवति।

**५. पूर्वोत्तरफल्गुन्योः भेदने फलम् -**

पूर्वाफल्गुन्यां भेदने शबरजनानां पुलिन्दजनानां विनाशो भवति। बहुवर्षं च भवति। उत्तराफल्गुन्यां कुरु जनान्, पांचालान्, जाङ्गलान् च हन्ति जलं च ददाति।

**६. हस्तचित्तयोर्भेदने फलम् -**

हस्ते स्थितः शुक्रः कौरवजनानां चित्रकाराणां शिल्पिनः च पीडां कल्पयति। आकर्षणं च भवति। चित्तस्थो भवति चेत् कूपकराणां पक्षिणां च पीडा भवति। कालोपयोगिवृष्टिश्च भवति।

**७. स्वातीविशाखयोः भेदने फलम् -**

स्वातौ स्थितशुक्रः बह्वीं वृष्टिं करोति। तथा दूतान् क्रयविक्रयज्ञान् नाविकान् च पीडयति। विशाखायांस्थिते सुबृष्टिः भवति। तथा वणिजां किरातानां च भीतिः भवति।

**८. अनुराधाज्येष्ठामूलेषु भेदने फलम् -**

अनुराधायां क्षत्रियाणां विरोधः भवति। ज्येष्ठायां क्षत्रियप्रधानानां उपद्रवो भवति। मूले मूलद्रव्यविक्रयिणां वैद्यानां च सन्तापो भवति। एतेषु त्रिष्वपि अनावृष्टिः भवति।

**९. पूर्वाषाढोत्तराषाढाश्रवणधनिष्ठासु भेदने फलम् -**

पूर्वाषाढायां सलिलजानां पीडा भवति। उत्तराषाढायां रोगबाहुल्यं भवति। श्रवणेस्थिते कर्णरोगाः भवन्ति। धनिष्ठायां तु पाखण्डिनां भयं भवति।

**१०. शतभिषक् पूर्वाभाद्रपदयोः भेदने फलम् -**

शुक्रः यदि शतभिषजि स्थितो भवति तदा मध्यपानप्रसक्तानां पीडाकरो भवति। तथा पूर्वाभाद्रपदायां स्थितश्चेत् द्यूतजीविनां पीडाकरो भवति। तथैव कौरवानां पञ्चालानां च पीडां करोति। जलं च ददाति।

**११. उत्तराभाद्रपदरेवत्यश्वनीभरणीषु भेदने फलम् -**

उत्तराभाद्रपदायां फलानां मूलानां च पीडा भवति। तथैव रेवत्यां पथिकानं पीडा भवति। अश्विन्यां अश्वपतीनां पीडा भवति भरण्यां किरातानां यवनानां जनानां च पीडा भवति।

**८.६) दिवादृष्टस्य शुक्रस्य फलविचारः**

शुक्रः नास्तमिते सूर्ये अवलोकिश्चेत् भयं करोति। तथा सकलं दिनं दृष्टं चेत् दुर्भिक्षं रोगान् च करोति। तथा मध्याह्नसमये चन्द्रेणसह शुक्रः दृष्टश्चेत् तथा राज्ञः सेनायाः नगरस्य पृथक् भावं करोति।

यथा -

**दृष्टोऽनस्तमितेऽर्के भयकृत् क्षुद्रोगकृत्समस्तमहः।**

**अर्द्धदिवसे च सेन्दुर्नृपबलपुरभेदकृच्छुक्रः।**

**८.७) शुक्रस्य तिथिष्वस्तमयोदये फलविचारः**

शुक्रः कृष्णपक्षस्य चतुर्दशीं तिथिं अमावास्यां अष्टमीं वा समाश्रित्य यदा दर्शनं व्रजेत् अथवा तत्रैव अदर्शनमायाति तदा भूमिः जलपथीव दृश्यते। अर्थात् अतिवृष्टिः भवति।

यथा -

**चतुर्दशीपञ्चदशीं तथाष्टमीं तमिस्त्रपक्षस्य तिथिं भृगोसुतः।**

**यदा व्रजेत् दर्शनमस्तमेति वा तदा मही वारिमयीव लक्ष्यते।।**

## ८.८) शुक्रस्य वर्णलक्षण फलविचारः

शुक्रः अग्निसदृशकान्तौ अग्नि भीतिं कल्पयति। लोहितवर्णे यदि भवति चेत् सङ्ग्रमाः भवन्ति। सुवर्णे तद्वत् गोरवर्णे वा यदि भवति चेत् रोगाः भवन्ति। शुकाभे वा पिशाङ्गवर्णे वा यदि भवति चेत् श्वासेन च कासेन च जनानां पीडा भवति। भस्मवर्णे वा स्नेहरहिते वा कृष्णकान्तौ वा भवति चेत् आकाशात् जलं न पतति।

यथा -

**शिखिभयमनलाभे शस्त्रकोपश्च रक्ते।**

**कनकनिकषगौरे व्याधयो दैत्यपूज्ये**

**हरितकपिलरूपे श्वासकासप्रकोपः।**

**पतति न सलिलं खाद् भस्म रूक्षासिताभे**

क्षीरविकारस्य पुष्पविशेषस्य चन्द्र सदृशीं कान्तिं धारयति चेत् शुक्रः कृतयुगस्य रूपं करोति। अर्थात् तद्धर्मानुप्रवृत्तेः जनाः व्याधिदारिद्र्यंशोकवर्जिताः भवन्ति। शुक्रः स्पष्टविस्तीर्णकिरणः विस्तीर्णदेहः यदि भवति शोभनगत्या यदि तिष्ठति ग्रहार्क्षाणां उत्तरभागगत्या यदि तिष्ठति तर्हि उत्पातराहितो भवति। जयान्वितो भवति।

यथा -

**दधिकुमुद शशाङ्ककान्तिभृत् स्फुटविकसत्किरणो बृहत्तनुः।**

**सुगतिरविकृतो जयान्वितः कृतयुगरूपकरः सिताह्वयः।।**

## ८.९) गुरुशुक्रयोरन्योन्यं सप्तमस्तयोः फलविचारः

सप्तमस्थयोः गुरुशुक्रयोः अन्योन्यं विशेषफलं भवति। गुरुः शुक्रश्च पश्चिमपूर्वयोः दिशोः सप्तमराशौ अन्योन्यं यदि तिष्ठतः अर्थात् शुक्रतः गुरुः सप्तमराशौ भवेत् गुरुतः शुक्रोऽपि सप्तमराशौ भवेत्। एवं सप्तमराशौ यदा परस्परं भवतः तदा जनाः ऋभयशोकपीडिताः भवन्ति अवृष्टिश्च भवति इत्यर्थः।

यथा -

**गुरुभृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौ यदा।**

**तदा प्रजा ऋभयशोकपीडिता न वारि पश्यन्ति पुरन्दरोज्झितम्॥**

**८.१०) शुक्रस्य अग्रवर्तिनां सर्वेषां ग्रहाणां फलविचारः**

यदा बृहस्पतिः बधः कुजः शनैश्चरः एते सर्वे शुक्रस्य अग्रपथानुवर्तिनः स्थिता भवन्ति तदा मनुष्याणां पन्नगानां देवयोनीनां संग्रामाः भवन्ति। तथा वायवः पर्वतानां वृक्षाणां अन्तकाः भवन्ति। तथा मित्राणि मित्रभावे संस्थिताः न भवन्ति। तथा ब्राह्मणाः अग्निहोत्रादिषु स्वक्रियासु रताः न भवन्ति।वृष्टिः अपर्याप्तो भवति।

**शुक्रस्य अग्रतः स्थितस्य शनेः फलम् -**

शुक्रस्य अग्रतः यदि शनि स्थिते सति म्लेच्छजनाः मार्जाराः गजाः गर्दभाः महिष्यःकृष्णधान्यं वराहाः निषादजनाः शूद्रजनाः अपि च दक्षिणदिग्वासिभिर्जनै सहिताः एते सर्वे नेत्रेषु रोगैः वायुना च उत्पन्नैः दोषैः विनाशं व्रजन्ति।

**अग्रस्थितस्य भौमस्य फलम् -**

यदि शुक्रस्य अग्रतः कुजः स्थितश्चेत् तदा अग्नि संग्रामदुर्भिक्षचोरैः प्रजान् पीडयति। यदि उत्तरस्यां दिशि तिष्ठति चेत् जङ्गमाख्यानि स्थावराणि निस्संदेहं निहन्ति। तथा दिशाः अग्निना विद्युता रजसा च पीड्यते।

**बृहस्पतौ अग्रतः स्थिते शुक्रस्य फलम् -**

शुक्रः बृहस्पतौ अग्रवर्तिनि सति समस्तं सुक्लवर्णं तथा ब्राह्मणाः गावः देवाःइत्यादयः ये सन्ति तेषां स्थानानि नाशयति। तथा पूर्वां दिशिं हन्ति। मेघाः करकावृष्टिं मुञ्चन्ति। लोकानां कण्ठे रोगाः भवन्ति। भूरिसस्यं भवेत्।

**शुक्रस्य अग्रतः स्थिते बुधे फलम् -**

यदा शुक्रस्य अग्रतः बुधः अस्तमितो वा उदितो वा भवति तदा जलं अधिकं ददाति। तथा ज्वरादीन् रोगान् च करोति। पित्रजकामलांश्च (पित्तसंबन्धिरोगाः) करोति।

ग्रीष्मजातांश्च सस्यादीन् पुष्टिं नयति। तथा वनस्थान् अग्निहोत्रे सक्तान् मल्लादीन् अश्वान् वैश्यजातीयान् गाःश्वाहनैः सह नरपतीन् सर्वाणि पीतवर्णानि द्रव्याणि च पश्चिमदिशि स्थितान् च नाशयति।

# ८.११) प्रश्नावली

**१. संक्षेपेण लिखत** **५*२= १०**

१. शुक्रस्य नववीथयः के ?

२. उदङ्मध्ययाम्यमार्गेषु के के विथयः कथं कथं अन्तर्भवन्ति ?

**२. विस्तरेण उत्तरं लिखत** **१०*७=७०**

१. शुक्रस्य नववीथीनां लक्षणानि फलानि च विचारयत ?

२. उत्तरमध्यमदक्षिणमार्गप्रविभागान् फलानि च विचारयत ?

३. शुक्रस्य षण्मण्डलानि तेषां फलानि च विचारयत ?

४. दिवादृष्टस्य शुक्रस्य विशेष फलं प्रतिपादयत ?

५. तिथिषु अस्तमयोदये शुक्रस्य फलानि निरूपयत ?

६. शुक्रस्य वर्णलक्षण फलानि चर्चयत ?

७. गुरुशुक्रयोः अन्योन्यं सप्तमस्तयोः फलविचारं कुरुत ?

**३. व्याख्यात** **२०*३=६०**

१. शुक्रस्य नव वीथीनां मार्गत्रयस्य च लक्षणानि विशेषफलानि विस्तरेण लिखत ?

२. नक्षत्राणां भेदनात् शुक्रस्य फलानि प्रतिपादयत ?

३. शुक्रस्य अग्रवर्तिनां सर्वेषां ग्रहाणां फलानि विचारयत ?

# संरचना


९. नवमोऽध्यायः

९.१ ) अवतरणिका

९.२) उद्धेश्यानि

९.३) नक्षत्रावस्थितवशात् शनेः फलम्

९.४) नक्षत्रेषु शनिचाररस्य फलम्

९.५) विशाखस्थस्य गुरोः कृत्तिकास्थस्य सौरस्य तथा अनयोरेकार्क्षगतयोः फलविचारः

९.६) शनेः वर्णस्वरूपवशात् फलम्

९.७ ) प्रश्नावली

# ९. नवमोऽध्यायः

## ९.१ ) अवतरणिका

समस्तजगतः शुभाशुभफलविषयान् ज्ञातुं बहवः मार्गाः सन्ति तेष्वन्यतमः ग्रहचारो भवति। ग्रहाणां चारवशात् कदावृष्टिर्भवति, कदा उपद्रवो भवति, कदा भूकम्पादयो भवन्ति इत्येवं कस्मिन् देशे अरिष्टादयो वा शुभफलानि वा कदा कथं भवन्ति इत्यपि ज्ञातुं शक्यते। प्रत्येकं ग्रहस्य तथैव अगस्त्यस्य सप्तर्षीणां ज्योतिर्मयस्वरूपाणां चारवशात् एतत् सर्वं पृथक् पृथक् ज्ञातुं शक्यते। अस्मिन्नध्याये शनेः चारवशात् कथं कीदृशं फलं भवति इति प्रदर्श्यते।

# ९.२) उद्धेश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* नक्षत्रावस्थितवशात् शनेः फलम् किमिति चर्चयितुं समर्थो भवति।

* नक्षत्रेषु शनिचारस्य फलम् किमिति विचारयितुं शक्नोति।

* विशाखस्थस्य गुरोः कृत्तिकास्थस्य सौरस्य तथा अनयोरेकार्क्षगतयोः फलविचारं कर्तुं समर्थो भवति।

* शनेः वर्णस्वरूपवशात् फलम् किमिति ज्ञात्वा विचारयितुं शक्नोति।

### ९.३) नक्षत्रावस्थितवशात् शनेः फलम्

यदि श्रवण स्वाति हस्त आर्द्रा भरणी पूर्वाफल्गुनी एतेषु नक्षत्रेषु शनैश्चरः स्थित्वा विमलमूर्तिः भवति चेत् तदा भूमिं प्रभूतेन सलिलेन छन्नं करोति। तथैव आश्रेषा शतभिषक् ज्येष्ठा एतेषु नक्षत्रेषु यदि स्थितश्चेत् क्षेमं करोति। प्रभूतं जलं न ददाति। तथा मूले स्थितश्चेत् दुर्भिक्षं संग्रामं अवर्षणं च करोति।

यथा -

**श्रवणानिलहस्तार्द्राभरणीभाग्योपगः सुतोऽर्कस्य**

**प्रचुरसलिलोपगूढां करोति धात्रीं यदि स्निग्धः।**

**अहिवरुणपुरन्दरदैवतेषु सुक्षेमकृन्नचाति जलम्**

**क्षुच्छस्त्रावृष्टिकरो मूले प्रत्येकमपि वक्ष्ये।।**

### ९.४) नक्षत्रेषु शनिचारस्य फलम्

१. अश्वनीभरण्योः समवस्थितस्य शनेः फलम् - यदि शनिः अश्विन्यां अवस्थितश्चेत् तदा अश्वान् तुरगोपचारकान् तथा काव्यकुशलान् चिकित्सकान् अमात्यान् नाशयति। यदि भरण्यां शनिः स्थितश्चेत् तदा नर्तकान् वादकान् गेयज्ञान् क्षुद्रान् निषादान् च हन्ति।

२. कृत्तिकारोहिण्योः समवस्थितस्य शनेः फलम् - कृत्तिकायां अवस्थितः शनिः सुवर्णकारान् लोहकारान् यस्करान् सेनापतीन् च पीडयति। रोहिण्यां स्थिः सौरः कोशलजनान् मद्रान् काशीयान् पञ्चालान् शाकटिकान् च पीडयति।

३. मृगशिरर्द्रायोरवस्थितशनेः फलम् - मृगशिरसि स्थितः शनिः वत्सजनान् याजकान् आर्यजनान् मध्यदेशीयान् च पीडयति। आर्द्रायां स्थितः शनिः पारतराजनान् मठजनान् तैलिकान् रजकान् तस्करान् च पीडयति।

४. पुनर्वसुपुष्ययोः स्थितशनेः फलम् - पुनर्वसौ स्थितः शनिः पञ्चनदजनान् गह्वरवासिनः सुराष्ट्रदेशान् सैन्धवान् सौवीरान् च पीडयति। पुष्ये स्थितः शनिः घाण्टिकान् घौषिकान् श्रावकान् यवनान् वणिजः किरातान् द्यूतकान् पुष्पाणि च पीडयति।

५. आश्लेषामघयोः स्थितशनेः फलम् - आश्लेषायां स्थितः शनिः जलोद्भवान् प्रणिनः द्रव्याणि सर्पान् च पीडयति। मघायां स्थितः शनिः बाह्लिकान् चीनान् गान्धारान् शूलिकान् पारतान् अपि च वैश्यवर्णान् अविलयग्रामान् किरातान् च पीडयति।

६. पूर्वाफल्गुन्युत्तराफल्गुन्योः स्थिशनेः फलम् - पूर्वाफल्गुन्यां स्तितः शनिः मधुराम्ललवणतिक्तकटुकषायादीनां षड्रसविक्रयकारिणां वेश्यानां कन्यकानां महाराष्ट्रदेशीयानां च पीडां करोति। उत्तराफल्गुन्यां स्थितः शनिः राज्ञां गुडस्य लवणस्य पानीयस्य भिक्षुकानां च पीडां करोति। तथैव तक्षशिलानगरीमपि पीडयति।

७. हस्ते स्थितशनेः फलम् - हस्ते यदि शनिः स्थितश्चेत् तदा नापिताः चाक्रिकः कुम्भकार तैलकार प्रभृतयः तस्कराः वैद्याः सूचिकाः शिल्पिनः द्विपाः वेश्याः कौशलकाः मालाकाराः एते सर्वे पीडां प्राप्नुवन्ति।

८. चित्रस्कत्योः स्थितशनेः फलम् - चित्रायां स्थितशनिः प्रमदजनान् लिपिज्ञान् चित्रज्ञान् चित्रभाण्डानि च पीडयति। स्वातौ स्थितः शनिः मगधवासिनः गुढपुरुषान् दूतान् सूतान् पोतान् नृत्यज्ञान् च पीडयति।

९. विशाखस्थे शनेः फलम् - विशाखायां स्थितः शनिः त्रैगर्तजनान् चीनान् कुलूतनिवासिनः काश्मीरं सस्यानि माञ्जिष्ठं कौसुम्भं च नाशयति।

१०. अनुराधायां स्थितशनेः फलम् - अनुराधायां स्थितः शनिः कुलूतान् तङ्गणजनान् पर्वतवासिनः काश्मीरजनान् सचिवान् चक्रचरान् कुम्भकारप्रभृतीन् च पीडयति। तथा घण्डावादिनः शिल्पिनः च पीडयति। मित्राणां परस्परं विभेदो भवति।

११. ज्येष्ठायां मूले च स्थितशनेः फलम् - ज्येष्ठायां स्थितः शनिः राज्ञः पुरोहितान् राजपूजितान् संग्रामवीरान् समूहान् प्रधानकुलानि च घातयति। मूलेस्थितः शनिः काशायजननान् कोशलान् पांचालान् आम्रादीनि फलानि ओषधयः संग्रामकुलिशान् च उपतापं प्रापयति।

१२. पूर्वाषाढायां स्थितशनेः फलम् - पूर्वाषाढायां स्थितशनिः अङ्गजनान् वङ्गान् कौशलान् गिरिव्रजजनान् मगधान् पौण्ड्रान् मिथिलांश्च पीडयति। ताम्रलिप्यां नगर्यां ये जनाः वसन्ति तान् अपि पीडयति।

१३. उत्ताराषाढायां स्थितशनेः फलम् - उत्तराषाढायां अर्कपुत्रः यवनान् नाशयति उज्ञयनीदेशं शबरान् पारियात्रिकान् कुन्तिभोजांश्च निहन्ति।

१४. श्रवणधनिष्ठयोः स्थितशनेः फलम् - श्रवणेस्थितसौरः राजाधिकृतान् ब्रह्मणप्रधानान् वैद्यान् आचार्यान् कलिङ्गान् च निहन्ति। धनिष्ठायां स्थितः सौरः मगधदेशाधिपतेः विजयं ददाति। तथा वित्तरक्षणेनियुक्तानां वृद्धिः भवति।

१५. शतभिषक् पूर्वाभाद्रोत्तराभाद्रपदेषु स्थितशनेः फलम् - शतभिषक् पूर्वाभाद्रयोः स्थितः शनिः वैद्यान् काव्यज्ञान् मद्यपानप्रसक्तान् क्रयविक्रयजीविनः नीतिशास्त्रं च पीडयति। उत्तराभाद्रायां स्थितः शनिः सरितः रथाधिकारकाः शिल्पिनः तक्षकाः योषितः हिरण्यं इत्यादयः ये सन्ति तान् निहन्ति।

१६. रेवत्यामवस्थितशनेः फलम् -- रेवत्यां स्थितशनिः नृपेणपोषितान् तथा क्रौञ्चद्वीपाश्रितान् धान्यानि शबरजनान् यवनान् च पीडयति।

## ९.५) विशाखस्थस्य गुरोः कृत्तिकास्थस्य सौरस्य तथा अनयोरेकार्क्षगतयोः फलविचारः

यस्मिन् काले बृहस्पतिः विशाखायां तथा शनिः कृत्तिकायां भवतः तस्मिन् काले प्रजानां भयं भवति। एकं नक्षत्रं आसाद्य उभौ अपि तिष्ठतः चेत् नगरस्य प्रभेदो भवति।

यथा -

**यदा विशाखासु महेन्द्रमन्त्री सुतश्चभानोर्दहनर्क्षयातः।**

**तदा प्रजानामनयाऽतिघोरः पुरप्रभेदोगतयोर्भमेकम्।।**

## ९.६) शनेः वर्णस्वरूपवशात् फलम्

शनैश्चरस्य वर्णवशात् स्वरूपवशात् च प्रत्येकं फलं भवति। शनिः यदि चित्रवर्णे दृश्यते तर्हितदा पक्षिणः हन्ति। यदि शनैश्चरः पीतरश्म्या दृश्यते तर्हि तदा दुर्भिक्षं भवति। यदि रक्ताभः भवति तर्हि तदा सङ्ग्रामः भवति। यदि भस्मसदृशकान्त्या भवति चेत् प्रजानां बहुवैरिकरः भवति।

यथा -

**अण्डजहा रविजो यदि चित्रः क्षुद्भयकृद्यदि पीतमयूखः।**

**शस्त्रभयाय च रक्तसवर्णो भस्मनिभो बहुवैरकरश्च।।**

यदा सौरः वैढूर्यनामकमणेरिव निर्मलो भवति तदा सःलोकानां शुभं श्रेयश्च करोति। तथा बाणपुष्पाणामिव अतिकृष्णवर्णे वा अतसीकुसुमानामिव अतिनीलवर्णे वा भवति चेत् प्रशस्तो भवति। यादृशं वर्णं शितं रक्तं पीतं वा कृष्णं वा समाश्रयति तत् समानवर्णान् द्विजादीन् नाशयति। तद्यथा - रक्तवर्णः क्षत्रियान् नाशयति । पीतवर्णः वैश्यादीन् नाशयति कृष्णवर्णः शूद्रादीन् नाशयति इत्येवं प्रकारेण भवति।

यथा -

**वैढूर्यकान्तिविमलः शुभकृत् प्रजानां**
**बाणातसीकुसुमवर्णनिभश्च शस्तः।**
**यं चापि वर्णमुपगच्छति तत्सवर्णान्**
**सूर्यात्मजः क्षपयतीति मुनिप्रवादः।।**

# ९.७ ) प्रश्नावली

**१. संक्षेपेण लिखत** **५*३= १५**

१. नक्षत्रावस्थित वशात् शनेः फलम् किं ?
२. विशाखस्थस्य गुरोः कृत्तिकास्थस्य सौरस्य फलं किं ?
३. एकार्क्षगतयोः गुरुशन्योः फलं किं ?

**२. विस्तरेण उत्तरं लिखत** **१०*२=२०**

१. नक्षत्रावस्थितस्य शनेः फलानि विस्तरेण लिखत ?
२. शनेः वर्णस्वरूपवशात् फलानि निरूपयत ?

**३. व्याख्यात** **२०*१=२०**

१. कृत्तिकादि नक्षत्रेषु समवस्थितस्य शनेः फलानि चर्चयत?

# संरचना


१०. दशमोऽध्यायः

१०.१) अवतरणिका

१०.२) उद्धेश्यानि

१०.३) केतूनां उदयास्तमयलक्षणविचारः

१०.४) दिव्यान्तरिक्षभौमानां केतूनां लक्षणानि

१०.५) केतूनां मतान्तरम्

१०.६) केतूनां विषये वराहमिहिरस्य सिद्धान्तः

१०.७) केतोः शुभाशुभलक्षणफलविचारः

१०.८) केतुसहस्त्रस्य लक्षणफलविचारः

१०.९) केतूनां विशेषलक्षणफलविचारः

१०.१०) शुभान् केतून् वर्जयित्वा अशुभानां नक्षत्रस्पर्शधूपनात् दुष्फलविचारः

१०.११) प्रश्नावली

# १०. दशमोऽध्यायः

## १०.१) अवतरणिका

समस्तजगतः शुभाशुभफलविषयान् ज्ञातुं बहवः मार्गाः सन्ति तेष्वन्यतमः ग्रहचारो भवति। ग्रहाणां चारवशात् कदावृष्टिर्भवति, कदा उपद्रवो भवति, कदा भूकम्पादयो भवन्ति इत्येवं कस्मिन् देशे अरिष्टादयो वा शुभफलानि वा कदा कथं भवन्ति इत्यपि ज्ञातुं शक्यते। प्रत्येकं ग्रहस्य तथैव अगस्त्यस्य सप्तर्षीणां ज्योतिर्मयस्वरूपाणां चारवशात् एतत् सर्वं पृथक् पृथक् ज्ञातुं शक्यते। अस्मिन्नध्याये केतूनां चारवशात् कथं कीदृशं फलं भवति इति प्रदर्श्यते।

# १०.२) उद्देश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* केतूनां उदयस्तमयलक्षणविचारं कर्तुं समर्थो भवति।

* दिव्यान्तरिक्षभौमानां केतूनां लक्षणानि ज्ञातुं योग्यो भवति।

* केतूनां विषये मतान्तरम् आविष्कर्तुं अर्हो भवति।

* केतूनां विषये वराहमिहिरस्य सिद्धान्तं प्रतिपादयतुं पारयति।

* केतोः शुभाशुभलक्षणफलानि ज्ञातुं वक्तुं च समर्थो भवति।

* केतुसहस्रस्य लक्षणफलविचारं कर्तुं शक्नोति।

* केतूनां विशेषलक्षणफलविचारं कर्तुं समर्थो भवति।

* शुभान् केतून् वर्जयित्वा अशुभानां नक्षत्रस्पर्शधूपनात् दुष्टफलविचारं कर्तुं समर्थो भवति।

केतुचराध्याये आदौ गर्गपराशर रासित देवलैः प्रतिपदिताः केतवः बहुप्रकाराः सन्ति। तेषां केतूनां प्रतिपादनमत्र क्रियते। तथैव काश्यपऋषिपुत्रनारदवज्रादि विरचितान् बहून् दृष्ट्वा वराहमिहिरेण सूचिताः केतवः अपि सन्ति। तेषां विवरणमत्र निन्देहं क्रियते।

## १०.३) केतूनां उदयास्तमयलक्षणविचारः

अत्र केतवः त्रिविधाः इति प्रतिपादिताः दिव्यान्तरिक्षभौमाः इति त्रिविधाः व्यवह्रियन्ते। वस्तुतः एतेषां केतूनां उदयास्तमयौ गणितविधानेन ज्ञातुं न शक्यते। यस्मात् केतवः त्रिविधाः दिव्यान्तरिक्षभौमा इति मत्वा। दिव्याकाशे ये भावाः सन्ति ते दिव्याः भवन्ति। अन्तरिक्षे ये भावाः सन्ति ते अन्तरिक्षाः भवन्ति। भूमौ भावः भौमाः भवन्ति इति हेतोः उत्पातरूपत्वात् उदयास्तमयौ न ज्ञायेते।

यथा -

**दर्शनमस्तमयोवा न गणितविधिनास्य शक्यते ज्ञातुम्।**

**दिव्यान्तरिक्षभौमास्त्रिविधा स्युः केतवो यस्मात्॥**

**तेषां स्वरूपविचारः** - यस्मिन् देशे अग्निरूपं दृश्यते तदेव केतुरूपं इति कथितम्। अर्थात् कृमिविशेषाः मणयः मरकतप्रभृतीनि रत्नानि एतानि परित्यज्य अन्यानि एतादृशानि यानि दृश्यन्ते तानि केतुरूपाणि इत्यर्थः। अर्थात् चन्द्रकान्त प्रभृतयः मणय- कृमिविशेषाः इत्यादयः स्वभावात् एव अनलरूपे दृश्यन्ते। एतादृशानलरूपाणि त्यक्त्वा अन्यानि केतवः भवन्ति।

यथा -

**अहुतोशेऽनलरूपं यस्मिंस्तत्केतुरूपमेवोक्तम्।**

**खद्योतपिशाचालयमणिरत्नादीन् परित्यज्य**

## १०.४) दिव्यान्तरिक्षभौमानां केतूनां लक्षणानि

**दिव्याः** - दिव्याकाशे भावा दिव्याः। नक्षत्राणां मध्ये ये केतवः दृश्यन्ते ते दिव्याः भवन्ति।

**अन्तरिक्षाः** - यज्ञध्वज - अस्त्र - भवन - रथ - वृक्ष - गजोपमाः - शूल -

स्तम्भ - गदाकाराः अन्तरिक्षाः इति प्रकीर्तिताः।

**भौमाः** - अन्ये ये भूमौ दृश्यन्ते ते भौमाः भवन्ति

**१०.५) केतूनां मतान्तरम्** - केतूनां विषये पराशरादयः मुनयः भिन्नभिन्नसंख्याः कथिताः। शताधिकएकमिति। सहस्राधिकमिति कथयन्ति। मुनिर्नारदस्तु कतोः बहुरूपं किन्तु एकमेव इति कथयति।

**१०.६) केतूनां विषये वराहमिहिरस्य सिद्धान्तः** - कस्मिन् आकाशभागे कस्य ग्रहस्य कस्य नक्षत्रस्य वा समीपे केतुः उदितः अथवा अस्तमितः इति ज्ञात्वा सितरक्तपीतकृष्णादीकान् वर्णान् अपि ज्ञात्वा केतूनां फलं वक्तव्यम्। कियन्तं कालं यावत् फलपाको भविष्यति। यावन्ति दिनानि दर्शनपथं गतः तस्य तावन्तः मासाः यावत्फलपाको भविष्यति एवमेव मासैः संवत्सरान् वदेत्। अर्थात् यावन्तः मासाः दर्शनं भवति तावन्तः अब्दाः यावत् फलपाको भविष्यति। अर्थात् मासतुल्यानि वर्षाणि भवन्ति।

प्रथमपक्षत्रयात् फलपाको आरभ्यते अयं नियमः सर्वेषां केतूनां सामान्यम्। केतुदर्शनात् ऊर्ध्वं प्रथमं पक्षत्रयं अर्थात् पंचचत्वारिंशत् दिनानि निष्फलानि भवन्ति। ततः अनन्तरं फलपाकं वदेत्। तथैव यदा मासाः दृश्यन्ते तदा तस्मात् एव पक्षत्रयमतिक्रम्य मासतुल्यानि वर्षाणि वदेत्।

**१०.७) केतोः शुभाशुभलक्षणफलविचारः**

यदि केतुः ह्रस्वः अस्थूलः निर्मलः सुस्नेहः स्पष्टः शीघ्रमेव दर्शनं यातः श्वेतवर्णः भवति चेत् उदयमात्रे सुभिक्षं भवति। तथा सुवृष्टिश्च भवति।

यथा -

**ह्रस्वतनुः प्रसन्नः स्निग्धस्त्वृजुरचिरसंस्थितः शुक्लः।**

**उदितोऽथवाभिवृष्टः सुभिक्षसौख्यावहः केतुः।**

पूर्वं उक्तरीत्या ह्रस्वतनुः प्रसन्नः सुस्नेहः स्पष्टः स्वेतवर्णः यदि केतु न भवति उक्तरीतेः भिन्नो यदि भवति चेत् शुभफलं न ददाति। सः धूमकेतुः भवति। इन्द्रायुधसदृशः भवति चेत् अपि न शुभकरः एव। तथा द्विशिखास्त्रिशिखाश्च विशेषतः भवन्ति चेत् अपि न शुभकर एव।

यथा -

**उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः।**

**इन्द्रयुधानुकरी विशेषतो द्वित्रीचूलो वा।।**

१०.८) केतुसहस्रस्य लक्षणफलविचारः

**रविजाः पंचविंशति केतवः** - चन्द्रकान्तिप्रभृतयः मणयः सुवर्णसदृशरूपाः किरणसंज्ञाः ये केतवः सन्ति ते सूर्यपुत्राः। ते पूर्वस्यां अपरस्यां दिशि दृश्यन्ते चेत् राज्ञः विरोधप्रदः भवति।

**अग्निपुत्राः (पंचविंशति)** - नीलपीतवर्णाः दहनाः अतिलोहिताः वृक्षनिर्यासाः क्षतजाः एतादृशरूपवर्णतुल्याः ये च केतवः पंचविंशति सन्ति ते अग्निपुत्राः ते अग्निभयप्रदाः भवन्ति।

**मृत्युसुताः(पंचविंशति) -** वक्रशिखाः अस्निग्धाः असिताः पंचविंशति केतवः ते मृत्योः पुत्राः। यदि दक्षिणस्यां दिशि विलोकयन्ते चेत् जनानां मारकं भवति।

**भूपुत्राः (द्वाविंशतिः)** - वृत्ताकाराः दर्पणसदृशपरिवर्तुलाकाराः रश्मिसंयुक्ताः द्वाविंशतिभूमिपुत्राः भवन्ति ते पूर्वोत्तरस्यां दिशि जलस्य वा तैलस्य वा सादृश्यकान्तयः यदि दृष्टाश्चेत् दुर्भिक्षं भवति।

**चन्द्रसुताः (त्रयः) -** चन्द्ररश्मिसदृशाः रजततुषारसदृशाः अतिशुक्लवर्णे स्थिताः त्रयः केतवः चन्द्रस्य सुताः सौम्यायां दिशि अवलोक्यन्ते चेत् सुभिक्षमावहन्ति।

**ब्रह्मदण्डाख्यः -** ब्राह्मणः पुत्रः एक एव स त्रिचूडः । सः सितादिभिः त्रिभिः वर्णैः उपलक्षितो भवति। सः ब्रह्मदण्डसंज्ञो भवति। सर्वासु दिक्षु दृश्यते चेत् सर्वत्र क्षयकरं करोति।

**शुक्रपुत्राः(चतुरशीति) -** शुक्रस्य चतुरशीति संख्याका पुत्राः सन्ति। ते विस्तीर्णासिताः निर्मलदेहाः भवन्ति। अनिष्टफलदा भवन्ति।

**शनैश्चरपुत्राः ( षष्टिः ) -** षष्टिसंख्याकाः शनैश्चरस्य पुत्राः भवन्ति। एते कनकसंज्ञाः भवन्ति। द्विचूडाः निर्मलाः दीप्तिमन्ताः सर्वत्र दिक्षु यदि दृष्टाः भवन्ति

चेत् अपि अशुभफलदाः भवन्ति।

**गुरुसुताः (पंचषष्टिः)** - गुरुसुताः पंचषष्टिकेतवः विकचसंज्ञाः भवन्ति। ते सितैकताराः चूडारहिताः निर्मलदेहाः भवन्ति। ते दक्षिणस्यां दिशि दृश्यन्ते चेत् अनिष्टफलदाः भवन्ति।

**बुधपुत्राः (एकपंचाशत्)** - एकपंचाशत् केतवः तस्करसंज्ञाः न अतिस्फुटाः अल्पदेहाः दीर्घआयामिनः श्वेतवर्णाः बुधसुताः भवन्ति। सर्वासु दिक्षु दृश्यन्ते । ते च अनिष्टफलदाः भवन्ति।

**भौमपुत्राः (षष्ठिः)** षष्ठिसंख्याकाः रक्तअग्निसदृशाः चित्रूडातारा: अङ्गारकपुत्राः ते उत्तरस्यां दिशि दृश्यन्ते चेत् पापफलदाः भवन्ति।

**राहु पुत्राः (त्रयस्त्रिंशत्)** - त्रयस्त्रिंशत् संख्याकाः राहुसुताः तामसकीलकसंज्ञाः। एते प्रसिद्धाः। ते अर्कचन्द्रमण्डलस्थाः दृश्यन्ते। एतेषां फलं लक्षणं च रविचाराध्याये कथितम्।

**अग्निपुत्राः(विंशत्यधिकशतं)** - विरूपसंज्ञाः विंशत्यधिकशतसंख्याकाः अग्निपुत्राः भवन्ति। एते दीप्ताः तनवः घोराः अग्निभयं कुर्वन्ति।

**वायुपुत्राः (सप्तसप्ततिः)** - सप्तसप्ततिसंख्याकाः अरुणसंज्ञाः केतवः वायोः सुताः भवन्ति। एते श्यामललोहितवर्णाः तारकवर्जिताः बालव्यजन आकृतयः व्याक्षिप्तरश्मयः रूक्षाः दुष्टफलाः भवन्ति। एते अनियतदर्शनाः अर्थात् सर्वासु अपि दिक्षु दृश्यन्ते।

**प्रजापतिसुताः (अष्टौ) ब्रह्मणः पुत्राः (चतुरधिकद्विशतम्)** - गुणकनामान अष्टौ केतवः प्रजापतेः पुत्राः नक्षत्राणां समूहानां सदृशाकृतयः। एते अशुभफलदायिनः। तथा चतुरधिकद्विशतकेतवः चतुरस्राकाराः ब्रह्मणः पुत्राः पापफलदायिनः इत्येव ज्ञेयाः एते सर्वासुदिक्षु प्रभवाः

**वरुणपुत्राः ( द्वात्रिंशत् )** - द्वात्रिंशत् संख्याकाः कङ्कनामानः वरुणस्य पुत्राः सन्ति। वंशगुल्मवत् संस्थानाकृतयः चन्द्रवत् कान्तियुक्तिाः कष्टफलदायिनः भवन्ति। ते चापि सर्वासु दिक्षु प्रभवाः एव।

**कालपुत्राः (षण्णवतिः) -** कबन्धसंज्ञाः षण्णवति संख्याकाः केतवः कालपुत्राः भवन्ति। ते च्छिन्नशिराः अस्फुटाः जनपदानां स्रेयस्कराः भवन्ति। सर्वासु दिक्षु प्रभवाः भवन्ति।

**विदिक् पुत्राः (नव) -** दिगन्तरालाः नव संख्याकाः केतवः विदिक् पुत्राः भवन्ति। एतेश्वेतवर्णाः विस्तीर्णाः एकतारकाः। एते विदिक्षु दृश्यन्ते चेत् पापफलदाः भवन्ति।

### १०.९) केतूनां विशेषलक्षणफलविचारः

**वासकेतुलक्षणफलविचारः -** उत्तरस्यां दिशि दीर्घः अतिस्थूलः निर्मलतनुः वासुकेतुः भवति। स पश्चिमायां दिशि उदयं याति। सः वासकेतुर्यदि दृष्टश्चेत् तस्मिन्नेवाहनि मरकं करोति। उत्तममपि प्रधानं सुभिक्षं च कुरुते।

**अस्थिकेतोः शस्त्राक्यस्यलक्षणफलविचारः** - वासुकेतु सदृश लक्षणैर्युचोऽपि च अस्थिकेतुः स्नेहरहितः रूक्षः भवति। सः दुष्टश्चेत् दृर्भिक्षभयप्रदो भवति। वासकेतुसदृशः स्निग्धो निर्मलदेहः पूर्वस्यां दिशि यः दृश्यते सः शस्त्रकेतुसंज्ञो भवति। सः दृष्टश्चेत् शस्त्रकलहं मरकं च करोति।

**कपालकेतु लक्षणफलविचारः** - कपालकेतुर्नाम केतुः सः तु अमावस्यां पूर्वस्यां दिशि उदयं याति। स धूम्ररश्मिशिखः। सः आकाशस्य अर्धं यावद्विचरति। सः दृर्भिक्षं जनक्षयं अवृष्टिं रोगांश्च भवति।

**रौद्रकेतुलक्षणफलविचारः -** रौद्रनामकेतुः पूर्वस्यां दिशि दहनवीथ्यां दृश्यते। सः त्रिशिखः शूलाग्रो भवति। सः श्यावरूक्षताम्रार्चिः आकाशस्य त्रिभागगमनशीलश्च भवति। स च कपालकेतुना समानफलो भवति।

**चलकेतोः लक्षणफलविचारः -** पश्चिमायां दिशि चलकेतुर्नामकेतुः दृश्यते सः याम्याग्रया शिखया अङ्गुलोच्छ्रितयोपलक्षितो भवति। सः अङ्गुलप्रमाणोच्चया यथा यथा उत्तरां दिशं याति तथा तथा दीर्घतामायाति। वसिष्ठादीन् सप्तमुनीन् संस्पृश्य तथा धृवतारकं संस्पृश्य ततः प्रत्यागतः सः आकाशस्य अर्धमात्रमित्वा दक्षिणस्यां दिशि अस्तं गच्छति।

स एव चलकेतुः प्रयागकूलादारभ्य यावदवन्तींचोज्ञयनीं तथा पुष्करारण्यं नाम स्थानं तावत् नाशयते। उत्तरस्यां दिश्यपि च यावद्देविकां नदीं तावत् नाशयेत्। मध्यदेशं अतिशयेन नाशयेत्।

स चलकेतुः अपरान् देशानपि रोगदुर्भिक्षैः क्वचित् क्वचित् नाशयति। अस्य केतोः दशमासाः फलपाकः अर्थात् दर्शनात् त्रिपक्षात् परतः यावत् दशमासाः तावत् अशुभं फलं ददाति। गर्गादिभिः अष्टादशमासाः फलपाकः कथितः।

**श्वेतकेतोः लक्षणफलविचारः** - श्वेतकेतुर्नाम केतुः प्राक् दिशि अर्धरात्रिकाले दृश्यते। तस्य दक्षिणदिशि शिखा भवति। कनामा द्वितीयः केतुः पश्चिमायां दिशि दृश्येते। तौ च द्वावपि युगपत् सप्तदिनानि दृश्यते। तौ च द्वादपि निर्मलौ दृष्टौ च सुभिक्षं श्रेयश्च ददतः। यदि सप्तदिनेभ्यो अधिकं दृश्यते चेत् तदा दशवर्षाणि संग्रामजमुपतापं जनयति।

**श्वेतलक्षणफलविचारः** - श्वेतनाम केतुः जटासदृशः परुषः कृष्णवर्णः आकाशे त्रिभागं यावत् गच्छति ततः अपसव्यरूपेण वामभागे विनिवृत्तिं करोति। तृतीयांशावशेषानां प्रजानां क्षयं करोति अर्थात् द्वौ भागौ क्षयं नयति।

**रश्मिकेतोर्लक्षणफलविचारः** - रश्मिकेतुर्नाम केतुः आधूम्रवर्णेन शिखयोपलक्षितः तथा कृत्तिका समीपे उदयं गच्छति। स च श्वेतकेतुसदृशं फलं ददति।

**ध्रुवकेतोर्लक्षणफलविचारः** - ध्रुवकेतुर्नाम केतुः तु अनियतगतिप्रमाणवर्णाकृतिः भवति। स च सर्वासु दिक्षु दृश्यते। स द्विव्यान्तरिक्षभौमः त्रिप्रकारो भवति। केचित् विश्वे नानाकारो भवति इति इच्छन्ति। स निर्मलशरीरः शुभफलदो भवति। एष च राज्ञां विनाशिनां सेनाङ्गेषु देशानां विनाशिनां गृहतरुशैलेषु तथा गृहस्थानामुपस्करेषु दर्शनं याति।

**कुमुदकेतोर्लक्षणफलविचारः** - कुमुदनाम केतुः श्वेतवर्णे भवति। स च पश्चिमायां दिशि दृश्यते। सः प्राक्शिखावान् भूत्वा रात्रौ एव दृश्यते। स तु दृष्टश्चेत् दशवर्षाणि असमंसुभिक्षं भवति।

**मणिकेतोर्लक्षणफलविचारः** - पश्चिमायां दिशि अत्यल्पतारकरूपेण एकयाम एव मणिकेतुः दृश्यते। यामशब्देन रात्रिचतुर्भाग उच्यते। स्तनोद्गता क्षीरधारेव शिखा अस्य भवति। असौ केतुः उदयमात्र एव अर्धपंचमान् मासान् सुभिक्षं करोति प्रायो नकुलादीनां क्षुद्रजन्तूनां प्रादुर्भावं करोति।

**जलकेतोर्लक्षणफलविचारः** - जलकेतुर्नाम केतुः अपि पश्चिमायां दिशि दृश्यते। एषः निर्मलदेहेन पश्चिमे उच्चया शिखया युतो भवति। अयं दृष्टश्चेत् नवमासान् यावत् सुभिक्षं करोति। लोकस्य शान्तिः श्रेयश्च करोति।

**भवकेतोर्लक्षणफलविचारः** - भवकेतुर्नाम केतुः पूर्वस्यां दिशि एकरात्रं दृश्यो भवति। अयं अत्यल्पतारको भवति। निर्मलदेहो भूत्वा सिंहलङ्गूलोपमया प्रदक्षिणावर्तया शिखया तिष्ठति। सः स्निग्धो भूत्वा यावत् क्षणान् दर्शनमायाति तावन्मासान् असमं सुभिक्षं निर्दिशेत्। सः यदि रूक्षो भवति तर्हि पुनः प्राणान्तिकान् रोगान् वदेत्।

**पद्मकेतोर्लक्षणफलविचारः** - पद्मकेतुर्नाम केतुः पश्चिमायां दिशि एकां रात्रिं दृश्यते। मृणालगौरवर्णे भवति। सः दृष्टश्चेत् सप्तवर्षाण्यावत् अतिहर्षयुक्तानि भवन्ति।

**आवर्तकेतोर्लक्षणफलविचारः** - आवर्तनामकेतुः रात्र्यर्धे पश्चिमायां दिशि दक्षिणदिगाश्रितशिखया रक्तवर्णे निर्मलतनुना दृश्यते तावन् मासान् सुभिक्षं करोत।

**संवर्तकेतोर्लक्षणफलविचारः** - सन्ध्यासमये पश्चिमायां दिशि धूम्रतामरवर्णशिखया संवर्तनाम केतुः आकाशस्य तृतीयभागमाक्रम्य शूलाग्रेव दृश्यते। सः रौद्रोभयावहो भवति। सः यावत् क्षणान् दृश्यो भवति। तावत्संख्यानि वर्षाणि अशुभफलप्रदो भवति। तथा शस्त्रनिपातैः संग्रामैः नृपान् नाशयति। यस्मिन्नक्षत्रे उदितो दृश्यते तच्च पीडयति।

### १०.१०) शुभान् केतून् वर्जयित्वा अशुभानां नक्षत्रस्पर्शधूपनात् दुष्फलविचारः

ये केतवः प्रशस्तफलाः तान् त्यक्त्वा अन्यैः केतुभिः नक्षत्रे यस्मिन् आधूपितेऽथवा स्पृष्टे येषां राज्ञां मरणं भवति तान् नृपान् अत्र उच्यन्ते।

| केतुना आधूपितं अथवा स्पृष्टं नक्षत्रम् | | फलविवरणम् |
|---|---|---|
| १.अश्विनी | - | अश्मकानां जनानां अधिपतिं हन्यात् |
| २. भरणी | - | किराताधिपतिं हन्यात् |
| ३. कृत्तिका | - | कलिङ्गाधिपति हन्यात् |
| ४. रोहिणी | - | शूरसेनपतिं हन्यात् |
| ५. मृगशिरा | - | उशीनराधिपतिं हन्यात् |
| ६. आर्द्रा | - | जलजाजीवाधिपं हन्यात् |
| ७. पुनर्वसु | - | अश्मकाधिपतीन् हन्यात् |
| ८. पुष्यमी | - | मगधाधिपं हन्यात् |
| ९. आश्लेषा | - | असिकजनानां अधिपतिं हन्यात् |
| १० मघा | - | अङ्गाधिपतिं हन्यात् |
| ११ पूर्वाफल्गुनी | - | पाण्ड्यानाथं हन्यात् |
| १२. उत्तरफल्गुनी | - | उज्ञयनीपतिं हन्यात् |
| १३ हस्त | - | दण्डकारण्यनाथं हन्यात् |
| १४ चित्र | - | कुरुक्षेत्राधिपस्य मरणं भवति |
| १५ स्वीती | - | काश्मीरककाम्बोजनृपती न स्तः |
| १६ विशाखा | - | इक्ष्वाकुनाथः अलकानाथश्च हन्यते |
| १७ अनूराधा | - | पुण्ड्राधिपतिः हन्यते |
| १८ ज्येष्ठा | - | कन्याकुब्जापितेः मरणं भवति |
| १९ मूला | - | अन्ध्रपतिः मद्रकपतिः च हन्यते |
| २० पूर्वाषाढा | - | काश्यधिपतिः मरणमेति |
| २१ उत्तराषाढा | - | यौधेयकः अर्जुनायनः शिबिः चैद्यः एतान् नृपतीन् हन्ति |

| | | |
|---|---|---|
| २२ श्रवणं | - | केकयजनाधिपं हन्यात् |
| २३ धनिष्ठ | - | पंचनदाधिपतिं हन्यात् |
| २४ शतभिषक् | - | सिंहलाधिपतिं हन्यात् |
| २५ पूर्वाभाद्रपदः | - | वङ्गाधिपतिं हन्यात् |
| २६ उत्तराभाद्रपदः | - | नैमिषारण्याधिपतिं हन्यात् |
| २७ रेवती | - | किराताधिपतिं हन्यात् |

# १०.११) प्रश्नावली

**१. संक्षेपेण लिखत** **५*२= १०**

१. केतवः प्रधानतया कति विधाः ?

२. दिव्यान्तरिक्षभौमानां केतूनां लक्षणानि कानि ?

**२. विस्तरेण उत्तरं लिखत** **१०*४=४०**

१. केतूनां उदयास्तमय लक्षणानि विचारयत ?

२. केतूनां स्वरूपविचारं कुरुत ?

३. केतूनां विषये वराहमिहिरस्य सिद्धान्तः कः ? इति प्रतिपादय ?

४. केतूनां शुभाशुभलक्षणफलविचारं कुरुत ?

**३. व्याख्यात** **२०*४=८०**

१. केतूनां उदयास्तमय लक्षणविचारं कृत्वा तेषां स्वरूपं निरूपयत ?

२. केतुसहस्रस्य लक्षणफलविचारं कुरुत?

३. केतूनां विशेषलक्षणफलविचारं विस्तरेण कुरुत ?

४. शुभान् केतून् वर्जयित्वा अशुभानां नक्षत्रस्पर्शधूपनात् दुष्टफलानां विचारं कुरुत?

# संरचना


११. एकादशोऽध्यायः

११.१) अवतरणिका

११.२) उद्देश्यानि

११.३) सुमद्रवर्णनम्

११.४) विन्ध्यवर्णनम्

११.५) शरद्वर्णनम्

११.६) अगस्त्योदयलक्षणफलविचारः

११.६.१) उदितस्य अगस्त्यस्य लक्षणफलविचारः

११.६.२) उदयास्तमयलक्षणे शुभाशुभ फलविचारः

११.७) सप्तर्षिमण्डलचारविचारः

११.७.१) सप्तर्षिणां स्थानलक्षणविचारः

११.७.२) सप्तर्षिणां चारवशात् फलविचारः

११.८) प्रश्नावली

# ११. एकादशोऽध्यायः

## ११.१) अवतरणिका

समस्तजगतः शुभाशुभफलविषयान् ज्ञातुं बहवः मार्गाः सन्ति तेष्वन्यतमः ग्रहचारो भवति। ग्रहाणां चारवशात् कदावृष्टिर्भवति, कदा उपद्रवो भवति, कदा भूकम्पादयो भवन्ति इत्येवं कस्मिन् देशे अरिष्टादयो वा शुभफलानि वा कदा कथं भवन्ति इत्यपि ज्ञातुं शक्यते। प्रत्येकं ग्रहस्य तथैव अगस्त्यस्य सप्तर्षीणां ज्योतिर्मयस्वरूपाणां चारवशात् एतत् सर्वं पृथक् पृथक् ज्ञातुं शक्यते।

अस्मिन्नध्याये अगस्त्यस्य चारवशात् तथैव सप्तर्षीणां चारवशाच्च कथं कीदृशं फलं भवति इति प्रदर्श्यते।

# ११.२) उद्देश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* समुद्रवर्णनम्, विन्ध्यवर्णनम्, शरद्वर्णनम् च कर्तुं शक्तो भवति।

* अगस्त्योदयलक्षणफलविचारं कर्तुं शक्नोति।

* उदितस्य अगस्त्यस्य लक्षणफलविचारं कर्तुं समर्थो भवति।

* उदयास्तमयलक्षणे शुभाशुभफलविचारं कर्तुं पारयति।

* कौवेरीवर्णनम् कर्तुं शक्नोति।

* सप्तर्षिमण्डलचारविचारं कर्तुं समर्थो भवति।

* सप्तर्षीणां स्थानलक्षणानि विवेचयितुं योग्यो भवति।

* सप्तर्षीणां चारवशात् फलानि विचारयितुं अर्हति।

### ११.३)सुमद्रवर्णनम्

पुरा भगवता अगत्स्यमुनिना सुमुद्रात् जलापहरणेन सपदि सागरः तन्मध्ये मैनाकप्रभृतयः शैला ये स्थिताः तैः पर्वतैः मकरनखरोत्खातशिखरैः पतन्तीभिः मुक्ताभिः मिश्रास्तैः तथा पवरमणिरत्नाम्बुनिवहैः मकुटेषु परिमितानि रत्नानि येषां सन्ति तान् देवान् (सुरान्) दृष्टान्तीकर्तुमिव रुचिरः कृतः।

अगत्स्यमुनिना सागरात् जलापहरणे कृतेसति सागरः वृक्षरहितैः पर्वतैः समणिरत्नविद्रुमैः तेभ्यः पर्वतेभ्यो ये उरगा निर्गताः तैः अतिशयेन शोभितोऽभूत्।

समुद्रः(अगत्स्यमुनिना) पीतसलिलोऽपि विपदां स्थानं गतोऽपि प्रस्फुरन्तैः मत्स्यैः जलहस्तिभिः सर्पैः तथा परिक्षिप्तैः मणिनिकरैः अगत्स्यमुनिना सुरलक्ष्मीं प्रापितः। जलाभावात् समुदे विद्यमानाः जलप्राणिनः प्रस्फुरन्ति।

समुद्रः जलेऽपहृते सति प्रचलद्भिः मत्स्यैः शुक्तिजैः प्राणिभिः शङ्खैश्च व्याप्तोऽपि तरङ्गसमूहेन सहितानि श्वेतकुवलयानि हंसान् च बिभर्ति। कथमिदं सम्भवमिंत्यनेन प्रचलन्तः मत्स्या एव तरङ्गा इव । शुक्तिजा एव सितोत्पलानि शङ्खा एव हंसा इवात्र दृश्यन्ते इति वर्णनम्।

मेघसदृशैः श्वेतमत्स्यैः तारकासदृशैः रत्नैः स्थूलत्वात् चन्द्रसदृशैः स्फटिकमणिविशेषैः जलाभावात् अभिव्यक्तसर्पाणां फणासु विद्यमानचन्द्रकान्त सूर्यकान्तादिमणिभिः तेषां रश्मिभिर्युतं सरितां पतिं शरत्कान्तियुत आकाश इव अगस्त्यमुनिना कृतः।

### ११.४) विन्ध्यवर्णनम्

दिनकररथमार्ग विच्छित्तयेभ्युद्यतं यच्चालच्छृङ्गमृद्भ्रान्तविद्याधरां सावासक्तप्रियाव्याग्रदत्ताङ्कदेहावलम्बाम्बरात्युच्छ्रितोद्धूयमानध्वजैः शोभितम्।

करिकटमदमिश्ररक्तावलेहानुवासानुसारिद्विरेफावलीनोत्तमाङ्गैः कृतान् बाणपुष्पैरिवोत्तंसकान् धारियद्भिः मृगेन्द्रैः सनाथी कृतान्तर्दरी निर्झरम्।

गगनतलमिवोल्लिखन्तं प्रवृद्धैर्गजाकृष्टफुल्लद्रुमत्रासविभ्रान्तमत्तद्विरेफावली हृष्टमन्द्रश्वनैः शैलकूटैस्तरक्षर्क्षशार्दूलशाखामृगाध्यासितैः।

रहसि मदनसक्तया रेवया कान्तयेवोपगूढं सुरध्यासितोद्यानमम्भो अशनान्नमूलानिलाहारविप्रान्वितं विन्ध्यमस्तम्भयद्यश्च तस्योदयः श्रूयताम्।

## ११.५) शरद्वर्णनम्

ताम्बूलेन रक्तोद्धृष्टाग्रदन्ती हासयुक्ता पार्श्वद्वयसंयुक्तं चक्रवाकां स्वयनहंसपङ्क्तिं आपुष्णाती इव शरद् कालः शोभते।

नीलोत्पलस्य उभयपार्श्वस्थसितोत्पलैः तथा भ्रमन्तानां भ्रमराणां आवलिभिः संयुक्ता शरत् भ्रूलतयोः चलनैरभिव्यक्तकटाक्षावलोकनैर्युतसकामाप्रौढाङ्गनेव शोभते। अनेनात्र नेत्रस्थसादृश्यमुक्तम्। यतो नेत्रमपि मध्य भागात् कृष्णं तस्योभयपार्श्वयोः सितं भवति। तथा चलन्ताः भ्रमराः तेषां या आवलिः अस्ति तया नयनस्योर्ध्वभागस्था भ्रूलता उक्ता।

मेघानां विशेष उपगमनात् व्याप्तां चन्द्रमसः कान्तिं निशासु द्रष्टुं तरङ्गवलयां कृष्णतारकमध्यं विलोचनमिव अभिव्यक्तंभ्रमरसंलग्नसुपक्ष्मदलं वापीनलिनी उन्मीलयति। अत्र नायिका चिरदर्शनाद्वल्लभास्यं सोत्कण्ठा समुद्वीक्षत इति।

## ११.६) अगस्त्योदयलक्षणफलविचारः

आदित्यः कन्याराशेः पूर्वं सप्तभिरंशैः प्राक् यदा तिष्ठति तदा अस्यमुनेः दर्शनं उज्ञयिन्यां भवति। अर्थात् आदित्यः सिंहस्य त्रयोविंशति भागभुक्तौ यदा तिष्ठति तदा अगस्त्यस्य दर्शनं भवति। गणितविधानात् देशंदेशंप्रति अगस्त्यमुनेः उदयं ज्ञात्वा पण्डितः वदेत्।

यथा -

**संख्याविधानात् प्रतिदेशमस्य विज्ञाय सन्दर्शनमादिशेज्ज्ञः।**

**तच्चोज्ञयिन्यामगतस्य कन्यां बागैः स्वराख्यैः स्फुटभास्तरस्य।**

अगस्त्यमुनेः उदये स्वभावात् भूम्याः संश्लेषणेन मलप्रदूषितानि यानि जलानि सन्ति तानि पुनः साधूनां हृदयानि इव निर्मलानि भवन्ति।

नानाप्रकारैः पद्मैः हंसकोकारण्डवादिभिः पक्षिविशेषैः आपूर्णानि तटाकान्येव हस्ता इव अभिव्यक्ता भूमिः रत्नैः प्रभूतैः कुसुमैः फलैश्च भगवते अगस्त्याय अर्घं ददाती इव भाति।

इन्द्रस्य आज्ञया यदुत्सृष्टं सलिलं घनपरिवेष्टितमूर्तिभिः सर्पैरुत्पादितविषाग्निभिः सम्यग् दूषितमपि अगस्त्यदर्शने शिवं भवति।

### ११.६.१) उदितस्य अगस्त्यस्य लक्षणफलविचारः

उदितः अगस्त्यः रूक्षः भवति तर्हि तदा रोगान् करोति। कपिलवर्णे भवति तर्हि तदा अवर्षणं च करोति। धूम्रवर्णो भवति तर्हि तदा गवां अनिष्टं फलं ददाति। स्फुरणश्चेत् भयं करोति। लोहितवर्णश्चेत् दुर्भिक्षं संग्रामांश्च करोति। सूक्ष्मश्चेत् नगरवेष्ठनं करोति।

यथा -

**रोगान् करोति पुरुषः कपिलस्त्ववृष्टिः**

**धूम्रो गवामशुभकृत् स्फुरणो भयाय**

**माञ्जिष्ठरागसदृशः क्षुधमाहवांश्च**

**कुर्यादणुश्च पुररोधमगस्त्यनामा।**

यदि शातकुम्भसदृशो अथवा स्फटिक कान्तियुतो भूत्वा किरणाग्रैः भूमिं तर्पयन्निव दृश्यते चेत् तदा भूमिः प्रभूतसस्या तथा भयरहितैः रोगरहितैः जनैः बहुला भवति।

### ११.६.२) उदयास्तमयलक्षणे शुभाशुभ फलविचारः

उक्तया अभिताडितः केतुना विनिहतो वा भवति चेत् ता दृर्भिक्षं जतक्षयं च ददाति।

यथा -

**उत्कया विनिहतः शिखिना वा क्षुद्भयं मरकमेवविधत्ते।**

**दृश्यते स किल हस्तगतेऽर्के रोहिणीमुपगतेऽस्तमुपैति।।**

**कौवेरीवर्णनम्**

श्वेतयोत्पलमालया सह हासेन युत एकवलीत्याभरणविशेषेव यथा प्रभुणा युक्तानायिका विराजते तद्वत् उत्तरादिगपि सप्तभिः मनिभिः विराजते।

यथा -

**सैकावलीव राजति ससितोत्पलमालिनी सहासेव।**

**नाथवतीव च दिग् यैः कौवेरी सप्तभिर्मुनिभिः।।**

**११.७) सप्तर्षिमण्डलचारविचारः**

यैर्भ्रमद्भिः मुनिभिः उत्तरादिक् ध्रुवनायकोपदेशात् नरिनर्तीव दृश्यते तेषां मुनीनां चारः वृद्धगर्गमतानुसारं वराहमिहिरेण कथ्यते। अत्र ध्रुवनायकोपदेशात् इत्यनेन सकलज्योतिषशास्त्रस्य ध्रुव एव भ्रामकः इति प्रतिपाद्यते। नर्तक्यः आचार्योपदेशेन यथा नाट्यं कुर्वन्ति तथा कौवेरी च ध्रुवनायकस्य उपदेशेन नर्तनं करोति इति वर्णनम् अत्र ध्रुवे आचार्यत्वं आपादितम्।

मरीचादयः सप्तर्षयः यदा पाण्डुतनय युधिष्ठिरः नृपतिः भूत्वा राज्यं परिपालितो आसीत् तथा मघानक्षत्रेषु आसन्। तस्य युधिष्ठिरस्य राज्ञः षड्द्विकपञ्चद्वियुतः शककालो गतः। अर्थात् सहस्रद्वयेन पंचभिशतैः षड्विंशत्यधिकैः २५२६ शकनृपकालः युक्तः कार्यः।

एवं कृते यद्भवति तावद्वर्षवृन्दं वर्तमानकालंयावद् गतम्। तस्य च शतेन भागमाहृत्य यदवाप्यते तानि नक्षत्राणि मघादीनि भुक्तानि यच्छेषं तानि वर्षाणि बुज्यमाने नक्षत्रे तेषां प्रविष्टानां गतानि। तानि च शताद्विशोद्य यदवशिष्यते तावन्त्येव वर्षाणि तस्मिन्नक्षत्रे स्थितानि इति। लब्दनक्षत्राणामपि सप्तविंशत्या भागमपहृत्यावशेषाहृकसमं मघादिनक्षत्रं भुक्तमिति  वाच्यम्।

यथा -

**आसन् मघासु मुनयः शासतिं पृथ्वीं युधिष्ठिरे नृपतौ ।**

**षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्ञश्च।**

ते मुनयः एकैकस्मिन् नक्षत्रे शतं शतं वर्षाणि चरन्ति। निरन्तरं पूर्वस्यां दिशि उदयतः यन्नक्षत्रं सप्तर्षिपङ्क्त्या नयति। तस्मिन् नक्षत्रे ते संयुक्ता भवन्ति। अर्थात् यस्य नक्षत्रस्य प्रागुदयतः सप्तर्षि पङ्क्तिः स्पष्टा भवति तस्मिन्नेव नक्षत्रे ते स्थितः भवन्ति।

यथा -

**एकैकस्मिन्नृक्षे शतं शतं ते चिरन्ति वर्षाणाम्।**

**प्रागुदयतोऽप्यविवराद्दजून्नयति तत्र संयुक्ताः।।**

## ११.७.१) सप्तर्षिणां स्थानलक्षणविचारः

पूर्वस्यां दिशि भगवान् मीचिर्नाम महर्षिः स्थितो भवति। मरीचेः पश्चिमे भागे वसिष्ठः भवति। तस्य वसिष्ठस्य अपरे अङ्गिराः तिष्ठति। अङ्गिरस्यानन्तरं अत्रिः तिष्ठति। अत्रेः नकटवर्ती पुलकस्यो भवति। ततः पुलहः पश्चात् क्रतुरिति महर्षिः भवति। अरुन्धती साध्वी मुनिप्रधानं वसिष्ठमुपाश्रित्य तिष्ठति।

यथा -

**पूर्वेभागे भगवान् मरीचिरपरे स्थितो वसिष्ठोऽस्मात्**

**तस्याङ्गिरास्ततोऽत्रिस्तस्यासन्नः पुलकस्यश्च।**

**पुलहक्रतुरिति भगवानासन्ना अनुक्रमेण पूर्वाद्यात्**

**तत्र वसिष्ठं मुनिवरमुपाश्रितारुन्धती साध्वी।**

## ११.७.२) सप्तर्षिणां चारवशात् फलविचारः

एते मुनयः उल्कया अशन्या धूमेन वा अर्थात् रजोनीहारपांशुभिः यदि हताश्चेत् तथा कलुषाः विगतकिरणाः स्वल्पबिम्बा यदि भवन्ति तर्हि वक्ष्यमाणं आत्मीयवर्गं हन्युः। तथा ते विस्तीर्णाः निर्मलाश्च यदि भवन्ति तर्हि वक्ष्यमाणं आत्मीयवर्गस्य वृद्धिं कुर्वन्ति। तेषां सप्तर्षीणां संबद्धवर्गाः एवं भवन्ति।

**मरीचेः वर्गः** - गन्धर्वाः अश्वमुखाः नरदेवयोनयः देवाः दानवाः मन्त्राः औषधयः सिद्धाःयक्षाः नागाः विद्याधराः।

**वसिष्ठस्य वर्गः** - शकाः यवनाः दरदाः पारताः कम्बोजाः तापसाः वनस्थाः।

**अङ्गिरसस्य वर्गः** - ज्ञानोपेताः धीमन्ताः ब्राह्मणाः ।

**अत्रेः वर्गः** - कान्तारभवाः जलजानि समुद्रः नद्यः।

**पुलक्स्यस्य वर्गः** - राक्षसाः पिशाचाः दानवाः सर्पाः।

**पुलहस्य वर्गः** - मूलफलानि।

**क्रतोवर्गः** - यज्ञाः यज्ञकर्तारः

# ११.८) प्रश्नावली

**१. संक्षेपेण लिखत** **५*४=२०**

१. समुद्रवर्णनं कुरुत ?
२. विन्ध्यपर्वतस्य वर्णनं कुरुत ?
३. शरद्वर्णनम् कुरुत ?
४. कौवेरीवर्णनं कुरुत ?

**२. विस्तारेण उत्तरं लिखत** **१०*५=५०**

१. वराहमिहिरकृत समुद्रविन्ध्यशरद् वर्णनं कुरुत ?
२. अगस्त्योदय लक्षण फलानि विचारयत ?
३. उदितस्य अगस्त्यस्य लक्षण फलविचारं कुरुत ?
४. सर्पर्षिमण्डल चारस्य विचारं विस्तरेण लिखत ?
५. सप्तर्षीणाम् स्थानानि तेषां लक्षणानि च प्रतिपादयत ?

**३. व्याख्यात** **२०*३=६०**

१. अगस्त्य चारमुद्दिश्य वराहमिहिरेण किमुक्तमिति प्रतिपादयत ?
२. सप्तर्षीणाम् स्थानानि कुत्र कुत्र भवन्ति इति विचार्य तेषां मण्डल चारमुद्दिश्य व्याख्यां कुरुत ?
३. सप्तर्षीणाम् चारवशात् फलानि प्रतिपादयत ?

# संरचना

१२ द्वादशोऽध्यायः

१२.१) अवतरणिका

१२.२) उद्देश्यानि

१२.३) नक्षत्राणां प्रविभागः

१२.४) भारतवर्षस्य मध्यपूर्वादिक्रमेण प्रविभागाः

१२.५) कृत्तिकादिनक्षत्रकूर्मविभागेन प्रयोजनम्

१२.६) कस्मिन् नक्षत्रे के के पदार्था आश्रिताः इति विचारः

१२.७) जातिवशात् नक्षत्राणां विचारः

१२.८) क्रूरग्रहादीनां प्रभावेण नक्षत्रवशात् तत्परिवर्गस्य फलविचारः

१२.९) प्रश्नावली

# १२ द्वादशोऽध्यायः

## १२.१) अवतरणिका

कर्मभूमिः नाम भरतदेश एव इति सर्वैः ज्ञायते। पापपुण्यकर्मवशात् जाताः प्रजा अत्र भूमौ शुभाशुभकर्मफलानि अनुभवन्ति। अस्मिन् सुविशाले भारतदेशे मध्यपूर्वादिक्रमेण सर्वासु दिक्षु विभिन्नाः जानाः विविध वेषभाषाप्रवृत्यादिभिस्संस्कृतिभिश्च अनादिकालतः जीवनं यापयन्ति। ते सर्वे सर्वदा समानानि शुभाशुभफलानि नानुभवन्ति। ते तेषां देशकालानुगुणं भिन्नभिन्नानि शुभाशुभफलानि अनुभवन्ति। तानि फलानि नक्षत्रवशात् नक्षत्रकूर्मविभागवशाच्च ज्ञातुं शक्यते। तत्कथमिति अस्मिन् अध्याये प्रदर्श्यते।

# १२.२) उद्देश्यानि

* नक्षत्राणां प्रविभागान् ज्ञात्वा तेभ्यः फलानि वक्तुं योग्यो भवति।

* भारतवर्षस्य मध्यपूर्वादिक्रमेण प्रविभागान् प्रदिपादयितुं समर्थो भवति।

* कृत्तिकादिनक्षत्रकूर्मविभागेन प्रयोजनम् ज्ञात्वा सम्यक्तया फलानि वक्तुं शक्नोति।

* कस्मिन् नक्षत्रे के के पदार्था आश्रिताः इति विचारं कर्तुं शक्नोति।

* जातिवशात् नक्षत्राणां विचारं कर्तुं समर्थो भवति।

* क्रूरग्रहादीनां प्रभावेण नक्षत्रवशात् तत्परिवर्गस्य फलानि विचारयितुं शक्तो भवति।

## १२.३) नक्षत्राणां प्रविभागः

अश्विन्यादिसप्तविंशति नक्षत्राणि अपि कृत्तिकानक्षत्रात् आरभ्य नक्षत्रत्रयेण विभाजनीयानि। तथा विभाजिते सति नक्षत्रत्रयेण युतनववर्गाः आविर्भवन्ति। तानि नक्षत्राणि मध्यभागादारभ्य प्रागादितः क्रमेण आग्नेय - दक्षिण - नैरृति - पश्चिम - वायव्य - उत्तर - ईशान्येषु - कूर्माकाररूपेण व्यवस्थिताः भवन्ति।

तद्यथा -

| | | |
|---|---|---|
| रेवती | आर्द्रा | अश्लेषा |
| अश्वनी | पुनर्वसु | मघा |
| भरणी | पुष्यमि | पूवाफल्गुणी |

| | | |
|---|---|---|
| शतभिषक् | कृत्तिका | उत्तर |
| पूर्वाभाद्रा | रोहिणी | हस्ता |
| उत्तराभाद्रा | मृगशिरा | चित्रा |

| | | |
|---|---|---|
| उत्तराषाढा | ज्येष्ठा | स्वाती |
| श्रवण | मूला | विशाखा |
| धनिष्ठा | पूर्वाषाढा | अनुराधा |

एते नक्षत्रकूर्मप्रविभागाः मेरोः दक्षिणदिग्भागे व्यवस्थितस्य भारतवर्षस्य मध्यप्रागादिरूपेण विभाजितेषु देशेषु अन्तर्भूताः भवन्ति। अर्थात् भारतवर्षस्य मध्यभागः यो भवति तस्मिन् भागे विद्यमानेषु देशेषु नक्षत्रकूर्मप्रविभागेषु यः मध्यभागः वर्तते तस्मिन् भागे व्यवस्थितानां नक्षत्राणां प्रभावो भवति। तथैव भरतवर्षस्य प्राग्भागे विद्यमानानां देशेषु नक्षत्रकूर्मप्रविभागेषु स्थितानां नक्षत्राणां प्रभावः भवति तथैव क्रमेण आग्नेयादारभ्य ईशान्यदिक् पर्यन्तं एवमेव भवति।

यथा -

**नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधा।**

**भारतवर्षे मध्यप्रागादि विभाजिता देशाः।**

## १२.४) भारतवर्षस्य मध्यपूर्वादिक्रमेण प्रविभागाः

भारतवर्षं पूर्वादिक्रमेण नवधा विभजिते सति मध्य - प्राक् - आग्नेय - दक्षिण - नैऋति - पश्चिम - वायव्य - उत्तर - ईशान्यादि प्रविभागाः भवन्ति। एतेषु प्रविभागेषु अनेके देशाः अन्तर्भवन्ति। अतः के ? के ? देशाः केषु? केषु? भागेषु सन्ति इति ज्ञानार्थं अत्र प्रविभागानां विचारः क्रियते।

**मध्यदेशप्रविभागविचारः** - भद्राः , अरिमेदाः , माण्डव्याः , साल्वाः , नीपाः , उज्झिहानाः , संख्याताः , मरुभूः , वत्साः , घोषः , यामुनाः , सरस्वताः , मत्स्याः , मध्यमिकाः , माथुरकाः , उपज्योतिषाः , धर्मारण्यं , शूरसेनाः , गौरग्रीवाः , उद्देहिकाः , पाण्डुगुडाः , अश्वत्थाः , पाञ्चालाः , साकेतदेशः , कङ्काः , कुरवः , कालकोटिः , कुकुराश्च , पारियात्रपर्वतः, औदुम्बरा , कापिष्ठलाः हस्तिनापुरम् एते देशाः तेषां जनपदाः मध्यदेशे प्रधानाः इति परिगणिताः एते सर्वे कृत्तिकादिनक्षत्रत्रितये अन्तर्भूताः भवन्ति। अर्थात् नक्षत्रकूर्मप्रविभागेषु मध्यभागे भवन्ति।

**पूर्वदिग्भागेशानां विचारः** - अञ्जनम् वृषभध्वजः पद्मम् माल्यवान् एते सर्वएव गिरयः तथा व्याघ्रमुखाजनाः सुह्माः , कर्वटाः , चन्द्रपुराः , शूर्पकर्णाजनाः , खसाः , मगधदेशः , शिबिरगिरिः , मिथिला , समतटोदेशः , उड्रजनाः , अश्ववदनाः , दन्तुरकाः , प्राग्जोतिषः , लौहित्यनदः , क्षीरोदसमुद्रः , पुरुषादाः , उदयगिरिः , भद्राः , गौडकाः , पौण्ड्राः , उत्कलाः , काशयः , मेकलाः , अम्बष्ठाः , एकपदाः , ताम्रलिप्तकाः , कोशलकाः वर्धमानाः एते देशाः जनपदाश्च भरतवर्षस्य पूर्वस्यां दिग्भागे व्यवस्थिताः भवन्ति एते सर्वे अर्द्रादिके नक्षत्रत्रये अन्तर्भूताः भवन्ति।

**आग्नेयदिग्भागदेशानां विचारः** - कोशलाः , कलिङ्गाः , वङ्गाः , उपवङ्गाः , जठराङ्गाः , शूलिकाः , विदर्भाः , वत्साः , अन्धाः , चेदिकाः , ऊर्ध्वकण्ठाः , वृषस्थानम्, नालिकेरः , चर्मद्वीपः , विन्ध्यन्तवासिनः , त्रिपुरीनामनगरी , श्मश्रुधराः , हेमकुड्यं, व्यालग्रीवा , महाग्रीवाः , किष्किन्धः , कण्टकस्थलम् , निषादराष्ट्रम् , पुरिकाः, दशार्णाः , नग्नशबराः , पर्णशबराः एते देशाः जनपदाश्च आग्नेयप्रविभागे प्रधानाः । एते सर्वेऽपि आश्लेषादिनक्षत्र त्रितये अन्तर्भूताः भवन्ति।

**दक्षिणस्यां दिशि देशजनपदानां विचारः** - लङ्का, कालाजिनम्, सौरिकीर्णाः, तालिकटाः, गिरिनगरम्, मलयः, दर्दुरः, महेन्द्रः, मालिन्द्यः, कङ्कटाः, कङ्कणः, वनवासिनः, शिबिकाः, फणिकाराः, कोङ्कणाः, आभीराः, आकरस्थानम्, वेणानदी, आवर्तकाः, दशपुरम्, गोनर्दाः, केरलकाः, कर्णाटः, महाटविः, चित्रकूटपर्वतः, नासिक्योदेशः, कोल्लगिरिः, चोलाजनपदः, क्रौञ्चद्वीपः, जटाधराः, कावेरीनदी, रिष्यमूकपर्वतः, तुम्बवनम्, कार्मणेयकाः, दक्षिणसमुद्रः, तापसाश्रमाः, ऋषिकाः, काञ्चीदेशः, मरुचीपट्टणम्, चेर्यार्यकाः, सिंहलाः, ऋषभाः, बलदेवपट्टणम्, दण्डकावनम्, तिमिङ्गिलाशनाः, भद्राः, कच्छः, हस्तिखण्डा ताम्रपर्ण्यानद्या सहिताः इत्येवं प्रकाराः देशाः जनपदाश्च दक्षिणप्रविभागे प्रधानाः एते सर्वेऽपि उत्तराफल्गुन्यादिनक्षत्रत्रितये अन्तर्भूताः भवन्ति।

**नैऋत्यां दिशि देशजनपदानां विचारः** - पह्लवाः, काम्बोजाः, सिन्धुसौवीराः, वडवामुखाः, अरवाः, अम्बष्ठाः, कपिलाः, नरीमुखाः, आनर्ताः, फेणगिरिः, यवनाः, मार्गराः, कर्णप्रवेयाः, पारशवाः, शूद्राः, बर्वराः, किराताः, खण्डाः, क्रव्यादाः, आभीराः, चञ्चूकाः, हेमगिरिः, सिन्धुर्नदः, कालकाः, रैवतकाः, सुराष्ट्राः, बादराः, द्रविडाः, माहार्णवः एते देशाः जनपदाश्च नैऋत्यां दिशि प्रधानाः एतेसर्वेऽपि स्वात्यादि नक्षत्रत्रितये अन्तर्भूताः भवन्ति।

**पश्चिमायां दिशि देशानां जनपदानां विचारः** - मणिमान्पर्वतः, मेघवान्, वनौघः, क्षुरार्पणः, अस्तगिरिः, अपरान्तकाः, शान्तिकाः, हैहयाः, प्रशस्ताद्रिः, वोक्काणाः, पंचनदः, रमठः, पारताः, तारक्षितिः, जृङ्गाः, वैश्याः, कनकाः, शकाः एते देशाः जनपदाश्च पश्चिमदिक् भागे प्रधानाः। एते सर्वेऽपि ज्येष्ठादिनक्षत्रत्रितये अन्तर्भूताः भवन्ति।

**वायव्यदिशि देशानां जनपदानां च विचारः** - माण्डव्याः, तुषाराः, तालाः, हलाः, मद्राः, अस्मकाः, कुलूतदेशाः, हलडाः, स्त्रीराज्यम्, नृसिंहवनम्, खस्थाः, वेणुमतीनदी, फल्गुलुकाः, गुलुहाः, मरुकच्चाः, चर्मरङ्गाख्याः, एकलोचनाः, शूलिकाः, दीर्घग्रीवाः, दीर्घस्याः, दीर्घकेशाः एते देशाः जनपदाश्च वायव्यदिग्भागे प्रधानाः । एते सर्वेऽपि उत्तराषाढादिनक्षत्रत्रितये अन्तर्भूताः भवन्ति।

**उत्तरस्यां दिशि देशानां जनपदानां च विचारः** - कैलासपर्वतः, हिमवान्, वसुमान्, धनुष्मान्, क्रौञ्चः, मेरुः इत्यादि पर्वताः उत्तरकुरवः, क्षुद्रमीनाः, कैकयाः, वसातयः, यमुनाः, भोगप्रस्ताः, अर्जुनायनाः, आग्नीध्राः, आदर्शाः, अन्तर्द्वीपिनः, त्रिगर्ताः, तुरगाननाः, खमुखाः, केशधराः, चिपिटनासिकाः, दासेरकाः, वटधानाः, शरधानाः, तक्षशिलाः, पुष्कलावताः, कैलावताः, कण्ठधानाः, अम्बरावताः, मद्रकाः, मालवाः, पौरवाः, कच्छाराः, दण्डपिङ्गलकाः, माणहलाः, हूणाः, कोहलाः, शीतकाः, मण्डव्याः, भूतपुराः,गान्धाराः, यशोवतीनगरी, हेमतालाः, राजन्याः, खचराः, गव्याः, यौधेयाः, दासमेयाः, श्यामकाः, क्षेमधूर्ताः एते सर्वे देशाः जनपदाश्च उत्तरदिग्भागे प्रधानाः । एते सर्वेऽपि शतभिषगाद्ये नक्षत्रये अन्तर्भूताः भवन्ति।

**ऐशान्यांदिशि देशानां जनपदानां च विचारः** - मेरुकः, नष्टराज्यम्, पशुपालाः, कीराः, काश्मीराः, अभिसाराः, दरदाः, तङ्गणाः, कुलूतदेशाः, सैरिन्ध्राः, वनराष्ट्राः, ब्रह्मपुरम् दार्वाः, डामराः, वनराज्यम्, किराताः, चीनाः, कौणिन्दाः, भल्लाः, पटोलदेशाः, जटासुराः, कुनटाः, खसाः, घोषाः, कुचिकाख्याः, एकचरणाः, अनुविश्वा, सुवर्णभूः, वसुवनम्, दिविष्ठाश्च, पौरवाः, त्रिनेत्राः, चीरनिवासिनः, मुञ्जाद्रिः, गान्धर्वाः एते सर्वे देशाः जनपदाश्च ऐशान्यदिशि प्रधानाः एते सर्वेऽपि रेवत्यादि नक्षत्रत्रितये अन्तर्भूताः भवन्ति।

### **१२.५) कृत्तिकादिनक्षत्रकूर्मविभागेन प्रयोजनम्**

नक्षत्रकूर्मविभागः मध्यपूर्व अग्नेयादिक्रमेण दिग्भिः कृत्तिकादिनक्षत्रत्रितयैः कृतः। तेन प्रविभागेनप्रयोजनम् किमिति? अत्र विचार्यते।

आदित्याङ्गारकशनैश्चराद्यैः क्रूरग्रहैः कृत्तिकादिनक्षत्रप्रविभागाः यदि पीड्यन्ते तर्हि यं प्रविभागं पीड्यते तत्संबद्धदेशानां राज्ञां च पीडा भवति इति ज्ञेयः। तद्यथा कृत्तिकाद्ये पाञ्चालः अर्द्राद्ये मागदाधिः आश्लेषाद्ये कलिङ्गः अर्यम्णाद्ये अवन्तः स्वात्याद्ये आनर्तः ज्येष्ठाद्ये सिन्धुसौवीरः उत्तराषाढाद्ये राजा हारहौरः शतभिषगाद्ये मद्राधिपः रेवत्याद्ये कौणिन्दः मरणमायाति।

## १२.६) कस्मिन् नक्षत्रे के के पदार्था आश्रिताः इति विचारः

वराहमिहिरेणकृतनक्षत्रव्यूहाध्याये के ? के? पदार्थाः कस्मिन् कस्मिन् नक्षत्रे अन्तर्भवन्ति इति प्रतिपाद्य दुष्टग्रहग्रहण - उल्का - उषाकरपीडादि प्रभावैः केषु? केषु? नक्षत्रेषु केषां ? केषां ? पदार्थानां किं किं फलं भवति निरूपितवान्। अस्मिन् अवसरे फलकथनार्थं कृत्तिकादिसप्तविंशति नक्षत्रेषु के के पदार्थाः भवन्ति इति एवं विचारितवान्

तद्यथा -

**कृत्तिकानक्षत्रे** - श्वेतपुष्पाणि अग्नित्रयोपचारकाः मन्त्रज्ञाः यज्ञशास्त्रविदः वैयाकरणाः आकरिका- नापिताः ब्रह्मणाः कुम्भकारः पुरोहिताः ज्योतिषिकाः एते सर्वे कृत्तिकायां समाश्रिता भवन्ति।

**रोहिणीनक्षत्रे** - शोभनव्रताः पुण्यवृत्तयः राजानः धनिनः योगरताः शकटजीविनः गावः दान्तः जलचराः प्रणिनः कृषिकराः शिलोच्चयाः ऐश्वर्ययुक्ताः एते सर्वे रोहिण्यां समाश्रिताः

**मृगशिरनक्षत्रे** - सुगन्धद्रव्याणि वस्त्राणि अब्जानि फलानि रत्नानि वनवासिनः पक्षिणः अरण्यप्राणिनः सोमपाः गेयज्ञाः कामिनः लेखवाहाः एते सर्व एव मृगशिरसि भवन्ति।

**आर्द्रानक्षत्रे** - घातकाः बन्धरताः असत्य भाषिणः परदारारताः चौराः शठाः भेदरताः तुषधान्यं क्रूराः मन्त्रविदः वशीकरणादिकर्मविदः वेतालकर्मज्ञाः एते सर्वे आर्द्रायां भवन्ति।

**पुनर्वसुनक्षत्रे** - सत्यभाषिणः दानशीलाः परधनादिष्वलुब्धाः कुलीनाः सुरूपाः बुद्धिमन्तः यशस्विनः धनिनः कलमशालयः वणिजः सेवकाः शिल्पिनः कुम्भकारप्रभृतिजनाः एते सर्व एव पुनर्वसौ भवन्ति।

**पुष्यमीनक्षत्रे** - यवाः गोधूमाः धान्यानि इक्षवः अरण्यानि मन्त्रिणः राजानः धीवरप्रभृतयः सलिलोपजीविनः सज्ज्नाः यागेष्वनुरक्ताः इष्टिषु अनुरक्ताः एते सर्व एव पुष्यम्यां भवन्ति।

**आश्लेषानक्षत्रे** - कृत्तिमाणि द्रव्याणि कन्दमूलानि प्रसिद्धानि फलानि कृमिदाकः सर्पाः विषं परधानहरणे अभिरताः शालयः सर्वभिषजः एते सर्व एव आश्लेषायां भवन्ति।

**मघानक्षत्रे** - वित्तशालिबहुला कोष्ठागाराणि पर्वतनिवासिनः पितृभक्ताः क्रयविक्रयनिरताः संग्रामप्रियाः मांसाशिनः स्त्रीणां द्विषो ये मनुजाः एते सर्व एव मघायां भवन्ति।

**पूर्वाफल्गुनीनक्षत्रे** - नटाः युवतयः सर्वजनवल्लभाः गान्धर्वाः शिल्पिनः चित्रकारः पण्यं कर्पासः लवणम् माक्षिकं तैलम् बालकाः एते सर्व एव पूर्वाफल्गुन्यां भवन्ति।

**उत्तराफल्गुनीनक्षत्रे** - मृदुभावसमेताः परधानादिष्वलुब्धाः विनयरताः वेदबाह्यास्तेषु ये रताः दानसक्ताः पठनशीलाः कलमशाल्यादि अतिधनिनः कर्मानुरताः मनुजनृपैसहिताः एते सर्व एव उत्तराफल्गुन्यां भवन्ति।

**हस्तनक्षत्रे** - हस्तिनः चौराः रथिकाः हस्तिसाधनपतयः शिल्पिनः पण्यं तुषधान्यं श्रुताभिनिरताः वणिजः तेजस्विनः एते सर्वे हस्ते भवन्ति।

**चित्रानक्षत्रे** - अलङ्कारादिषु कुशलाः मणिलक्षणज्ञाः रागज्ञाः लिपिवेत्तारः गीतविदः गन्धयुक्तिज्ञाः गणितदक्षाः तन्तुवायाः अक्षिरोगचिकित्सकाः राजधान्यं एते सर्वे चित्रायां भवन्ति।

**स्वातीनक्षत्रे** - पक्षिणः अरण्यप्रणिनः अश्वाः वणिजः धान्यानि वातबहुलानि अस्थिरमित्राणि अल्पसत्त्वाः तपोनिरताः पुण्यप्रवीणाः एते सर्व एव स्वातौ भवन्ति।

**विशाखानक्षत्रे** - रक्तपुष्पैः रक्तफलैर्युतवृक्षाः तिलैः मुद्गैश्च सहिताः कर्पासाः माषाः इन्द्रस्य अग्रेः भक्ताः एते सर्व एव विशाखायां भवन्ति।

**अनुराधानक्षत्रे** - शौर्यसमेताः गणप्रधानाः साधुरताः गोष्ठिरताः यानरताः साधवः शरत्काले समुत्पन्नं सर्वं एते सर्वे अनुराधायां भवन्ति।

**ज्येष्ठानक्षत्रे** - असिंग्रामधीराः कुलेन वित्तेन यशसा ये अन्विताः ते परधनहन्तारः विजिगीषवः राजानः सेनापतयः एते सर्व एव ज्येष्ठायां भवन्ति।

**मूलानक्षत्रे** - औषधम् वैद्याः समूहप्रधानाः कुसुम मूलफलसम्बन्धिवृत्तिः येषां ते सर्वाणि बीजानि अतिधनयुक्तः एते सर्व एव मूलानक्षत्रे भवन्ति।

**पूर्वाषाढानक्षत्रे** - मार्दवयुक्ताः जलमार्गगामिन धीवरप्रभृतयः सत्ययुक्ताः शौचयुक्ताः ईश्वराः सेतुकराः वारिजीवकाः यानि च अम्बुजातानि फलानि कुसुमानि ते सर्वेऽपि पूर्वाषाढायां भवन्ति।

**उत्तराषाढनक्षत्रे** - हस्तिसाधनपतयः, बहुयुद्धज्ञाः, हस्तिनः, अश्वाः, देवतासक्ताः, वृक्षादयस्थावराः, योधाः, भोगान्विताः, तेजस्विनः एते सर्व एव उत्तराषाढायां भवन्ति।

**श्रवणानक्षत्रे** - मायाविनः, नित्योद्युक्ताः, कर्मसुसमर्थाः, उत्साहिनः, धर्मसंयुक्ताः, भगवद्भक्ताः, सत्यभाषिणः एते सर्व एव श्रवणे भवन्ति।

**धनिष्ठानक्षत्रे** - निरहंकाराः, क्लीबाः, अचलसौहृदाः, स्त्रीष्वप्रियाः, दानशीलाः, बहुवित्तसंयुक्ताः, जितेन्द्रियाः एते सर्व एव धनिष्ठायां भवन्ति।

**शतभिषजि नक्षत्रे** - पाशिकाः मत्स्यबन्धः जलोद्भवानि सर्वद्रव्याणि जलचरजीवाः सौकरिकाः रजकाः शौण्डिकाः शाकुनिकाः एते सर्व एव शतभिषजि भवन्ति।

**पूर्वाभाद्रपदनक्षत्रे** - तस्कराः पशुपालाः क्रूराः कदर्याः नीचकर्मकराः शठचेष्ठाः धर्मविवर्जिताः चन्द्रायणादिव्रतवर्निताः बहुयुद्धकुशलाः) मनुजाः एते सर्व एव पूर्वाभाद्रपदे भवन्ति।

**उत्तराभाद्रपदनक्षत्रे** - द्विजाः यज्ञाः दानानि तपः एतैः ये समन्विताः ते महविभवाः चतुर्थाश्रमिणः पाखण्डाः राजानः श्रेष्ठाः शालयः एतत्सर्वमेव उत्तराभाद्रपदायां भवन्ति।

**रेवतीनक्षत्रे** - सलिलोद्भवानि सर्वाणि द्रव्याणि ( फलकुसुमलवणमणि शङ्खमौक्तिकाब्जानि) सुगन्धद्रव्याणि कुसुमानि वणिजः नाविकाः एते सर्व एव रेवत्यां भवन्ति।

**अश्वनीनक्षत्रे** - अश्वग्राहकाः चमूनाथाः वैद्याः सेवनिरताः तुरगाः अश्वगामिनः वणिजः रूपसम्पन्नाः अश्वपतयः एते सर्व एव अश्विन्यां भवन्ति।

**भरणीनक्षत्रे** - रात्कं मांसं च यैः युंज्यन्ते ते क्रूराः मरणे बन्धने ताडने चासक्ताः शालयः नीचकुलोद्भवाः ये च सत्त्वेन विहीना ते  एते सर्व एव भरण्यां भवन्ति।

### १२.७) जातिवशात् नक्षत्राणां विचारः

| जातिविशेषः | तत्सम्बद्धनक्षत्राणि |
|---|---|
| ब्राह्मणानाम् | पूर्वाफल्गुनी पूर्वाषाढा पूर्वाभाद्रपद कृत्तिका |
| क्षत्रियाणाम् | उत्तरफल्गुनी उत्तराषाढा उत्तराभाद्रपद पुष्यमी |
| कर्षकाणां वैश्यानां च | अनुराधा रेवती मघा रोहिणी |
| वणिग्जनानां | पुनर्वसु हस्त अभिजित् अश्वनी |
| क्रूरजनानाम् | मूला आर्द्रा स्वाति शतभिषक् |
| सेवाजनानाम् | मृगशिरा ज्येष्ठा चित्रा धनिष्ठा |
| चण्डालजातेः | आश्लेषा विशाखा श्रवण भरणी |

### १२.८) क्रूरग्रहादीनां प्रभावेण नक्षत्रवशात् तत्परिवर्गस्य फलविचारः

यस्मिन् नक्षत्रे रविशन्योरेकस्य भोगो भवति, यस्मिन् नक्षत्रे भौमस्य भेदनं अर्थात् मध्यगमन वा वक्रगमनं भवति। यस्मिन् नक्षत्रे अर्कचन्द्रयोः ग्रहणं भवति यस्मिन् नक्षत्रे उल्कापीडनं भवति यस्मिन् नक्षत्रे चन्द्रमा योगतारकाभेदेन दक्षिणभागगमनं करोति (उषाकरपीडितं भवति) तन्नक्षत्रं उपहतमिति प्रचक्षते मुनिभिः। अथवा प्रकृतेः स्वभावाद्विपर्ययमपि उपहृतं भवति। एवं विधं नक्षत्रं प्रागुक्तस्य परिवर्गस्य विनाशं करोति। यदि तस्य नक्षत्रस्य उक्तस्थितेः विपरीतं अस्ति तर्हि प्रागुक्त परिवर्गस्य समृद्धिं करोति। अर्थात् दृष्टग्रहभोग उल्कानिपातनमध्यवक्रगमन उषाकरणपीडन ग्रहणादिभिः रहितं भवति तर्हि तन्नक्षत्रं प्रागुक्तपरिवर्गस्य पुष्टिं ददाति।

# १२.९) प्रश्नावली

**१. संक्षेपेण लिखत** **५*४=२०**

१. कूर्माकारे नक्षत्राणां प्रविभागः कथं क्रियते ?
२. कृत्तिकादिनक्षत्रकूर्मप्रविभागेन प्रयोजनम् किम् ?
३. जातिवशात् नक्षत्राणां प्रविभागः कथं भवति ?
४. उपहतनक्षत्रं नाम किं ?

**२. विस्तरेण उत्तरं लिखत** **१०*३=३०**

१. नक्षत्रकूर्मप्रविभागस्य विचारं कुरुत ?
२. नक्षत्रकूर्मविभागेन प्रयोजनं किमिति विचारयत ?
३. क्रूरग्रहादि प्रभावेण नक्षत्रपरिवर्गस्य फलं विचारयत ?

**३. व्याख्यात** **२०*२=४०**

१. भारतवर्षस्य मध्यपूर्वादिक्रमेण प्रविभागानां विचारं कुरुत ?
२. कस्मिन् नक्षत्रे के के पदार्था आश्रिताः इति विचारयत ?

# संरचना


१३. त्रयोदशोऽध्यायः

१३.१) अवतरणिका

१३.२) उद्धेश्यानि

१३.३) कस्मिन् देशे केषां जनानां को ग्रहोऽधिपतिरिति निरूपणम्

१३.४) देशेषु जनेषु ग्रहाणां आधिपत्यकथनस्य प्रयोजनम्

१३.५) ग्रहयुद्धकारणम्

१३.६) चतुष्प्रकारयुद्धविचारः

१३.७) ग्रहाणां यायिनागराक्रन्दसंज्ञाः

१३.८) जितलक्षणविचारः

१३.९) जयिनोलक्षणविचारः

१३.१०) सर्वग्रहविजितानां भौमादीनां ग्रहाणां फलविचारः

१३.११) चन्द्रस्य गतिलक्षणविचारः

१३.१२)	भौमादीनां ग्रहाणां उत्तरगते चन्द्रे फलविचारः

१३.१३)	चन्द्रस्य विशेषफल विचारः

१३.१४)	आदित्यादि ग्रहाणां वर्षफलविचारः

१३.१५)	वर्षफले विशेष विचारः

१३.१६)	दिक्फलप्रतिपादनविचारः

१३.१७)	ग्रहाणां संस्थानप्रदर्शनफलविचारः

१३.१८)	अन्तरिक्षप्रविभागेनफलविचारः

१३.१९)	नक्षत्रावस्थितानां ग्रहाणां फलविचारः

१३.२०)	योगषट्कस्य लक्षणफलविचारः

१३.२१)	प्रश्नावली

# १३. त्रयोदशोऽध्यायः

## १३.१) अवतरणिका

ग्रहाणां चारवशादपि शुभाशुभफलानि जनेभ्यो भवन्ति किन्तु लोके विद्यमानानां जनानां प्राणिनां सर्वेषामपि समानानि शुभाशुभफलानि न भवन्ति। समानानि फलानि यदि कदंचित् द्वित्रिषु स्थानेषु भवन्तिचेदपि तानि फलानि तेषु स्थानेषु एकवारमेव प्राणिभिर्नानुभवन्ति। भिन्नभिन्नकालेषु भिन्नभिन्नप्रान्तेषु च भिन्नभिन्नानि फलानि प्राणिकोटिभिः अनुभूयन्ते। प्रान्तवशात् अनुभूयमानफलज्ञानार्थं ज्योतिषशास्त्रे एकैकस्य प्रान्तस्य एकैको ग्रहोऽधिपतिरिति कथितः। तेषां ग्रहाणां आधिपत्यवशात् तेषु तेषु प्रान्तेषु भिन्नभिन्नानि फलानि प्राणिभिः अनुभूयन्ते। तानि फलानि तत्सम्बद्धग्रहाणां गतिवशात् युद्धकारणवशात् युद्धेजिताजितकारणवशात् संस्थानवशात् संज्ञावशाच्च कथं ज्ञायते इति अस्मिन् अध्याये निरूपितम्।

# १३.२) उद्धेश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* कस्मिन् देशे केषां जनानां को ग्रहोऽधिपतिरिति निरूपयितुं शक्नोति।
* देशेषु जनेषु ग्रहाणां आधिपत्यकथनस्य प्रयोजनम् कथयितुं योग्यो भवति।
* ग्रहयुद्धकारणम् विचार्य चतुष्प्रकारयुद्धविचारं च कृत्वा चतुष्प्रकारस्य युद्धस्य प्रत्येकं फलमपि वक्तुं समर्थो भवति।
* ग्रहाणां यायिनागराक्रन्दसंज्ञानां परिचयं कारयितुं समर्थो भवति।
* जितलक्षणविचारं कर्तुं शक्नोति
* जयिनोलक्षणविचारं कर्तुं शक्नोति।
* सर्वग्रहविजितानां भौमादीनां ग्रहाणां फलविचारं कर्तुं शक्नोति।
* चन्द्रस्य गतिलक्षणविचारं कर्तुं प्रभवति।
* भौमादीनां ग्रहाणां उत्तरगते चन्द्रे फलानि प्रतिपादयितुं समर्थो भवति।
* चन्द्रस्य गतिलक्षणविचारं कर्तुं शक्नोति ।
* आदित्यादि ग्रहाणां वर्षफलानि विचार्य वर्षफले विशेषफलविचारं कर्तुं अर्हो भवति।
* दिक्फलप्रतिपादनविचारं कर्तुं शक्नोति।
* ग्रहाणां संस्थानप्रदर्शनफलविचारं कर्तुं शक्नोति।
* अन्तरिक्ष प्रविभागेन फलानि ज्ञातुं शक्नोति।
* नक्षत्रावस्थितानां ग्रहाणां फलविचारं कर्तुं शक्नोति।
* योगषट्कस्य लक्षणं ज्ञात्वा फलानि वक्तुं समर्थो भवति।

## १३.३) कस्मिन् देशे केषां जनानां को ग्रहोऽधिपतिरिति निरूपणम्

| ग्रहः | |
|---|---|
| आदित्यः | नर्मदानद्याः पूर्वभागः, शोणानदः, उड्रजनाः, वङ्गाः, सुह्माः, कलिङ्गाः, बाह्लीकाः, शकाः, यवनाः, मगधाः, शबराः, प्राग्ज्योतिषाः, चीनाः, काम्बोजाः, मेकलाः, किराताः, विटकाः, बहिरन्तः, शैलजाः, पुलिन्दाः तथा द्रविडानांजनानां पूर्वार्द्धम्, यमुनायाः दक्षिणकूलम्, चम्पदेशः, उदुम्बरः, कौशाम्बीनगरी, चेदयोजनाः, विन्ध्यवनम्, कलिङ्गाः, पुण्ड्रजनाः, गोलाङ्गूलाः, श्रीपर्वतः, वर्द्धमानम्, इक्षुमतीनाम्नीनदी, तस्करदेशीजनाः, पारताजनाः, गोपालकाः, प्रसिद्धानि, बीजानि, शालयः, कटुकंद्रव्यं, वृक्षाः, कनकं, अग्निः, विषं, समरशूराः, औषधम्, वैद्याः, पशवः, कर्षकाः, राजानः, पापाः, विजिगमिषवः, तस्कराः, सर्पाः, अरण्यं, यशस्विनः, तीक्ष्णाजनाः। |
| चन्द्रः | पवतदुर्गम्, जलदुर्गम्, कोशलाः, मरुकच्छाः, सागराः, रोमकाः, तुषाराः, वलवासिनः, तङ्गणाः, हलाः, स्त्रीराज्यम्, महार्णवद्वीपा, मधुररसं, कुसुमानि, फलानि, जलम्, लवणं, मणयः, शङ्खाः, मौक्तिकम्, सलिलसम्भवाः, धान्यानि, यवाः, औषधयः, गोधूमाः, याज्ञिकाः, आक्रन्दः, ब्राह्मणाः, श्वेतवर्णम्, सर्वजनप्रियाः, अश्वाः, कामिनः, युवतयः, सेनापतयः, भोज्यं वस्त्राणि, शृङ्गिणः, रात्रिचराः, कर्षकाः, यज्ञसूत्रज्ञाः। |
| भौमः | शोणस्य तथा नर्मदायाः भीमरथायाश्च पश्चिमभागे ये देशाः समवस्थिताः ते तथा निर्विन्ध्यानदी वेत्रवती सिप्रा गोदावरी वेणा मन्दाकिनी पयोष्णी सिन्धुमालतीपरा एताः सर्वाः नद्यः उत्तरपाण्ड्यजनाः महेन्द्रपर्वस्य विन्ध्यस्य मलयस्य समीपस्थाः जनाः |

| | |
|---|---|
| | चोलाः जनाः द्रविडाः विदेहाः आन्ध्राः अश्मकाः भासापराः कौङ्कणाः समन्त्रिषिकाः कन्तलाः केरलाः दण्डकारण्यम् कन्तिपुरम् म्लेच्छाः सङ्करजातयः नागराजनाः कर्षकाः पारताः हुताशनजीविनः शस्त्रवृत्तयः आटविकाः कर्वटाः वधरताः पापाः अवलिप्ताः राजानः बालकाः हस्तिनः दाम्भिकाः डिम्भाभिघातः पशुपालाः रक्तवर्णफलकुसुमावृक्षाः सेनापतयः गुडः मद्यं निम्बादितीक्ष्णं भाण्डगृहम् अग्निहोत्रसेविनः गैरिकादिधातूनां स्थानम् रक्तपटिकः यतिः चौराः शठाः दीर्घवैरः बह्वाशी |
| बुधः | लोहित्योनन्द, सिन्धुनदः, सरयूनदी, गाम्भीरिका, रथाख्या, गङ्गा, कौशिकी, विपाशा, सरस्वती, चन्द्रभागा, एताः, नद्यः, वैदेहजनाः, काम्बोजजनाः, मधुरायाः, पूर्वभागः, हिमवान्, गौमन्तपर्वतः, चित्रकूटपर्वतः, सौशष्ट्रजनाः, सेतुगामिनः, जलमार्गाश्रयिणः, पण्यश्रयिणः, बिलाश्रयिणः, पर्वताश्रियिणः, वापीकूपतटाकादयः, यन्त्रज्ञाः, गेयज्ञाः, लेखज्ञाः, मणिलक्षणज्ञाः, रागयुक्तिविदः, गन्धयुक्तिविदो, चित्रकर्मज्ञाः, वैयाकरणाः, गणितज्ञाः, रसायनज्ञाः, शिल्पज्ञाः, गूढार्थवेदिनः, कुहकजीवकाः, बालाः, कवयः, शठाः, पिशुनः, अभिचाराः, दूताः, नपुंसकाः, हास्यज्ञाः, भूततन्त्रज्ञाः, इन्द्रजालज्ञाः, आरक्षकाः, नटाः, नर्तकाः, आज्यम्, तैलम्, तिलाक्षोटादयः, रसायनकुशालः, वेसराः। |
| गुरुः | सिन्धुनदस्य पूर्वभागः, मधुरायाः पश्चार्द्धम्, भरताजनाः, सौवीराः, स्त्रुघ्नोदेशः, उत्तरदिङ्निवासिनजनाः, विपशानदी, शतद्रूः, रमठाः, शाल्वाः, त्रैगर्ताः, पौरवाः, अम्बष्ठाः, पाताः, वाटधानाः, यौधेयाः, सारस्वताः, अर्जुनायनाः, मत्स्याजनाः, हस्तिनः, अश्वाः, पुरोहिताः, |

| | |
|---|---|
| | राजानः, सचिवः, मङ्गलकार्येषुरताः, कारुण्ययुताः, सत्यभाषिणः, शौचरताः, तपस्विनः, विद्यायुताः, दानरताः, धर्मरताः, पौराः, महाधनिनः, वैयाकरणाः, पण्डिताः, वेदज्ञाः, अभिचारज्ञाः, नीतिज्ञाः, आयुधानि, छत्रध्वजचामराः, सुगन्धद्रव्याणि, मधुरादिरसाः, बल्लीजम्। |
| शुक्रः | तक्षशिलानगरी, मार्तिकावतदेशः, बहुगिरिः, गान्धाराः, पुष्कलावतकोदेशः, प्रस्थलाः, मालवाः, कैकयाः, दर्शार्णाः, उशीनराः, शिबयः, वितस्ता, ऐरावती, चन्द्रभागनदीतीरस्थाः, रथा, रजतं, अर्थोत्पत्तिस्थानम्, हस्तिनः, अश्वाः, महामात्राः, ईश्वराः, सुगन्धद्रव्यम्, पुष्पाणि, अनुलेपनं, मणयः, वज्रं, भूषणानि, शय्या, प्रधानाः, यौवनोपेताः, युवतयः, कामोपकरणादि, मृष्टान्नभजः, मधुरभुजः, उद्यानम्, जलम्, कामुकाः, यशस्विनः, सुखिनः, दातारः, सुरूपाः, विद्वांसः, मन्त्रिणः, वणिग्जनाः, कुम्भकाराः, पक्षिणः, त्रिफलाः, कौशेयपट्टोलोकः, और्णिकः, पत्रौणिकं, रोध्रं, सुगन्धपत्रं, मलिनपत्रं, अगरु, वचा, पिप्पल्यः, कणाः, चन्दनम् |
| शनैश्चरः | अनर्ताः, आर्बुदाः, पुष्कराः, सौराष्ट्राः, आभीराः, शूद्राः, रैवतकाः, यस्मिन् देशे सरस्वतीनदी अदर्शनं गता सः पश्चिमोदेशः, कुरुभूमिजाः, प्रभासंस्थानम्, विदिशानगरी, वेदस्मृती नदी, महीनदी तटे ये जाताः ते, दुर्जनाः, मलोपेताः, नीचाः, तैलिकाः, निःसत्वाः, उपहृतपुंस्त्वाः, बान्धनाः, शाकुनिकाः, अशुचिरताः, नाविकाः, विरूपाः, कृद्धाः, सौकरिकाः, गणप्रधानाः, स्वलितव्रताश्च, शबराः, पुलिन्दाः, अर्थपरिहीनाः, कटद्रव्याणि, तिक्तं, रसायनं, भर्तुहीनास्त्रियः, सर्पाः, चौराः, महिष्यः, खराः, करभाः, चणकाः, वातलाः, शालयः। |

| | |
|---|---|
| राहुः | पर्वतशिखरेषु गिरिखातासु दरीषु ये स्थिताः म्लेच्छजातयः ते शूद्राः गोमायुभक्षाः, शूलिकाः, वोक्काणाः, अश्वमुखाः, विकलाङ्गाः, कुलपांसनाः, क्रूराः, कृतघ्नाः, तस्कराः, सत्यरहिताः, शौचरहिताः, कदार्याः, गर्दभाः, चरपुरुषाः, बाहुयुद्धज्ञाः, तीव्ररोषाः, गर्ताश्रयाः, नीचाः, कुत्सिताः, दाम्भिकाः, राक्षसाः, निद्राबाहुलाः, धर्मरहिताः, तिलाः। |
| केतुः | पर्वतदुर्गाः, पह्लवजनाः, श्वेताः, हूणाः, चोलाः, आवगणाः, मरुभूः, चीनाः, गह्वरवासिनः, धनिनः, विपुलाशाः, व्यवसायोपेताः, पराक्रमोपेताः, परदाररताः, विवादरताः, पररन्ध्रकुतूहलाः, मत्ताः, मूर्खाः, धर्मरहिताः विजेतुमिच्छावः। |

### १३.४) देशेषु जनेषु ग्रहाणां आधिपत्यकथनस्य प्रयोजनम्

यो ग्रहः उदयसमये निर्मलरश्मिः विस्तीर्णबिम्बो भवति। अर्थात् निर्घातेन वा उल्कया वा ग्रहयुद्धेन वा पीडां विना स्वराशौ वा उच्चे स्थाने वा प्रविशति। तथा शुभग्रहैवीक्षितो भवति सः ग्रहः येषां स्वामी परिकीर्तितः तेषां श्रेयस्करो भवति।

उदयास्तमये यल्लक्षणमभिहितं तस्मिन् विपरीतलक्षणे दृष्टे तस्य ग्रहस्य यः परिग्रह उक्तः सः विनाशं प्राप्नोति। अर्थात् सः अशुभलक्षणयुतो ग्रहः येषां स्वामी भवति, तेषां एवंविधे उत्पाते सति नृपाणां रिपुकृतं भयं न भवति, आत्मीयपुत्रकृतं वा मन्त्रिकृतं वा भयं न भवति। यचोऽस्मिन् ग्रहोत्पाते दृष्टे एत एवोपसर्ग नृपाणामाशङ्क्यन्ते। एषां मध्यादन्यतमो न भवति। तदा अवर्षणेन नगरेषु पर्वतेषु नदीषु अपूर्वं गमनं भवति।

## १३.५) ग्रहयुद्धकारणम्

येन प्रकारेण ताराग्रहाणां युद्धं भविष्यतीति त्रिकालविद्भिः यत् कथ्यते तस्य ग्रहयुद्धस्य विज्ञानं यथा ज्ञायते तथा (मया) वराहमिहिरेण पंचसिद्धान्तिकायां तथैव भगवता आदित्येन च सूर्य सिद्धान्ते कृतम्।

आकाशे चरतां भौमादीनां ग्रहाणा ऊर्ध्वाधःस्थित्या स्ववर्त्मनि प्रतिमण्डलवशेन संस्थितानां दृष्टिगोचरे अतिदूरात् तुल्यतामिव प्राप्तानां आसन्नक्रमयोगात् युद्धं भवति।

## १३.६) चतुष्प्रकारयुद्धविचारः

पराशरगर्गकाश्यपवज्रादिभिमुनिभिः ग्रहाणां युद्धं भेदोल्लेखांशुमर्दनासव्या इति चतुष्प्रकारं कथितम् -

भेदः - यत्र ग्रहद्वयमपि एकबिम्बम् इव लक्ष्यते सः भेदः। अधस्तेन ऊर्ध्वस्थधाढनमित्यावत् भेदो भवति।

उल्लेखः - यत्र ग्रहस्य ग्रहेण बिम्बपरिधिसंस्पर्शः क्रियते स उल्लेखः

अंशुमर्दनम् - भेदोल्लेखस्य व्यतिरेकेण आसन्नयोर्द्वयोग्रहयोः परस्परं रश्मयः विहन्यमाना इव लक्ष्यन्ते तदंशुमर्दनं इति कथ्यते। किरणानां परस्परमर्दनमेव अंशुमर्दनमिति कथ्यते।

अपसव्यः - दक्षिणोत्तरावस्थानं अपसव्यमिति उच्यते। अपसव्योनाम प्रदक्षिणमिति उच्यते। आचार्येण चन्द्रग्रहसमागमे अपसव्यलक्षणमुक्तम्। '' शशिनि फलमुदक्स्थे यद् ग्रहस्योपदिष्टं भवति तदपसव्ये सर्वमेव प्रतीपम् '' इति

### चतुष्प्रकारस्य युद्धस्य प्रत्येकं फलम्

१.भेदसंज्ञिते युद्धे अवर्षणं भवति। मित्राणां महाकुलानां च परस्परं भेदो भवति।

२. उल्लेखसंज्ञिते युद्धे शस्त्रभयं मन्त्रिविरोधः दुर्भिक्षभयं च भवति।

३. अंशुमर्दनसंज्ञिते युद्धे नृपाणां युद्धानि भवन्ति। तथा शस्त्रेण क्षुधा च जना उपताप्यन्ते। अवमर्दोऽतीव पीडा इत्यर्थः।

४. न केवलं अंशुमर्दने भूभृतां युद्धानि भवन्ति यावदपसव्यग्रहयुद्धेपि भूपानां युद्धानि सम्भवन्ति।

**१३.७)ग्रहाणां यायिनागराक्रन्दसंज्ञाः**

रविः मध्याह्नसमये आक्रन्दसंज्ञो भवति। स एव रविः पूर्वाह्ने अर्थात् दिनस्य प्रथमत्रिभागे नागरो भवति। नगरस्य अपरो नाम पौरः भवति। अपराह्ने अर्थात् दिनस्य पश्चिमत्रिभागे यायी भवति। यः यातव्यस्य अग्रतो ? याति सः यायी भवति।

सौम्यजीवसौराः सर्वकालं नागराः भवन्ति। चन्द्रः सर्वकालं आक्रान्दो भवति। केतुकुजराहुशुक्राः यायिनो भवन्ति। आक्रन्दयायिपौरा ग्रहा यदि पराजिताश्चेत् आक्रन्दयायिपौरान् नृपान् घ्नन्ति।

एते एव यदि जयिनः तर्हि आत्मीयवर्गस्य जयदा भवन्ति।

पौरेण ग्रहेण पौरे ग्रहे विजिते सति पौरान् नृपान् एव नाशयन्ति एवमनेन प्रकारेण याय्याक्रन्दाः परस्परं विनिघ्नन्ति। नागरयायिग्रहाश्चैवमपि जिताः परस्परं विनिघ्नन्ति।

**१३.८) जितलक्षणविचारः**

यः ग्रहो दक्षिणदिक्स्थो रूक्षो सकम्पः अन्यग्रहमप्राप्य निवर्तितः विपरीतां गतिमापन्नः सूक्ष्मः अन्येन आक्रान्तः विकारं गतः दीप्तरहितः विगतवर्णः भवति स जितो भवति।

अर्थात् विवर्णपरुषसूक्ष्मयाम्याशमार्गस्थोऽधिरूढो निष्प्रभो विकृतोऽभि हतो प्राप्यनिवृत्तवेपनाद्यै दशभिः लक्षणैः ग्रहं विन्द्यात्। अन्यथा विजयी इति ज्ञेयम्।

**१३.९) जयिनोलक्षणविचारः**

दक्षिणदिकस्थः परुष इत्यादि यल्लक्षणपूर्वमुक्तं तस्माद्विपरीत लक्षणसम्पन्नः विजयी भवति। अर्थात् उत्तरदिक्स्थः स्निग्धः अवेपथुः सम्यक्प्राप्तो विपुल उपरिस्थितः अविकृतः तेजस्वी यः ग्रहः भवति सः जययुक्तो भवति तथा यः बृहद्बिम्बः निर्मलः कान्तियुक्तः भवति सः दक्षिणस्यां दिशि स्थितोऽपि जययुक्तः इति ज्ञेयम्। प्रायः एतत्

लक्षणं शुक्रस्य सम्भवति। अर्थात् सर्वेग्रहाः उदकस्था जयिनः भवन्ति। शुक्रस्तु दक्षिणस्थोऽपि जययुक्तो भवति इति विनिर्देश्यः।

कदाचित् द्वावपि ग्रहौ महता रश्मिजालेन संयुक्तौ विस्तीर्णौ निर्मलौ भूत्वा यदि समागमे भवतः तदा तस्मिन् समागमे तौ ग्रहौ परस्परं प्रीतिस्थौ भवतः। तावेव ग्रहौ विपरीतौ भवतः अर्थात् यदि रश्मिरहितौ रूक्षौ भूत्वा समागमे भवतः तर्हि आत्मीयपक्षघ्नौ भवतः।

भौमादीनां ताराग्रहाणां चन्द्रमसा सह युद्धं वा समागमो वा स्वलक्षणैः यदि अव्यक्तो भवति चेत् तदा तत् युद्धं जयपराजयरहितं भवति। यथा द्वावपि मयूखयुक्तौ स्निग्धौ विपरीतलक्षणस्थितौ वा तत्र न ज्ञायते को जितः कश्चजयी इति यदि अव्यक्तः समागमो भवति तर्हि तदा ग्रहाणां समागमे ग्रहादुत्तरगते दक्षिणादिग्गते वा चन्द्रे यच्छुभाशुभफलमुक्तं तन्नवक्तव्यम्। अव्यक्तं समागमे ग्रहात् चन्द्रो नोत्तरेण न च दक्षिणेन वा याति मध्येन गमनं करोति तदा तत्र समागमोक्तं फलं न वक्तव्यम्। तत्र भेदफलं वक्तव्यम् तेनैव प्रकारेण भूमौ राज्ञां अव्यक्तंफलमेव वक्तव्यम्। एवं चन्द्रस्योत्तरगमनेन शुभं फलं वक्तव्यम्। दक्षिणेनाशुभं मध्येन मध्यफलं वक्तव्यम्।

### १३.१०) सर्वग्रहविजितानां भौमादीनां ग्रहाणां फलविचारः

१. <u>सर्वग्रहविजितस्य भौमस्य फलविचारः</u> - बृहस्पतिना पराजिते अङ्गारके बाह्लिकाः जनाः जिगमिषवः सुवर्णकारप्रभृतयः एते उपताप्यन्ते। बुधेन जिते भौमे शूरसेनाः जनाः कलिङ्गाः शाल्वाश्च पीड्यन्ते।

शनैश्चरेण पराजिते अङ्गारके नागराः विजयं प्राप्नुवन्ति। तथा प्रजाश्च अवसादयन्ति भौम शुक्रेण जितः सति तदा कोष्ठागाराणां म्लेच्छानां क्षत्रियाणां च सन्तापःभवति।

२. <u>सर्वग्रहविजितस्य बुधस्य फलविचारः</u> - अङ्गारकेन यदि बुधः विजितो भवति तर्हि तदा तरवः नद्यः तपस्विनः अश्मकाः जनाः राजानः उत्तरदिक्स्थाः क्रतुदीक्षाः एते सर्वे पीडां प्राप्नुवन्ति।

गुरुणा बुधः जितः सति म्लेच्छाः शूद्रजातयः तस्कराः अर्थयुक्ताः पुरवासिनः त्रैगर्ताजनाः पर्वतवासिनः एते सर्व एव पीडां प्राप्नुवन्ति। मही च कम्पते।

शनैश्चरेण बुधः यदा विजितो भवति तदा नाविकाः योधाः जलजाः ईश्वराः गर्भिण्यः स्त्रियः एते सर्व एव पीड्यन्ते। शुक्रेण यदि बुधः विजितो भवति तर्हितदा बह्निप्रकोपः सस्यानां मेघानां यियासूनां च विनाशो भवति।

३. <u>सर्वग्रहविजितस्य जीवस्य फलविचारः</u> - शुक्रेण बृहस्पतिः यदि विजितो भवति तर्हि तदा कुलूताः जनाः, गान्धाराः, कैकयाः, मद्राः, शाल्वाः, वत्साः, वङ्गाः, धेनवः सस्यानि एते सर्वे पीड्यन्ते।

शनैश्चरेण यदि जीवः पराजितो भवति तर्हि तदा अर्जुनायानजनाः वसातयः यौधेयाः शिबयः ब्राह्मणाः एते सर्वे एव पीड्यन्ते।

बुधेन यदि गुरुः पराजितो भवति तर्हि तदा म्लेच्छाः सत्यवादिनः शस्त्रवृत्तयः मध्यदेसश्च एते सर्वे विनाशमुपयान्ति। गुरुभक्तिफलं यत् प्रागुक्तं तच्चापि संक्षयं याति।

४. <u>सर्वग्रहविजितस्य शुक्रस्य फलविचारः</u> - बृहस्पतिना शुक्रः यदा जितो भवति तदा नायका प्रधानाः च क्षयं प्रप्नुवन्ति। तथा ब्राह्मणानां क्षत्रियाणां च विरोधः भवति। इन्द्रः जलं आकाशात् न त्यजति। तथा कोशलजनाः कलिङ्गाः वङ्गाः वत्साः मत्स्याश्च मध्यदेशेन समन्विताः सर्वे महतीं पीडां प्राप्नुवन्ति तथैव क्लीबाः शूरसेनाश्च पीडां व्रजन्ति। कुजेन यदि शुक्रः विजितो भवति तर्हि तदा सेनापतेः वधः भवति तथा राज्ञां युद्धानि भवन्ति।

बुधेन यदि शुक्रः जितो भवति तर्हि तदा पर्वतवासिनः नाशनमायान्ति। गावां क्षीरविनाशः अल्पवृष्टिश्च भवति।

शनैश्चरेण शुक्रः यदि जितो भवति तर्हि तदा गणप्रधानाः शस्त्रजीविनः क्षत्रियवर्गाः जलोद्भवाश्च पीडां उपयान्ति। अन्यत् यत् स्वभक्तिफलं उक्तं तदपि हन्ति।

५. <u>सर्वग्रहविजितस्य शौरस्य फलविचारः</u> - शुक्रेण शनिः यदि विजितो भवति तर्हि तदा सर्वद्रव्याणां वृद्धिः भवति तथा सर्पाणां मानयुक्तानां जनानां च पीडा भवति।

अङ्गारकेन सौरि यदि निहितो भवति तर्हि तदा तङ्गणाजनाः आन्ध्राः उड्राः काशयः ब्राह्लीकाः एतेषां जनानां देशानां च पीडा भवति।

बुधेन यदि शनिः विजितो भवति तर्हि तदा अङ्गजनाः क्रयविक्रयजीविनः पक्षिणः पशवः हस्तिनः एतेसन्ताप्यन्ते। तथा गुरुणा जिते सति स्त्रीबहुला ये देशाः सन्ति ते महिषकशकाः जनाश्च सन्ताप्यन्ते।

**१३.११) चन्द्रस्य गतिलक्षणविचारः**

यथा नक्षत्राणां उत्तरेण गतः शशी शुभकृत् भवति। तथा ग्रहाणामपि उत्तरेण गतः शशि शुभकृत् भवति। ग्रहाणां वा नक्षत्राणां वा शशाङ्कस्य उत्तरगमनं प्रदक्षिणं इति उच्यते। दक्षिणगमनं अपसव्यमिति उच्यते। शशाङ्कः प्रदक्षिणगतौ नृपाणां श्रेयस्करो भवति। दक्षिणेन यदि शशाङ्कः यतः तर्हि न शुभदः इत्यर्थः।

**१३.१२) भौमादीनां ग्रहाणां उत्तरगते चन्द्रे फलविचारः**

१. अङ्गारकस्य उत्तरगते चन्द्रे फलविचारः - शशी अङ्गारकस्य यद्युत्तरेण गच्छति तदा पर्वतनिवासिनां बलशालिनां च जयो भवति। तथा यायिभिः सहिताः क्षयिनः प्रमुदिता भवन्ति। तथा च वसुन्धरा बहुधान्येन मुदिता भवति।

२. बुधस्य उत्तरगते चन्द्रे फलविचारः - शशाङ्कः आत्मीयपुत्रस्य बुधस्य उत्तरेण यदि याति तदा पौराणां नृपाणां जयाय भवति सुभिक्षं च करोति। तथा च सस्यानां उपचयं लोकानां तुष्टिं राज्ञां भाण्डागारवृद्धिं च करोति।

३. बृहस्पतेरुत्तरगते चन्द्रे फलविचारः - चन्द्रः यदा बृहस्पतेः उत्तरेण गच्छति तदा जनानां ब्राह्मणानां क्षत्रियाणं पण्डितानां तथा धर्मस्य मध्यदेशस्य च वृद्धिः भवति तथा सर्वाः प्रजाश्च मुदिता भवन्ति।

४. शुक्रस्य उत्तरगते चन्द्रे फलविचारः - यदा चन्द्रः शुक्रस्य उत्तरेण याति तदा सञ्चितभाण्डागाराणां गजानां अश्वानां च वृद्धिप्रदो भवति तथा धनुष्मतां जिगमिषूणां च विजयो भवति। तस्मिन् काले उत्तमं सस्यसम्पद् भवति।

५. शनेः उत्तरगते चन्द्रे फलविचारः - चन्द्रः यदि शनैश्चरस्य उत्तरगमनं करोति तर्हि तदा पुरनिवासिनां राज्ञां च जयो भवति। तथा शकाः बाह्लिकाः सैन्धवाः पह्लवाः यवनाः एते सर्वे प्रहृष्टाः भवन्ति।

## १३.१३) चन्द्रस्य विशेषफल विचारः

रश्मिहिमदीधितिश्चन्द्रः येषां नक्षत्राणां भौमादीनां ताराग्रहाणां उत्तरेण यदा गच्छति तदा तेषां नक्षत्राणां ग्रहाणां ग्रहभक्तिमध्ये नक्षत्रव्यूहे च यानि द्रव्याणि उक्तानि तेषां सर्वेषामपि उत्पातरहितो भवति पुष्टिं च ददाति। तथा ग्रहाणां मध्ये ये पौराः इतरे यायिनः सन्ति तेषां ग्रहाणां स्वभक्तौ ये देशा उक्ताः तांश्चपुष्टिं नयति। यदि चन्द्रः उक्तलक्षणात् विपरीतं भवति अर्थात् चन्द्र यदि दक्षिणेन गच्छति तर्हि तदा तान्येव द्रव्यादीनि विनाशयति भौमादीनां ताराग्रहाणां उत्तरस्यां दिशि स्थिते चन्द्रे यत् फलं उपदिष्टं तत् सर्वमेव निःशेषमपसव्ये चन्द्रे विपरीतं भवति। इत्येवं प्रकाराः नक्षत्राणां ग्रहाणां च चन्द्रसंयोगाः कीर्तिताः। चन्द्रस्य भौमादिभिः ग्रहैः नक्षत्रैश्च साकं युद्धं न भवति। सूर्यस्य ग्रहैस्सह समागमोऽस्तमयशब्दवाच्यः चन्द्रेण सहसमागम शब्दवाच्यः। भौमादीनां ग्रहाणां परस्परं युद्धशब्दवाच्य इत्यस्मिन् शास्त्रे सिद्धान्तः

## १३.१४) आदित्यादि ग्रहाणां वर्षफलविचारः

१. <u>आदित्यस्य पर्षफलविचारः</u> - वविवर्षे मासे दिने सर्वस्मिन् देशे स्वल्पै र्धान्यादिभिः भूः संयुक्ता भवति। तथैव अरण्यानि भक्षयितुमिच्छावै वराहादिभिः युक्तानि भवन्ति। नद्यः प्रभूतं जलं न स्यन्दन्ति। रोगाणामुपशमनार्थं यानि च भैषजानि सन्ति तानि वीर्ययुक्तानि न भवन्ति। तथा आदित्यः शिशिरकालेऽपि (माघफाल्गुणमासयोरपि) अतिचण्डं सन्तापयति। तथा मेघाः पर्वताकारा अपि न प्रभूतं जलं मुञ्चन्ति। तथा आकाशः विगतकान्तिनक्षत्रसमूहचन्द्रो भवति। तापसकुलानि गोकुलानि च अवसादयन्ति। तथा राजानः हस्तिभिः तुरगैः पदातिवलैः तथा धनुखड्गमुशलादिभिरायुधैः संयुक्ता अपि संग्रामे सचिवैस्सह देशान् जिघांसन्तो विचरन्ति।

२. <u>चन्द्रस्य वर्षफलविचारः</u> - शीतरश्मेः संवत्सरे मासे दिवसे वा इदृशानि फलानि भवन्ति। पर्वतसदृशैः तथाव्यालाञ्जनालिमहिषादिसदृशकान्तिभिः भूमिमखिलां पूरयिद्भिर्जलैः तथा विरहिणामौत्सुक्यजनेन दुस्सहेन गर्जितेन दिशः पूरयद्भिः मेघैः नभः आच्छादितं भवति। तथा जलानि पद्मैः कुमुदैश्च अतीव युतानि भवन्ति। तादृशैर्जलैर्युतानि उपवनानि कुसुमितद्रुमैः भ्रमरैर्नादितानि भवन्ति तथा गावः प्रभूतक्षीराः

भवन्ति। तथा नयनाभिरामाः स्त्रियः सन्ततं वल्लभान् सुरतै रमयन्ति। तथा अवनिः गोधूमैः शालिभिः यवधान्यवरैः संयुक्ता भूत्वा नगरैराकरोत्पत्तिस्थानैबहुला भूत्वा यज्ञश्रेष्ठैरिष्टिभिः वेदशब्दैः चित्यङ्किता भूत्वा राजभिः पाल्यन्ते।

३. भौमस्य वर्षफलविचारः - अङ्गारकस्य संवत्सरे मासे दिवसे वा इदृशानि फलानि भवन्ति। ग्रामान् वनानि नगराणि च सन्दिधक्षुः अग्निः मारुतेन सञ्चार्यमाणः दुःसहश्चरति। तथा भूमौ मनुष्यगणाः चोराणां समूहै पीडितास्सन्तः हाहाशब्दं कुर्वन्ति। अर्थात् विगतपशुधनाः भवन्ति। तथा मेघा आकाशेअभ्युन्नताः घनदेहाः अपि कुत्रचिदपि पचुरं जलं न मुंचन्ति। तथा जलप्रवेशमार्गे उत्पन्नमपि धान्यादिकं नीरसत्वं उपैति तथा संजातमपि सस्यं अशनिपातादि अन्यैरुत्पातैर्वा अपनयति। तथा राजानः सम्यग्धर्मेणाभिपालने तत्परा न भवन्ति। तथा पित्तोत्थानां रोगाणां बाहुल्यं भवति। भुजगेभ्यः प्रकोपः लोकानां पीडा च भवति। एवं विधैः दोषैः इयं जनसमूहता पीडिता भवति।

४. बुधस्य वर्षफलविचारः - मृगलाञ्छनश्चन्द्रः तस्मात् जातः बुधः अतः बुधः मृगलाञ्छनजो भवति। अस्य बुधस्य संवत्सरे मासे दिवसेवा ईदृशानि फलानि भवन्ति। प्रपंचकुशलानां विस्मयदर्शिनां आश्चर्यदर्शकानां अर्थोत्पत्तिस्थाने कुशलानां नगरवासिनां गेयज्ञानां लेख्यविदां गणितप्रवीणानां आयुधज्ञानां च वृद्धिः भवति। राजानः परितोषेच्छया परस्परस्नेहोत्पादनेन आश्चर्यवन्तिदर्शनानि हर्षोत्पादकानि अन्योन्यं दातुमिच्छन्ति। कृषिः पशुपालनं वाणिज्यं च जगति सत्यस्वरूपाः सफलाश्च भवन्ति। तद्वृत्तीनां प्रभूतलभा भवन्ति। ऋग्यजुसामाश्च त्रयी सम्पूर्णा भवन्ति अर्थात् लोके अत्यर्थं वेदाः पठन्ति। शास्त्रविहिता दण्डनीतिः मनुर्नामराज्ञा यथा प्रणीता तथा सम्यक् चरति अर्थात् मनुना यथा प्रजारक्षणं कृतं तथा बुधस्य वर्षेऽपि राजा करोति।

अक्षरं परमात्मा तदधिकृत्य कृतं शास्त्रमध्यक्षरं तत्र अभियुक्ता बुद्धिः येषां ते तथा भुतास्सन् केचित् तर्कविद्यासु च मोक्षाख्यं प्रकृष्टंस्थानं ईहमाना भवन्ति।

तथा उपहासविदां दूतानां कवीनां बालानां नपुसकानां प्रयोगज्ञानां सेतुवासिनां जलवासिनां पर्वतवासिनां च तुष्टिं करोति । तथा भूमौ औषधीनां बाहुल्यं भवति।

५. गुरोः वर्षफलविचारः - गुरोः शुभे वर्षे मासे दिवसे वा एतानि फलानि भवन्ति। नन्वत्र सर्वग्रहाणां वर्षफलानि सामान्येनाभिहितानि भवन्ति। किन्त्वत्र किमर्थं शुभे इति पदग्रहणं इत्यत्रोच्यते बृहस्पतिचारे पिङ्गलकालयुक्तरौद्रसंज्ञानि वर्षाणि अशुभफलान्युक्तानि। तेषुवर्षेषु अपि गुरौपतित्वे फलानि शुभानि पूर्णानि भवन्ति। यदा पुनः प्रभवविभवशुक्लप्रमोदवर्षाणि शुभानि भवन्ति तदा तेष्वापि गुरौ वर्षपतित्वे शुभफलानि भवन्ति अत एवमुक्तम्।

ब्राह्मणप्रधानानां अध्वरे उच्चरितविस्तीर्णरात्रिवर्जित ध्वनि स्वर्गं गच्छति। सः ध्वनिः यज्ञविघ्नकर्तृणां राक्षसानां मनांसि भिन्दन् तथा यज्ञभागिनां इन्द्रादीनां चेतांसि आनन्दकरो भवति। तथा भूमिः भूम्यधिपतिभिः सम्यक् रक्षणेन वृद्धिं गता शोभते । तदा उत्तमानि धन्यादीनि भूमौ विद्यन्ते। यथा भूः बहुभिः गजैः पदातिभिः तुरगैर्वित्तै विस्तीर्णैर्गोकुलैस्समृद्धा भवति। तथा देवानां स्पर्द्धिनः जनाः भूमौ तिष्ठन्ति। तथा आकाशः भूमिं विशेषेण जलेन अनवरतकालानुवर्षणात् तर्पयद्भिः विविधाकारैरुन्नतैर्मेघैः व्याप्तो भवति। तथा भूमिः प्रभूतधान्या प्रधानया समृद्धया च संयुक्ता भवति।

६. शुक्रस्य वर्षफलविचारः - शुक्रस्य संवत्सरे मसे दिने वा ईदृशानि फलानि भवन्ति। भूः धान्यदिभिः इक्षुभिश्च युक्ता भूत्वा अपि पर्वतसदृशाकृतिभिः मैघैर्मुञ्चितजलेन परिपूर्णतटाभूत्वा विस्तीर्ण अम्बुना श्रीमत्सरोरुहैर्युक्तैस्तटाकैः कीर्णा भवति। अतएव विचित्रवर्णत्वात् नूतनैराभरणैरुपशोभितावयवैर्युतास्त्रीव शोभते।

तथा भूमौ प्रभूतवीर्यमरिपक्षं बलरहितं भवति। दिशः बहुप्रकारेण उदधोषित जयशब्देन विराविताः भवन्ति। शिष्टजनाः प्रहर्षिता भवन्ति दृष्टाः विशेषेण नष्टा भवन्ति। तथा गां राजनः रक्षन्ति। तथा भूः नगरैरर्थोत्पत्तिस्थानैश्च समृद्धा भवन्ति। तथा वसन्ते मद्यं विलासिनीभिः पुनः पुनः पीयते। वेणुवीणाभ्यां कर्णसुखकारि पुनः पुनः गीयते। अतिथिभिः मित्रैः बन्धुजनैश्च साकं भोजनं पुनः पुनः भुज्यते। अतीव कामासक्ता भवन्ति प्रजाः।

७. <u>शनेः वर्षफलविचारः</u> - दिनकरसुतस्य संवत्सरे मासे दिवसे वा एतानि फलानि भवन्ति। उद्गतैशचौराणां समूहैः बहुप्रकारैस्संग्रामै राष्ट्राणि आकुलानि भवन्ति। तथा अनेकपशुधनरहितानि भवन्ति राष्ट्रानि। संग्रमे हतबन्धुजनैः अत्यर्थं रोदमानैबन्धुजनैश्च तथा प्रधानैः रोगैः बुभुक्षया च राष्ट्रानि आकुलानि भवन्ति।

तथा आकाशः वातेन चालितैर्मेघैर्वर्जितो भवति। तथा भूतलं बहुप्रकारेण भग्नैः शाखिभिर्व्याप्तं भवति। तथा आकाशः नष्टार्कचन्द्रकिरणो भवति तथा अतिरजसा व्याप्तो भवति। वापीकूपतटाकादिजलाधाराः स्थगिता भवन्ति। नद्यः जलरहिताः स्वल्पजलाश्च भवन्ति। वृत्रशत्राविन्द्रे स्वल्पमभिवर्षति सति कुत्रचित् उत्पन्नानि सस्यानि जलेन विना विनाशं यान्ति। तथा अन्यानि उदकसिक्तानि वृद्धिमृच्छन्ति।

**<u>१३.१५) वर्षफले विशेष विचारः</u>** - विस्तर्णबिम्बः स्फुटमयूख उच्चस्थः स्वगृहत्रिकोण मित्रक्षेत्राणां अन्यतमस्थो जयश्च ग्रहः परिपूर्णानि उक्तानि शुबानि फलानि ददाति। अन्यथा अनिष्टानि फलानि ददाति। अशुभेवर्षे रविभौमसौराणां अन्यतमे ग्रहस्य अशुभं वर्तते तस्य फलस्य वृद्धिः भवति। एतदुक्तं भवति - अशुभग्रहवर्षे अशुभस्यैव ग्रहस्य मासाधिपत्यं यदा भवति तदा तस्मिन् मासे अतीवाशुभं फलं स ग्रहो ददाति। शुभफलमषि तथैव भवति। मासाब्दयोः शुभत्वे मासजस्यैव शुभस्य वृद्धिर्भवति। मासाब्दयोः एकस्य शुभत्वे अन्यस्याशुभत्वे अल्पं फलं वाच्यमिति।

**<u>१३.१६) दिक्फलप्रतिपादनविचारः</u>** - भौमबुधगुरुसितसौराः ताराग्रहाः यस्यां दिशि दृश्यन्ते तथा यस्यां दिशि आदित्यं प्रति यान्ति। तस्यां दिशि शस्त्रकोपेन दुर्भिक्षेण उपद्रवैश्च भयं भवति।

**<u>१३.१७) ग्रहाणां संस्थानप्रदर्शनफलविचारः</u>** - चक्रचापत्रिकोणदण्ड-प्रसादसदृश कुन्तवज्रादि आकृतिषु स्थिताः ग्रहाः लोकेसर्वत्र दृर्भिक्षं अवृष्टिं च कुर्वन्ति। तथा राज्ञां संग्रामाय भवन्ति। अर्थात् उक्तसंस्थानेभ्यः विपरीताः भवन्ति तर्हि शुभं फलं कुर्वन्ति।

**१३.१८) अन्तरिक्षप्रविभागेनफलविचारः**

आदित्यस्य दिवसान्ते अस्तमयकालानन्तरं यस्मिन् आकाशभागे ग्रहपङ्क्तिः दृश्यते तस्मिन्नेव भूभागे द्वितीयः राजा भवति। तथा तत्र अतीवपरचक्रोपद्रवश्च भवति।

**१३.१९) नक्षत्रावस्थितानां ग्रहाणां फलविचारः**

यस्मिन् नक्षत्रे ग्रहाः समागमं कुर्युः तस्य नक्षत्रस्य जनपदा देशाः नक्षत्रव्यूहेन कथिताः तान् ते ग्रहाः नाशयेयुः। यदा च ते एव ग्रहाः अन्योन्यं छाद्यच्छदकभावेन स्थिताः निर्मलरश्मयः यदि भवेयुः तर्हि तदा नक्षत्रव्यूहेन उक्तरीत्या तेषामेव जनानां देशानां श्रेयस्करा भवन्ति।

**१३.२०) योगषट्कस्य लक्षणफलविचारः**

| | |
|---|---|
| १.ग्रहसंवर्त | २.ग्रहसमागमः |
| ३.ग्रहसम्मोहः | ४.ग्रहसमाजः |
| ५.ग्रहसन्निपातः | ६.ग्रहकोशः। |

इत्येवं प्रकाराः ग्रहयोगाः षड्विधाः भवन्ति। तेषां लक्षणानि -

१. एकस्मिन् नक्षत्रे चत्वारो वा पंचवा ग्रहाः स्थित्वा ते यदि यायिनः पौराश्च समेता भवन्ति तदा संवर्तो नाम योगो भवति।

२. संवर्ते यल्लक्षणमुक्तं तदेव लक्षणं तथैव स्थित्वा तत्र यदि केतुः राहुर्वा भवति तदा सः सम्मोहो नाम योगो भवति।

३. एकस्मिन् एव नक्षत्रे पौरो ग्रहः पौरेण ग्रहेण, यायी यायिना यदि समेतो भवति तदा सः समाजाख्यो योगो भवति।

४. सौरगुर्वोरनयोः संयोगे यद्यन्यः ग्रहः आगच्छेत् तदा कोशाख्यो योगः भवति।

५. एकस्मिन्नेव नक्षत्रे एको ग्रहः पश्चिमायां दिशि उदितो भूत्वा अन्यः द्वितीयः ग्रहः पूर्वस्यां दिशि यदि उदितो भवति तदा सः सन्निपाताख्यो योगो भवति।

६. एतेषां पंचसंस्थानानामभावे अर्थात् संवर्तसम्मोहसमाजसन्निपातकोशेभ्यः विपरीतः यः संयोगः भवति स एव समागमः इति ज्ञेयः। तत्र च समागमे सर्व एव ताराग्रहा अविकृततनवः निर्मलाः विस्तर्णाश्च यदि भवन्ति तर्हि तदा धन्याः शुभाश्च भवन्ति अन्यथा अशुभा इति ज्ञेयाः।

संवर्तसमागमाख्यौ द्वौ योगौ समौ अर्थात् न शुभं नाप्यशुभं च कुर्वते। यादृशाः भावाः पूर्वमभूवंस्तादृशा एव संवर्तसमागमयोरिति सम्मोहकोशौ लोकानां भयदौ भवतः। समाजाख्यो योगः सुशोभन उक्तः। तद्वर्षं शोभनं भवति इत्यर्थः। सन्निपाते लोकानां परस्परं वैरं भवति।

# १३.२१) प्रश्नावली

**१. संक्षेपेण लिखत** **५*१०=५०**

१. ग्रहयुद्धकारणं किं ?
२. युद्धानि कति विधानि ?
३. चतुष्प्रकारस्य युद्धस्य प्रत्येकं फलं किं ?
४. जितलक्षणं किम्?
५. जयिनोलक्षणं किम्?
६. चन्द्रमसः गतिलक्षणं किम्?
७. ग्रहाणां दिक्फलं कथं ज्ञायते?
८. ग्रहाणां संस्थानवशात् फलं किम् ?
९. अन्तरिक्षप्रविभागेन फलानि कानि ?
१०. नक्षत्रावस्थितानां ग्रहाणां फलानि कानि ?

**२. विस्तरेण उत्तरं लिखत** **१०*७=७०**

१. देशेषु जनेषु ग्रहाणां आधिपत्यकथनस्य प्रयोजनं किम् ? विशदयत ?
२. चतुष्प्रकारं युद्धविचारं कुरुत ?
३. ग्रहाणां यायिनागराक्रन्दसंज्ञान् तेषां फलानि च विशदयत?
४. जयिनो लक्षणफलानि विचारयत ?
५. चन्द्रस्य विशेषफलानि विचारयत ?
६. वर्षफले विशेषांशान् विचारयत ?
७. योगषट्कस्य लक्षणानि फलानि च चर्चयत ?

**३. व्याख्यात** **२०*४=८०**

१. कस्मिन् देशे केषां जनानां को ग्रहोधिपतिरिति निरूपयत ?
२. सर्वग्रहविजितानां भौमादीनां ग्रहाणां फलानि चर्चयत ?
३. भौमादीनां ग्रहाणां उत्तरगतेचन्द्रे फलानि विचारयत?
४. आदित्यादि ग्रहाणां वर्षफलानि विवेचयत ?

# संरचना

१४. चतुर्दशोऽध्यायः

१४.१) अवतरणिका

१४.२) उद्देश्यानि

१४.३) गर्भसम्भवकालविचारः

१४.४) धृतानां गर्भाणां प्रसवकालविचारः

१४.५) गर्भसम्भवलक्षणविचारः

१४.६) गर्भोपघातलक्षणविचारः

१४.७) नक्षत्रवशात् गर्भाणां प्रसवफलविचारः

१४.८) प्रवर्षणे दिवससंख्याविचारः

१४.९) पंचनिमित्तानां आधारेण प्रवर्षणविचारः

१४.१०) गर्भधारणविचारः

१४.११) प्रवर्षणविचारः

१४.१२) नक्षत्राणां वृष्टिप्रमाणविचारः

१४.१३) रोहिणीयोगविचारः

१४.१४) स्वातीयोगविचारः

१४.१५) आषाढीयोगविचारः

१४.१६) तुलायाः लक्षणविचारः

१४.१७) वातचक्रविचारः

१४.१८) भाद्रपदायोगविचारः

१४.१९) सद्योवर्षणविचारः

१४.२०) वृष्टिनिमित्तानि

१४.२१) वर्षलक्षणविचारः

१४.२२) प्रश्नावली

# १४. चतुर्दशोऽध्यायः

## १४.१) अवतरणिका

जगति प्रणिनस्सर्वे आहारं स्वीकृत्यैव जीवन्ति। कृषिस्तु वृष्टिद्वारैव क्रियते। अतः वृष्टिं विना मानवस्य जीवनमेव नास्ति। तदर्थं तद्वृष्टेः ज्ञानार्थम् आदौ प्रयत्नः करणीयः।

यथा -

**वृष्टिमूला कृषिः सर्वा वृष्टिमूलं च जीवनम्।**
**तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत् ॥**

सर्वस्मिन् देशे कदाचित् वृष्टिः भवति। कदाचित् न भवति। कुत्रचित् वृष्टिः भवति वृष्ट्यभावः च भवति देशे वृष्टिः कुत्र भवति कुत्र न भवति कीदृशी वृष्टिः भवति नाम अल्पवृष्टिर्वा अनावृष्टिर्वा अतिवृष्टिर्वा इत्यादीन् वृष्टि विषयान् ज्योतिषशास्त्रे ग्रहचारवशेन नक्षत्रवशेन तथैव अनेकैः सङ्केतैश्च ज्ञातुम् शक्यते। अयमेव विषयः बहुभिः पूर्वाचार्यैः स्वस्वग्रन्थेषु विविधरूपेण विचारिताः एवमेव वराहमिहिरेणापि तस्य बृहत्संहितायां ग्रहचाराध्यायेषु तथैव गर्भसम्भवस्वातीयोगअषाढीयोगभाद्रपदीयोग वातचक्ररोहिणीयोगासद्योवर्षलक्षणाध्यायेषु बहुप्रकारेण विपुलतया विचारितः। ते सर्वे अंशा अस्मिन् अध्याये सरलतया संक्षेपेण प्रदर्शिताः।

# १४.२) उद्देश्यानि

**पाठ्यांशस्य अस्य अध्ययनेन भवान् अधोनिर्दिष्टेषु विषयेषु नैपुण्यं प्राप्नोति।**

* गर्भसम्भवकालं ज्ञात्वा धृतानां गर्भाणां प्रसवकालनिर्णयं कर्तुं योग्यो भवति।
* गर्भसम्भवलक्षणानि गर्भोपघातलक्षणानि च आविष्कर्तुं अर्हो भवति।
* नक्षत्रवशात् गर्भाणां प्रसवफलानि ज्ञात्वा प्रवर्षणे दिवससंख्याविचारमपि कर्तुं समर्थो भवति।
* पंचनिमित्तानां आधारेण प्रवर्षणं कथं भवतीति वक्तुं पारयति।
* गर्भधारणविचारं कृत्वा प्रवर्षणे फलानि वक्तुं शक्नोति।
* नक्षत्राणां वृष्टिप्रमाणविचारं कर्तुं शक्नोति।
* रोहिणीयोगविचारं, स्वातीयोगविचारं, आपांवत्सविचारं च कर्तुं समर्थो भवति।
* स्वातीयोगस्य कालयोगविचारमपि कर्तुं प्रभवति।
* आषढीयोगविचारं कर्तुं समर्थो भवति।
* तुलायाः लक्षणानि ज्ञातुं शक्नोति।
* वातचक्रविचारं, भाद्रपदायोगविचारं च सम्यक्तया कर्तुं प्रभवति
* वृष्टिनिमित्तानि ज्ञात्वा सद्योवर्षणविचारमपि कर्तुं समर्थो भवति
* वर्षलक्षणानि ज्ञात्वा वक्तुं पारयति

### १४.३) गर्भसम्भवकालविचारः

सिद्धसेनप्रभृतयः केचिदाचार्याः कार्तीकमासस्य शुक्लपक्षावसानं अतिक्रम्य गर्भदिवसाः भवेयुः इति कथयन्ति। एतत् प्रभूतानां मुनीनां मतम् नास्ति। तस्मात् गर्गवसिष्ठपराशरऋषिपुत्रकश्यपानां मतं अत्र वराहमिहिरेण उक्तम्। तद्यथा - मार्गशीर्षमासस्य शुक्लपक्षप्रतिपदारभ्य यदा चन्द्रः पूर्वाषाढस्थो भवति तदारभ्य

### १४.४) धृतानां गर्भाणां प्रसवकालविचारः

गर्भाविर्भाव काले चन्द्रः यस्मिन् नक्षत्रे अवस्थितो भवति स गर्भः तस्मात् चन्द्रस्थित नक्षत्रवशात् पंचनवते दिनशते अतिक्रान्ते तस्मिन्नेव नक्षत्रे प्रसवमायाति। सितपक्षसम्भूतागर्भाः पुरतः पंचनवते दिनशते गते कृष्णपक्षे प्रसवमायान्ति। एवं कृष्ण पक्षोद्भवाः शुक्लपक्षे प्रसवमायान्ति। तथैव दिनसम्भवा गर्भाः रात्रौ प्रसवमायान्ति। सन्ध्या समयेजाता गर्भाः सन्ध्यासमये एव प्रसवन्ति। प्रक्सन्ध्यासम्भूता गर्भाः अपरसन्ध्यायां अपरसन्ध्यासम्भूता गर्भाः प्राक्सन्ध्यायां प्रसवमायान्ति। मार्गशीर्षमासस्य शुक्लपक्षजाता गर्भास्वल्पवर्षदा भवन्ति तथा पुष्यमासस्य सुक्लपक्षजाता गर्भा अपि स्वल्पवर्षदा भवन्ति। पौषकृष्णपक्षसम्भूतो गर्भः श्रावणशुक्लपक्षे प्रसूयते। एवं माघशुक्लपक्षे सम्भूता गर्भाः श्रवणस्य कृष्णपक्षे प्रसूतिमायान्ति। माघस्य कृष्णपक्षजाताः भाद्रपदशुक्लपक्षे प्रसूयन्ते। फाल्गुणशुक्लपक्षसम्भूताः भाद्रपदस्यकृष्णपक्षे प्रसूयन्ते। फाल्गुणस्य कृष्णपक्षोद्भवा गर्भा आश्वयुजशुक्लपक्षे प्रसवमायान्ति। चैत्रशुक्लपक्षसम्भूता गर्भा अश्वयुजस्य कृष्णपक्षे वर्षदा भवन्ति। चैत्रकृष्णपक्षोद्भवा गर्भाः कार्तिकशुक्लपक्षे अभिवर्षन्ति।

गर्भकाले ये जीमूताः पूर्वस्यां दिशि समुद्भूताः ते प्रसवकाले पश्चिमायां दिशि सम्भवन्ति। गर्भकाले ये पश्चिमायां दिशि सम्भूताः ते प्रवर्षणे पूर्वस्यां दिशि सम्भवन्ति। अन्यास्वपि दिक्षु अनेन प्रकारेण विपर्ययो भवति। यद्यथा - दक्षिणा उत्तरस्याम् उत्तरा दक्षिणस्याम्। आग्नेयाः वायव्याम् वायव्या आग्नेय्याम्। ऐशानी सम्भूताः नैऋत्यां नैऋतीसम्भूता ऐशान्यमिति। अनलस्य च एवमेव विपर्ययो वाच्यः। अर्थात् यथा मेघानां दिग्व्यत्यय उक्तः तथा वायोपरि वाच्यः। गर्भकाले पूर्वोद्भूतः वायुः प्रवर्षाणकाले पश्चिमायां दिशि

भवति। एवं अन्यास्वपि दिक्षु विपरीतो भवति।

### १४.५) गर्भसम्भवलक्षणविचारः

गर्भग्रहणकाले ईदृशानि लक्षणानि शुभफलानि भवन्ति। तद्यथा - उत्तर - ईशानपूर्वदिग्भ्यः वायुः आह्लादकः मृदुः भवति। तथा आकाशः निर्मलः भवति। अर्कचन्द्रौ स्निग्धेन शुक्लेन घनेन परिवृतौ भवतः। तथैव आकाशे विस्तीर्णाः बहुलाः अरूक्षा मेघाः भवन्ति। तथा सूच्याकारे क्षुराकारे मेघः लोहितवर्णमेघैस्संयुक्तो भवति। तथा आकाशः वायसाण्डवर्णसदृशकान्त्या बर्हिक्ठवर्णसदृशकान्त्या वा भवति। तथा पूर्वापरा वा सन्ध्या इन्द्रधनुषा मधुरेण मेघशब्देन तडिता प्रतिसूर्येण युक्त भूत्वा शुभा भवति। तथा विहङ्गानां अरण्यपशूनां च समूहाः उत्तर ईशान पूर्वदिक्षु स्थिता भूत्वा मधुरस्वनाः अनर्काभिमुखाश्च भवन्ति। तथा ग्रहाः प्रदक्षिणचराः निर्मलरश्मयः निरूत्पाता भवन्ति। तथा वृक्षाः निरूपसृष्टाङ्कुरा भवन्ति। नराः पशवश्च प्रमुदिता भवन्ति।

अनेन प्रकारेण ये गुणा उक्ताः ते सर्वेषां गर्भाणां पुष्टिकरा भवन्ति। अर्थात् एते मार्गशिरसितपक्षप्रतिपत्प्रभृति वैशाखान्तं यावल्लक्षणीयाः। अस्मिन् गर्भलक्षणे योन्यो विशेषो भवति स आत्मीयऋतुस्वभावेन उत्पादितो भवति। मार्गशीर्षसहिते पौषे मासे सन्ध्ययो रक्तत्वं भवति। मेघाः परिवेषयुक्ता भवन्ति। तथा मार्गशीर्षे मासि नातिशीतम् पौषे नातिहिमपात शुभः। माघे मासि चण्डवायुः तथा अर्कचन्द्रौ तुषारकलुषद्युती अतिशीतं, आदित्यस्य अस्तोदयौ मेघावर्तनं एते शुभाः। फल्गुणमासे परुषः वायुः मेघानां उद्गमाः, स्निग्धौ सूर्यचन्द्रौ कपिलवर्णः आदित्यः एते शुभाः चैत्रमासे गर्भाः वायुना मेघैर्वर्षणे युक्ताः शुभाः। वैशाखमासे मेघैः वायुना जलेन तडिता गर्जितेन च युक्ता गर्भाः हिताय भवन्ति।

विशेषलक्षणविचारः - ये मेघाः मुक्ताफलानां रजितस्य सदृशा अतिशुक्ला भवन्ति। अथवा तमालवृक्षस्य नीलोत्पलस्य अंजनस्य च सदृशवर्णा अतिकृष्णाः जलचराकृतयो भवन्ति। ते घनाः बहुवर्षदा भवन्ति।

तथैव ये मेघाः प्रचण्डैरर्करश्मिभिः दग्धदेहाः स्वल्पपवनाः गर्भकाले भवन्ति। ते प्रसवकाले (पंचनवते दिनशते काले ) क्रुद्धा इव अतिवृष्टिदा भवन्ति।

### १४.६) गर्भोपघातलक्षणविचारः

उल्कापातः विद्युत् पांशुवर्षणम् दिग्दाह भूकम्पः गन्धर्वनगरम् तामसकीलकाः ग्रहयुद्धम् निर्घातशब्दः रक्तमांसवसाधुततैलादिवर्षणम् परिघा (भास्करोदयेऽस्ते वा तिर्यग्तया या मेघरेखा भवति सा ) सुरचापः चन्द्रार्कग्रहणम् एवं प्रकारैरुत्पातैः दिव्यान्तरिक्षभौमैर्विविधैश्च गर्भः नष्टो भवति। उक्तानि इमानि चिह्नानि गर्भोपघातानि।

### १४.७) नक्षत्रवशात् गर्भाणां प्रसवफलविचारः

पूर्वाभाद्र उत्तराभाद्र उत्तराषाढा पूर्वाषाढा रोहिणी एतेषुपंचसु नक्षत्रेषु सर्वेषु ऋतुष्वपि सम्भूतोगर्भः प्रवर्षणे प्रभूतवर्षदो भवति।

शतभिषक् आश्लेषा आर्द्रा स्वाती मघा एतेषां मध्ये एकतमे नक्षत्रे सम्भूतो गर्भः शुभफलो भवति। गर्भाणां पुष्टि निमित्तानि यानि पूर्वं उक्तानि तैर्निमित्तै बहूनि दिनानि पुष्टिं याति। एष्वेव नक्षत्रेषु विवृद्धोगर्भः दिव्यान्तरिक्षभौमादित्रिविधैरन्यै-र्गर्भोपघातोत्पातैर्विनाशं अपि याति।

### १४.८) प्रवर्षणे दिवससंख्याविचारः

मार्गशीर्षादिमासेषु प्राक्पठितेषु शतभिषगाश्लेषार्द्रास्वातिमघानक्षत्रेषु अन्यतमे नक्षत्रे यदा गर्भो विवृद्धो भवति तदा पंचनवते दिनशते अतिक्रान्ते मार्गशीर्षमासे सति अष्टौ दिवसान् प्रवर्षति एवं पौषेमासि सति षट्, माघे सति षोडश, फल्गुने सति चतुर्विंशति, चैत्रे सति विंशतिः, वैशाखे सति दिवसत्रयं प्रवर्षति। एवं शतभिषगादिभ्य पंचभ्योमध्यादेकतमेर्क्षे वृष्टि प्रमाणं भवति।

### १४.९) पंचनिमित्तानां आधारेण प्रवर्षणविचारः

वायुः जलम् तडित् मेघशब्दः मेघाः एतैः पंचभिर्यो गर्भः युक्तो भवति सः बहुलजलप्रदो भवति। यतः स गर्भः पंचरूपाभ्युपेतः। एवं विधो गर्भो गर्भकाले यद्यतितोयं विसृजति तदा प्रसवकालं प्राप्य पंचनवतेदिनशते अतीते जलबिन्दून् ददाति।

पंचभिर्निमित्तैः संयुक्तो गर्भ आसमन्तात् योजनशतं वर्षति त्रिभिर्निमित्तैः संयुक्तो गर्भः सार्द्धानि द्वादशयोजनानि वर्षति। पंचानां निमित्तानामन्यतमरूपेणैकेन यो गर्भः संयुक्तो भवति सः समन्तात्पंचयोजनानि वर्षति।

पंचनिमित्तैः ंयुक्तो गर्भः पंचनवते दिनशते अतीते द्रोणः प्रवर्षति वायुना संयुक्तो गर्भः त्रीण्याढकानि विद्युता संयुक्तो गर्भः षडाढकानि मेघैस्संयुक्तो गर्भः नवाढकानि गर्जितेन संयुक्तो गर्भः द्वादशाढकानि प्रसवकाले (पंचनवतेदिनशते अतीते) वर्षन्ति।

गर्भकाले निमित्तरहिता अतिवृष्टिः गर्भविनाशाय भवति। पलशतद्वयं द्रोणो भवति तस्याष्टांशः पलानां पंचविंशतिः तदधिके वृष्टे गर्भः परिस्त्रुतो भवति। न जलप्रद इत्यर्थः।

### १४.१०) गर्भधारणविचारः

ज्येष्ठशुक्लपक्षे अष्टम्याद्याश्चत्वारो दिवसा वायुधारणदिवसाः भवन्ति। तेषु दिवसेषु उत्तर - ईशान - पूर्वदिग्भ्यः वायुः मृदुः भवति। तथा आकाशः स्निग्धैर्मेघैः स्थगितं भवति। एते सङ्केता शुभप्रदा भवन्ति गर्भधारणे।

तस्मिन्नेव ज्यैष्ठशुक्लपक्षे स्वातिविशाखानुराधाज्येष्ठाख्ये वृष्टे क्रमात् श्रावणभाद्रपदाश्वयुजकार्तिकाख्याः मासाः परिस्त्रुता भवेयुः। न जलदा भवन्ति इत्यर्थः।

क्रम एवं भवति - स्वातौ वृष्टायां श्रावणेप्ववृष्टिः, विशाखायां भाद्रपदे अनुराधायां आश्वयुजे ज्येष्ठायां कार्तिक इति।

ताः धारणाः चतुर्ष्वपि दिवसेषु एकरूपाः यदि भवेयुः तर्हि शुभप्रदा भवन्ति। यदि एकरूपाः न भवन्ति अर्थात् यदि विशेषाः भवन्ति तर्हि न शुभप्रदा भवन्ति। तथैव चौरभीतिप्रदाश्च भवन्ति इति कथिताः।

### १४.११) प्रवर्षणविचारः

ज्येष्ठमासे पौर्णम्या अनन्तरं यदा पूर्वाषाढा नक्षत्रं भवति तदा तत्पूर्वाषाढानक्षत्रतः सर्वेषु नक्षत्रेषु प्रवर्षितेन जलस्य शुभाशुभं परिमाणं पण्डितैर्वक्तव्यम्।

यथा -

**ज्यैष्ठ्यां समतीतायां पूर्वाषाढादिसम्प्रवृष्टेन।**

**शुभमशुभं वा वाच्यं परिमाणं चाम्भसस्तज्ज्ञैः।।**

हस्तविस्तीर्णं सपरिवर्तुलं कुण्डकं कृत्वा जलप्रमाणकथनं कार्यम्। पतितं जलं पंचाशत्पलमाढकमानेन प्रमाणेन मिनुयात्। यदि तज्जल पलशतद्वयं भवति तदा द्रोणो वृष्ट इति ज्ञेयः ।यतश्चतुर्भिराढकैर्द्रोणो भवति। येन वृष्टेन धरित्री विगत धूली जाता अथवा तृणानामग्रेषु जलकणा दृश्यन्ते तेनवृष्टेन आदौ जलस्य प्रमाणं वाच्यम्। येन नक्षत्रेण वर्षणं भवति तेनैव जलप्रमाणं लोके वक्तव्यम्। नापरेण नक्षत्रेण। अन्येषु नक्षत्रेषु धारणा भवति चेदपि प्रसवकाले वृष्टिर्नस्यादित्यतो गर्भेषु जलस्य परिमाणं प्रसवकाले वाच्यम्।

देवलादय प्रवर्षणकाले योजनदशके वृष्टे वर्षाकाले अम्बुकथनं नास्मादूनो भवति इति वदन्ति। गर्गवसिष्ठपराशराः प्रवर्षणकाले योजन द्वादशके वृष्टे वर्षाकाले नास्मादून इति अम्बुकथनं कार्यमिति वदति।

पूर्वाषाढादिषु येषु नक्षत्रेषु प्रवर्षणकाले अभिवृष्टिं भूयः तेष्वेव नक्षत्रेषु प्रायो बाहुल्येन वर्षति। प्रसवकाले पूर्वाषाढादिषु सप्तविंशेष्वपि नक्षत्रेषु यदि न प्रवृष्टं तदा वर्षाकाले अनावृष्टिर्भवति इति ज्ञेयम्।

**१४.१२) नक्षत्राणां वृष्टिप्रमाणविचारः**

हस्तः पूर्वाषाढा मृगशिरः चित्रा रेवती धनिष्ठा एतेष्वेकतमे प्रवर्षणकाले यदि वर्षति तदा प्रसवकाले षोडशद्रोणा वर्षन्ति। एवं शतभिषक् ज्येष्ठा स्वाति एतेषु नक्षत्रेषु चत्वारो द्रोणा वर्षन्ति। कृत्तिकासु दशद्रोणा वर्षन्ति। श्रवण मघा अनुराधा भरणी मूलम् एतेषु चतुर्दशद्रोणा वर्षन्ति। पूर्वाफल्गुन्यां पंचविंशतिद्रोणा वर्षन्ति। पुनर्वसौ विंशतिद्रोणा वर्षन्ति। विशाखा उत्तरषाढा एतयोर्विंशति द्रोणाः आश्लेषायां त्रयोदशद्रोणाः उत्तराभाद्र उत्तराफल्गुनी रोहिणी एतेषु पंचविंशति द्रोणाः पूर्वाभाद्रायां पुष्ये च पंचदशद्रोणाः अश्विन्यां द्वादशद्रोणाः अर्द्रायां अष्टादशद्रोणाः वर्षन्ति इति उक्ताः। एते प्रवर्षणकाले उपद्रवरहितेषु नक्षत्रेषु वाच्याः।

### १४.१३) रोहिणीयोगविचारः

आषाढमासस्य कृष्णपक्षे चन्द्रेणसंयुक्तं रोहिणी नक्षत्रं दृष्ट्वा दैवज्ञेन शास्त्रोपदेशात् जगतः शुभाशुभं वक्तव्यम्। रोहिणीयोगोऽनागतो भावि एव वक्तव्योत्र सधिष्ण्ययोगो भवति पंचसिद्धान्तिकायां वराहमिहिरेण कथितः। तथैव चन्द्रस्य बिम्बपरिमाणेन कान्त्या सितादिकेन मार्गेण पूर्वाद्यासु अष्टासु दिक्षु संस्थित्या तथैव तत्कालजातै उल्कापातादिभि वातैश्च शुभाशुभफलं वक्तव्यम्।

नगरात् उत्तरस्यां दिशि एकस्मिन् स्थले अग्निहवनपरः ब्राह्मणः दिनत्रयं स्थित्वा तस्मिन् स्थले नक्षत्रसमूहेन सहितेन सहितान् आदित्यीन् ग्रहान् सम्यगालिखेत् । तानखिलान् सधूपपुष्पैरुपाहारैः पूजयेत्।

तथा मिणिभिर्जलैरौषधिभिस्सह ये कलशाः वर्तन्ते तैः तथा आसमन्तात् अलङ्कृतचतुर्भिः दिग्भिः वृक्षपल्लवानां आच्छादनैः चन्दनादिभिःरर्चितैः अकालमलै दर्भैराच्छदितं स्थाण्डिलं द्विज अधिवसेत्। ततः सुवर्णेन दर्भैरन्वितततोयैः सर्वाणि बीजानि महाव्रतनाम्ना मन्त्रेण अभिमन्त्र्य कुम्भे विनिक्षिप्य मज्जनीयानि। तथा मरुद्वरुण सोममन्त्रैः अग्निहोमः कार्यः। सूक्ष्मतन्तुकृतां कृष्णवर्णां चतुर्हस्तसम्मितां पताकां द्वादशहस्तोच्छिते काष्ठे निबध्नीयात् तया पताकया आदौ दिक्साधनेकृते रोहिणी योगगते चन्द्रे वायुः कस्यां दिशि वहति इति ग्रहीतव्यः।

एकस्मिन्नहोरात्रे अष्टमः भागः एकः प्रहरो भवति। एवं वर्षसमयज्ञानार्थं रोहिणीयोगे प्रहरैरर्द्धमासा पक्षाः विकल्पनीयाः। यस्मिन्नहोरात्रे रोहिण्या सहचन्द्रमा युज्यते तस्मिन् सूर्योदयात् प्रभृति प्रथमं प्रहरं यावत् शोभनः वातः वहति चेत् तदा श्रवणस्य प्रथमपक्षे देवो वर्षति। अशुभेन वातेन अवृष्टिः वक्यव्यः। एवं द्वितीये प्रहरे यदि शोभनो वातो वहति तदा श्रवणस्य द्वितीयपक्षे देवो वर्षति। तृतीयप्रहरे भाद्रपदस्य प्रथमपक्षे चतुर्थप्रहरे भाद्रपस्य द्वितीयपक्षे वर्षति। तथा रात्रौ प्रथमप्रहरे शोभनवाते आश्वयुजः प्रथमपक्षे वर्षति द्वितीयप्रहरे द्वितीयपक्षे तृतीयप्रहरे कार्तिकप्रथमपक्षे चतुर्थ प्रहरे द्वितीय पक्षे वर्षति। शुभेवाते सुवृष्टिः अशुभेवाते अनुवृष्टिः भवति। एवं प्रहरेण पक्षं योज्यम्। प्रहरार्धेन सप्तदिनानि प्रहरचतुर्थभागेन चत्वारिदिनानि स्वीकर्तव्यानि। प्रहरस्य

त्रिंशत्तमो भागो दिवस इति। अतः प्रहरस्य भागैः दिवसा विकल्पनीयाः यस्मिन् भागे शोभनो वातो वहति तस्मिन् दिवसे सुवृष्टिर्भवति।

रोहिण्या सह शशिनः योगे यानि बीजानि कुम्भे प्राक् स्थापितानि तेषां यान्यङ्कुरितानि तान्येवास्मिन् वर्षे भवन्ति। अर्थात् कुम्भे स्थितानां यः अंश अङ्कुरित तद्भागतुल्यस्य एव वृद्धिर्भवति।

**दिग्भागेन मेघफलविचारः**

पूर्वस्यां दिशि सम्भूतैःसस्यानां सम्पद् भवति। आग्नेयां संभूतैः मेघैः वह्निकोपो भवति। दक्षिणदिशि सम्भूतैः सस्यं क्षीयते। नैर्ऋति दिगुत्थैः मेघैः अर्द्धं क्षीयते पश्चिमायांदिशिजातैः मेघैः शोभनावृष्टिर्भवति। वायव्योत्थै र्मेघैः क्वचित् क्वचित् वातयुक्ता वृष्टिर्भवति। उत्तरदिशि सम्भूतै परिपूर्णावृष्टिर्भवति। ऐशानी दिशि उत्पन्नैः श्रेष्ठं सस्यं भवति। अनेन प्रकारेण यथा मेघाः शुभाशुभफलप्रदा उक्तास्तथैव वायु अपि मेघैः यानि फलानि उक्तानि तानि एव ददाति।

तथैव उल्कानिपाताः प्रघाताः अशनिपाताः दिशांदाहः निर्घातः भूमिकम्पः मृगाणां पक्षीणां नादाः च एते सर्वे येन प्रकारेण पूर्वादिदिक्षु मेघानां फलानि उक्तानि तेनैव प्रकारेण फलानि ददाति।

**चन्द्रसंस्थाने रोहिण्याः फलविचारः**

येन प्रकारेण चन्द्रः दूरगः निकटगः दक्षिणस्यां दिशि स्थितः यदि रोहिणीं संयोगं करोति तदा जगतः दुर्भिक्षं जनमारकादिकं विनिर्दिशेत्। रोहिण्याः दक्षिणेन स्पर्शनं कृत्वा चन्द्रः यदुत्तरेण गच्छति तदा प्रभूतोपद्रवाः शोभनवृष्टिश्च भवति। अथवा रोहिणी योगमसंस्पृशन् उत्तरेण गतः तदा सुवृष्टिं करोति । श्रेयश्च भवति।

**रोहिण्याः शकटमध्यगते चन्द्रे फलविचारः**

रोहिण्याः शकटमध्यसंस्थिते चन्द्रमपि शिशुयाचिताशनाः जनाः अशरणीकृताः भवन्ति। तथा आदित्येन पिठरे तप्तं पानीयं पिबन्ति अनेन जलाभाव उक्तः। षट्तारकत्वात् रोहिण्याः शकटः समूहः।

**रोहिण्याः पश्चिमदिक्स्थे चन्द्रमसि फलविचारः**

प्रथमं अभ्युद्गतं चन्द्रं तस्य पृष्ठतः रोहिणी समुदेति तदा लोके शुभमेव भवति कामार्ताः स्त्रियः कामुकानां वशवर्तिन्यो भवन्ति।

**रोहिण्याः पूर्वस्यां दिशि स्थिते चन्द्रे फलविचारः**

चन्द्रः यदि रोहिण्या पृष्टतः उदेति तदा वल्लभांस्त्रियं कामुको यथा अनुगच्छति तथा तस्मिन् वर्षे स्त्रीणांपुरुषा कामशरपीडिताः सन्तो वशगा भवन्ति।

**रोहिण्याः शेषासु दिक्षु स्थितेचन्द्रे फलविचारः**

रोहिण्याः आग्नेयां दिशि यदि चन्द्रमा भवेत् तदा तस्मिन् वर्षे अतीव उपद्रवो भवति। तथा नैऋत्यां दिशि स्थिते तर्हि सस्यानि ईतिभिः नाशनं यान्ति। वायव्यां दिशि तर्हि सस्याधान्यदेश्चयो भवति। तथा ऐशान्यां दिशि स्थिते तर्हि सस्यार्घवृष्ट्यादय सुप्रभूतागुणाः भवन्ति।

**१४.१४) स्वातीयोगविचारः**

रोहिणीसहित चन्द्रे यद्योगफलं प्रागुक्तं तदेव स्वातीसहिते चन्द्रे निःशेषं विचारणीयम्। किन्तु आषाढशुक्लपक्षे एतद्योगद्वयं विचार्यम्। मेघानां वायोश्च उत्पातानां च यत्फलं रोहिणी योगे उक्तम् तत्सर्वं स्वात्याषाढास्थे चन्द्रमसि ज्ञातव्यम्। तदा दूरगोऽथवा निकटको शशी इत्यादि तथैव समागमफलं यदुक्तं तत्सर्वमत्र वेदितव्यम्। तदपेक्ष्य अत्र विशेषो वर्तते। तद्यथा -

स्वतीयोगे आद्यरात्रित्रिभागे वृष्टिः भवति चेत् तदा सर्वाणि सस्यानि वृद्धिमुपयान्ति। द्वितीये रात्रित्रिभागे वृष्टिः भवति चेत् तदा तिलमुद्गमाषाः वृद्धिमुपयान्ति. तृतीये त्रिभागे वृष्टिः भवति चेत् तदा ग्रीष्मधान्यानि भवन्ति। शरसस्यानि न भवन्ति। तथा दिवसे प्रथमत्रिभागे वृष्टिः भवति चेत् तदा तस्मिन् वर्षे शोभनवृष्टिः भवति। द्वितीये दिनत्रिभागे वृष्टिः भवति चेत् तदा सुवृष्टिर्भवति किन्तु कीटैः भुजङ्गैश्च सहिता वृष्टिर्भवति। तृतीये दिनत्रिभागे वृष्टिर्भवति चेत् तदा मध्यमा वृष्टिर्भवति। अहोरात्रं यावत् वृष्टिर्भवति चेत् छिद्ररहिता वृष्टिर्भवति। अर्थात् सर्वत्र कालोचितं

वर्षति इत्यर्थः।

**आपांवत्सविचारः**

चित्रायाः समं कृत्वोत्तरेण या तारा स्थिता सा आपांवत्स इति कीर्त्यते। तस्यां आपांवत्सस्य निकटस्थे चन्द्रे स्वातीयोग भवति अयं योगः श्रयस्करो भवति यथा -

**समुत्तरेण तरा चित्रायाः कीर्त्यते ह्यपांवत्सः।**

**तस्यासन्ने चन्द्रे स्वातेर्योगः शिवो भवति।।**

**स्वातीयोगस्य कालयोगविचारः**

माघमासस्य कृष्णपक्षे सप्तम्यां तिथौ स्वातीनक्षत्रसंयुक्ते चन्द्रे हिम यदि पतति मारुतः यदि परुषः वहति अथवा जलेन सहितोमेघोऽनवरतं यदि गर्जति अथवा आकाशे विद्युन्मालाभिराकुलं तथा नष्टचन्द्रार्कतारं यदि भवति तदा एषा प्रावृङ् प्रहृष्टलोका सर्वैः सस्यैः उपेता भवति इति ज्ञातव्यम्। यथा सप्तम्यांस्वातियोगे हिमं इत्यादिकं यदि पतति इत्युक्तं तथैव फाल्गुनचैत्र वैशाखमासेषु कृष्णपक्षेऽपि स्वातियोगं विजानयित्। विशेषतः आषाढस्य यः स्वातियोग उक्तः तं विचारयेत्।

**१४.१५) आषाढीयोगविचारः**

रोहिणीयोगफलं यदुक्तं तत्सर्वं उत्तराषाढायुक्ते चन्द्रमसि विज्ञातव्यम्। तथा आषाढपौर्णमास्यां विचारयेत्। तस्यामाषढायां सर्वाणि बीजानि तुलया परिच्छिन्नानि कृत्वा महाव्रतमन्त्रेणाभिमन्त्र्य रात्रिमेकामुषित्वा तत अन्यस्मिन् अहनि यद्बीजं तुलितं आधिक्यं गच्छति तस्मिन् वर्षे तस्य धान्यादेः वृद्धिर्भवति यदूनं भवति तन्नोत्पद्यते। अस्मिन् तुलाकर्मणि तुलाभिमन्त्रणाय मन्त्रो भवति यथा -

**स्तोतव्या मन्त्रयोगेन सत्यादेवी सरस्वती**

**दर्शयिष्यसि यत्सत्यं सत्ये सत्यव्रताह्यसि**

**येन सत्ये न चन्द्रर्कौग्रहा ज्योतिर्गणास्तथा**

**उत्तिष्ठन्तीह पूर्वेण पश्चादस्तं व्रजन्ति च**

**यत्सत्यं सर्ववेदेषुयत्सत्यं ब्रह्मवादिषु**

**यत्सत्यं त्रिषु लोकेषु तत्सत्यमिहदृश्यताम्।**

**ब्रह्मणो दुहितासि त्वमादित्येति प्रकीर्तिता**

**काश्यपी गोत्रतश्चैव नामतो विश्रुता तुला।**

**१४.१६) तुलायाः लक्षणविचारः**

अस्याः तुलायाः शिक्यकवस्त्रं क्षौमं कार्यम्। यत्र स्थितानि द्रव्याणि परिच्छिद्यन्ते तच्छिक्यवस्त्रं इत्युच्यते। एतत् चतुर्भिः सूत्रै संलग्नं कार्यम्। तच्च शिक्यवस्त्रं षडङ्गुल प्रमाणं भवति। यैस्सूत्रैस्तद्बध्यते तेषां प्रमाणं दशाङ्गुलानि भवन्ति। उभयशिक्यमध्ये षडङ्गुलं कक्ष्यासूत्रं कार्यम्। तुलायां एव द्रव्याणि परिच्छेद्यानि। दक्षिणशिकये सुवर्णं स्थापनीयम्। शेषाणि द्रव्याणि तथा पानीयानि उत्तरशिकये सन्निवेशानि यदा सुवर्णं परिच्छिद्यते तदा दक्षिणेशिक्ये अन्यानि द्रव्याणि विनिवेशयेत्। तदा जलैः कूपसम्भवैर्वृद्धिमद्भिर्हीना वृष्टिर्भवति। सैन्धवैर्वृद्धिमद्भिर्मध्यमा वृष्टिर्भवति। तथा सरः सम्भवैर्वृद्धिमद्भिः जलैरुत्तमा वृष्टिर्भवति। सर्वेषां वृद्धौ महती वृष्टिर्भवति। सर्वेषां हानाववृष्टिरिति ज्ञेयः। हस्तिदन्तैः गोहयाद्याश्च परिच्छेद्याः सुवर्णेन राजानः परिच्छेद्याः। मधूच्छिष्टेन ब्राह्मणाद्याश्चत्वारो वर्णा परिच्छेद्याः तथैव मध्यदेशप्रभृतयः देशाः वर्षाणि मासाः पूर्वाद्याः दिशाश्च शुभाशुभज्ञानार्थं शिक्थकेनैव परिच्छेद्याः। यानि धान्यादीनि शेषाणि द्रव्याणि उक्तानि तानि स्वयमेव परिच्छेद्यानि।

**१४.१७) वातचक्रविचारः**

अष्टासुदिक्षु वातफल विचाररूपेण आषाढीयोगाध्याये वराहमिहिरेण वातचक्रविचारः संक्षिप्तरूपेण कृतः पुनः विस्तरेण यदि विचार्यते तर्हि पौनरुक्त्यं भवति तथापि शिष्यहितार्थं सरसत्वात् विस्तरेण वातचक्रविचारः कृतः। अषाढीयोगाध्यायस्यान्ते -

**निष्पत्तिरग्निकोपो वृष्टिर्मन्दाथमध्यमा श्रेष्ठा ।**

**बहुजलपवना पुष्टा शुभा च पूर्वादिभिः पवनैः**

अनया कारिकया संक्षिप्तेन उक्तम्। तदेव इदानीं विस्तरेण विचार्यते।

**ऐशान्यां दिशि स्थितस्य वातस्य लक्षणफलविचारः** - आषाढमासस्य पौर्णमास्यां अर्कस्य अस्तगमने यदि ऐशान्यां दिशि वातो वहति तर्हि तदा सस्यानां सम्पत्तिरुत्तमा भवति।

**पूर्वस्यां दिशि वातस्य लक्षणफलविचारः** - तस्यामेवाषाढपौर्णमास्यां पूर्वसमुद्रवीचीनां शिखराणां चालनेन भ्रमितः तथा चन्द्रार्कयोरश्मीः स्कन्धावलम्बिनः केशा इव कलपेन मिश्रितो वायुः पूर्वस्यां दिशि यस्मिन् काले आकाशत वहति तदा सर्वत्र स्थितानां नीलवर्णमेघानां समूहैः तथा शारधैः सस्यै संवर्धिता तथा वसन्त सम्भवैः सस्यैर्भूषिततला मही सर्वत्र शोभते।

**आग्नेय्यां वातस्य लक्षणफलविचारः** - यस्मिन् काले आकाशे वायुः आग्नेयां दिशि अविहतगत्या वहति तदा भगवति सूर्ये अस्तमिते सति तदा तस्मिन् वर्षे सर्वकालमुज्ज्वलिताज्वलनशिखरालिङ्गिततला भवति वसुधा तथा भूता वसुधा स्वगात्रोष्मोच्छ्वसै भस्मसमूहं उद्गिरति । एवं वायुः आषाढीयोगे भवति।

**दक्षिणस्यां वातस्य लक्षणफलविचारः** - आषाढयोगे यस्मिन् काले दक्षिणवायुः यथा तालीवृक्षाः तेषां पर्णानि विस्तारवृक्षाः कम्पिताः भवन्ति वायोः वेगात् शाखामृगाश्च चलिताः भूत्वा नर्तयन्निव भवन्ति तथा वहति। तदा पौर्णमस्यां सूर्यास्तमये समुत्थिते यदि अतिरूक्षः ध्वनिः प्रभवति तस्मिन् काले मेघाः गजवत्तालाङ्कुशैर्घट्टिता भूत्वा कदर्या इव स्वल्पस्य जलस्य बिन्दूनेव मुञ्चन्ति।

**नैऋत्यां वातस्य लक्षणफलविचारः** - यदा आषाढपौर्णमास्यां सूर्यस्य अस्तमयकाले नैऋतो वायुः सूक्ष्मैलालवलीलवङ्गनिचयान् सागरे चालयन् सन्ततः वहति तस्मिन् वर्षे क्षुत्तृष्णाभ्यां व्यापामानुषास्थिशकलप्रस्तारभारच्छदा मत्ता प्रेतवधूरिवोग्रचपला भूमिः लक्ष्यते।

**पश्चिमायां वातस्य लक्षणफलविचारः** - यदा सूर्यास्तमयकाले पश्चिमायां दिशि धूलिसमुत्क्षेपणैः प्रविचलसटाटोपचपलः प्रचण्डानिलो वहति तस्मिन् वर्षे क्षितिः बहुभिः सस्यैः संयुक्ता भवति तथा प्रधानाः ये समूहाः सन्ति तैरारचितसंग्रामैर्युक्त भवति तथा प्रदेशप्रदेशेषु अविरतं वसमांसरुधिरैः संयुक्ता भवति। अर्थात् बहवः जना संग्रामे वध्यन्ते।

**वायव्यां वातस्य लक्षणफलविचारः** - आषाढमासस्य पौर्णमास्यां सूर्यस्य अस्तमय समये यदि पन्नगार्द्धानुकारी यवनघनवपुः वृद्धवेगः वायुः वायव्यदिशि वहति चेत् तस्मिन् वर्षे भूमिः वारिधाराभिः मुदितामुक्तमण्डूककण्ठा भवति। तथा सस्योद्भासैकचिह्ना भवति। तथा सुखानां बहुलतया भाग्यचमू इव भवति।

**उत्तरस्यां वातस्य लक्षणफलविचारः** - आषाढपौर्णिमायां सूर्यास्तमयकाले उत्तरश्यां दिशि आमोदिकदम्बगन्धसुरभिर्वायुर्यदि वहति। तस्मिन् वर्षे विद्युद्भ्रान्तिसमस्तकान्तिकलनामत्ताः तथा अतिवृष्टिमुचः मेघाः नष्टचन्द्रकिरणां भूमिं अम्बुभिः पूरयन्ति।

### १४.१८) भाद्रपदायोगविचारः

अतीतायां आषाढपौर्णमास्यां कृष्णचतुर्थ्यां तिथौ पूर्वाभाद्रपदनक्षत्रे यदि पर्जन्यो वर्षति तदा वर्षाः शुभप्रदाः भवन्ति।

यस्यां भाद्रपदायां आकाशं नष्टचन्द्रार्ककिरणं भवति तथा नष्टतारं भवति तथा यस्यां भाद्रपदायां देवो न वर्षति न तां भाद्रपदमिति मन्ये।

यथा -

**वृत्तायामाषाढ्यां कृष्णचतुर्थ्यामजैकपादर्क्षे।**
**यदि वर्षति पर्जन्यः प्रवृट् शस्ता न चेन्न तदा॥**

### १४.१९) सद्योवर्षणविचारः

वर्षप्रश्ने कृष्णपक्षे चन्द्रः कर्कटमकरमीनादिजलाश्रयराशी अश्रित्य यदि पृच्छलग्नं यातो भवति स एको योगो भवति। शुक्लपक्षे प्रश्नकाले चन्द्रः यदि केन्द्रगो भवति सः द्वितीयः योगः भवति। एतयोः द्वयोर्योगयोश्चन्द्रः सौम्यग्रहैर्यदि दृष्टश्चेत् तदा प्रभूतं जलं सृजति। पापग्रहैर्दृष्टश्चेत् अल्पं जलं सृजति। मिश्रदृष्टे मध्यमं जलं सृजति प्रावृट् काले तस्मिन्नेवाहनि शुक्रोऽपि यदि चन्द्रवत् योगे तिष्ठति तदा एवमेव वृष्टिफलं ददाति।

तथैव वर्षप्रश्नपृच्छकः आर्द्रं द्रव्यं यत्किञ्चित् वस्तुविशेषं यदि स्पृशति अथवा जलं वा तत्संज्ञकं वा यदि स्पृशति अथवा प्रष्टा जलसमीपवर्ती यदि भवति अथवा जलकार्ये गन्तुं प्रवृत्तो यदि भवति तदा पृच्छकाय निश्चयेन शीघ्रमेव सलिलं पतति इति वक्तव्यम्। अथाव प्रश्नसमये यत्र सलिलमिति शब्दः श्रूयते तत्र जलं निश्चयेनास्तीति वक्तव्यम्।

यदा उदयपर्वतमूर्ध्नि स्थितः आदित्य अतिकान्त्या दुर्निरीक्ष्यो द्रुतकनकनिकाशः स्निग्धवैढूर्यकान्तिः भवति तस्मिन्नेव दिने तोयं कुरुते। यदि मध्याह्नस्थः प्रतपति तदापि तस्मिन्नेवाहनि अम्भुकुरुते।

स्वादुरहितं जलम् गोनयनसदृशं आकासं विमलाः दिशाः लवणस्य विकारः वायसाण्डकान्तितुल्यं आकाशं वायोर्निरोधः स्थलगामिनः मत्स्याः प्लवन्ते मण्डूकानां पुनः पुनः शब्दः इमे सर्वे जलागमहेतवः।

मार्जारा अत्यर्थं भूमिं नखैः विलिखन्तः यदि सन्ति तर्हि तथा कांस्यानां वा मलसमूहः विस्रगन्धेन सह यदि वर्तन्ते तर्हि तथा पथि शिशुपिचिताश्च सेतुबन्धा यदि दृश्यन्ते तर्हि तदा शीघ्रमेव जलसंप्रप्तं इति वक्तव्यम्।

पर्वता अंजनचूर्णसन्निभा यदि दृस्यन्ते। उष्मणाछन्नाकन्दरा तथा भूताः चन्द्रस्य परिवेषाः कृववाकुविलोचनोपमा एते सर्व एव वृष्टिदाः।

### १४.२०) वृष्टिनिमित्तानि

उपसर्गेण विना पिपीलिकानां अण्डोपसंक्रन्तिः तथा सर्पाणां मैथुनम् सर्पाणां वृक्षावरोहणं तथा गवां प्लवनम् एतानि सर्वाणि वृष्टेः कारणानि।

कृकलासाः वृक्षाणां शिखरभागं गत्वा आकाशे यदि निरीक्षन्ते तर्हि तथा गावः यदि उपरिस्थितं रविं अवलोकयन्ति तर्हि तदा शीघ्रमेव जलं वतति इति ज्ञातव्यम्।

यदि पशवः गृहात् विनिर्गमनं नेच्छन्ति। तथा कर्णान् पादानपि कम्पयन्ति तदा जलं निपततीति निर्दिशेत्। पशूनामिकुक्कुराश्च ज्ञेयम्। यस्मिन् काले श्वनो गृहपटलेषु स्थिताः यदि आकाशं निरीक्षन्तो रुदन्ति तथा दिवसे तडित् पिनाकिदिग्भावा ईशानदिगुत्था यदि भवति तदा भूर्वारिणा समा भवति।

चन्द्रः यदा शुककपोतविलोचनसन्निभः मक्षिकसदृशवर्णो वा भवति तथा द्वितीयश्चन्द्रो यदा च दिवि दृश्यते तदा शीघ्रमेव पानीयं पतति। यदि रात्रौ स्तनितं मेघशब्दो भवति तथा अतिलोहिता ऊर्ध्वादधः दडाकारे तडितः दिवासमये दृश्यते तथा वायुः पूर्वस्यां दिशि शीतलो वहति तदा वृष्टिपातो भवेत्। वल्लीनां अभिनवपत्राणि गगनोन्मुखा यदि भवन्ति पक्षिण जलपांशुभिः यदि स्नानं कुर्वन्ति कृमिजातय तृणप्रान्तानि यदि सेवन्ते तदा शीघ्रमेव वृष्टिपातो भवति।

मयूरशुकचाषचातकसमानवर्णा जपाकुसुमपङ्कजद्युतिमुषः तथा जलोर्मि नागनक्रकच्छपवराहमीनोपमाः तथा प्रभूतपुटसंचलाः एवं विधाः सन्ध्यकाले मेघाः शीघ्रमेव जलं यच्छन्ति।

आदित्यस्य उदयास्तमयकाले इन्द्रधनुः तिर्यग्स्थितामेघरेखा प्रतिसूर्यः रोहितः तडितः परिवेषः एते यदि दृश्यन्ते तदा शीघ्रमेव वृष्टिपातो भवति। आकाशं तित्तिरपक्ष्यांः पक्षसृशनिभं यदि भवति तथा पक्षिगणा यदि मुदिताः शब्दं कुर्वन्ति तदा सूर्यस्योदयकाले अस्तमयकाले वा मेघाः शीघ्रमेव वर्षन्ति इत्यर्थः। अर्थात् उदयकाले दिवा वृष्टिः अस्तमयकाले रात्रौ वृष्टिः भवति।

### १४.२१) वर्षलक्षणविचारः

वर्षाकाले चन्द्रः शुक्रात् सप्तमराशौ स्थित्वा सौम्यग्रहावलोकितो यदा भवति तदा जलागमनं भवति। अथवा सौरात् स एव चन्द्रः सप्तमनवमपंचमस्थानेषु अन्यतमस्ताने स्थित्वा सौम्यग्रहैरवलोकितो यदा भवति तदा वृष्टिः पतति। ग्रहाणामुदयास्तमयकाले तथा चन्द्रेण सह ताराग्रहाणां समागमे तथा शुक्रचारे षण्मण्डलानि उक्तानि तेषां मण्डलसंक्रमे तथा पक्षक्षये तथा दक्षिणोत्तरयोरयनयोः समाप्तौ यदा सूर्य आर्द्रानक्षत्रं गच्छति तदा बाहुल्येन वृष्टिः भवति।

बुधशुक्रयोः संयोगे जलं पतति। तथा बुधबृहस्पत्योः संयोगे जलं पतति। गुरुशुक्रयोः संयोगे च जलं पतति। सौराङ्गारकयोः सङ्गमे पवनहुताशजं भयं भवति। अर्थात् सुभग्रहरहित संयोगे एव पवनहताशनजं भयं भवति। सूर्यावलम्बनशीलाः ग्रहाः सूर्यस्य प्राक्पश्चाद्वा यद्यस्तमयं कुर्वन्ति तदा महीं सर्वजलमयीं कुर्वन्ति

# १४.२२) प्रश्नावली

**१. संक्षेपेण लिखत** **५*५=२५**

१. गर्भसम्भवकालः कः ?

२. गर्भोपघात लक्षणानि कानि ?

३. पंचनिमित्तानि कानि ?

४. रोहिण्याः शकटः कः ? तस्य मध्यगते चन्द्रे फलं किम् ?

५. आपांवत्स इति का कीर्त्यते ?

**२. विस्तरेण उत्तरं लिखत** **१०*१२=१२०**

१. धृतानां गर्भाणां प्रसवकालं विशदयत ?

२. नक्षत्रवशात् गर्भाणां प्रसवकाल विचारं कुरुत ?

३. प्रवर्षणे दिवससंख्या का? इति निरूपयत ?

४. गर्भधारणविधिं निरूपयत ?

५. नक्षत्राणां वृष्टिप्रमाणानि चर्चयत ?

६. दिग्भागेन मेघफलं विवृमुत ?

७. चन्द्रसंस्थाने रोहिण्याः फलविचारं कुरुत ?

८. रोहिण्याः सर्वासु दिक्षु स्थिते चन्द्रे फलं विचारयत ?

९. स्वातीयोगस्य कालयोगः कः विचारयत ?

१०. आषाढीयोगविचारं कुरुत ?

११. तुलायाः लक्षणविचारं कुरुत ?

१२. भाद्रपदयोगमुद्धिश्य चर्चयत ?

**३. व्याख्यात** **२०*१०=२००**

१. गर्भसम्भवलक्षणानि तेषु विशेषलक्षणानि च विशदयत ?

२. पंचनिमित्तानां आधारेण प्रवर्षणविचारं कुरुत ?

३. प्रवर्षणविचारं कुरुत ?

४. रोहिणीयोगमुद्दिश्य व्याख्यात ?

५. स्वातीयोगं विश्लेषात्मकरूपेण विशदयत ?

६. सविवरणात्मकं वतचक्रविचारं लिखत ?

७. सद्योवर्षणविचारं कुरुत ?

८. वृष्टिनिमित्तानि कानि? तानि विपुली कुरुत ?

९. वर्षलक्षणानि चर्चयत ?

१०. गर्भाणां प्रसवकालमुद्दिश्य व्याख्यात ?